ગુજરાત રાજ્યના શિક્ષણવિભાગના પત્ર-ક્રમાંક
મશબ/1219/450/છ, તા.03/07/2019-થી મંજૂર

# अनिवार्यसंस्कृतव्याकरणम्

## मध्यमा १

## ( ધોરણ 11 )

### प्रतिज्ञापत्रम्

भारतं मम देशः।
सर्वे भारतीयाः मम भ्रातरः भगिन्यः च सन्ति।
मम मानसे देशस्पृहा अस्ति। समृद्धिसहितं
विविधतापरिपूर्णं तस्य संस्कृतिगौरवम् अनुभवामि।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति
आदरभावं धारयिष्यामि।
प्रत्येकेन सह शिष्टव्यवहारं करिष्यामि।
अहं मम देशाय देशबान्धवेभ्यः च मम निष्ठाम् अर्पयामि।
तेषां कल्याणे समृद्धौ च एव मम सुखम् अस्ति।

मूल्यम् : ₹ 20.00

गुजरातराज्यशालापाठ्यपुस्तकमंडलम्
'विद्यायनम्', सेक्टर 10-ए, गांधीनगरम् - 382010

© गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, गान्धीनगरम्

अस्य पाठ्यपुस्तकस्य सर्वेऽधिकाराः गुजरातराज्यपाठ्यपुस्तकमण्डलहस्तकाः सन्ति। अस्य पाठ्यपुस्तकस्य कश्चिदपि भागः केनापि रुपेण गुजरातराज्य-पाठ्यपुस्तकमण्डलनियामकस्य लिखितानुमत्या विना प्रकाशयितुं न शक्यते।

**विषयमार्गदर्शनम्**

डॉ. कृष्णप्रसाद निरौला

**लेखनम्**

श्री अर्जुनकुमार सामलः (कन्वीनर)

डॉ. योगेशभाई त्रिवेदी

डॉ. अश्विनभाई राजगोरः

डॉ. पुनितभाई शीलु

डॉ. मितेशभाई शर्मा

**समीक्षणम्**

श्री बिपिनभाई जोषी

प्रो. निरंजन पटेलः

डॉ. अत्रि राजगोरः

श्री योगेशभाई पण्ड्या

**भाषाशुद्धिः**

श्री अर्जुनकुमार सामलः

**संयोजनम्**

डॉ. क्रिष्ना दवे

(विषय-संयोजकः -अंग्रेजी)

**निर्माणायोजनम्**

श्री हरेन शाह

(उपनियामकः - शैक्षणिकः)

**मुद्रणसंयोजनम्**

श्री हरेश एस. लीम्बाचीया

(उपनियामकः- उत्पादनम्)

## प्रास्ताविकम्

प्राच्यगुरुकुलपरम्परानुसारम् अध्ययनं कुर्वतां-छात्राणां कृते प्राचीनार्वाचीनयोः अध्ययनाध्यापनयोः पद्धत्योः समन्वयं कृत्वा गुजरात राज्य-माध्यमिकोच्चतर माध्यमिक शिक्षणसमितिः (बोर्ड) द्वारा नूतना-अभ्यासक्रमसंरचना कृता अस्ति। गुजरातसर्वकारद्वारा प्रमाणिताः मानिताः च अभ्यासक्रमाः सन्ति।

गुजरातसर्वकारद्वारा प्राप्तमान्यतायाः **अनिवार्यसंस्कृत व्याकरणम्, मध्यमा-१ (धोरण 11)** इति विषयस्य नूतनाभ्यासक्रमानुसारं सज्जीकृतमिदं पुस्तकं-प्रकाशनात् प्राक् विषयज्ञैः सर्वाङ्गीणतया-समीक्षितं संसूचितपरिवर्तनानुसारं हस्तलिखितेषु लेखेषु योग्यतया संशोधनानन्तरं प्रकाशितमस्ति।

प्रस्तुतं पाठ्यपुस्तकं कक्षानुसारम् उपयोगि परिशुद्धं च कर्तुं मण्डलद्वारा कृते प्रयत्नेऽपि न्यूनतापरिपूर्णार्थं विद्वद्भिः सूचिताः सूचनाः सादरं स्वीकरणीयाः एव।।

**पी. भारती** (IAS)

नियामकः — कार्यवाहकःप्रमुखः

ता.06-07-2019 — गान्धीनगरम्

**प्रथमावृत्ति : 2019**

**प्रकाशक** : गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, 'विद्यायन', सेक्टर 10-ए, गान्धीनगरप्रातिनिध्येन पी.भारती, नियामकः

**मुद्रक** :

# मूलभूतकर्तव्यानि

**प्रत्येकं भारतीयनागरिकस्य कर्तव्यानि निम्नानुसारं स्युंः। ***

(क) संविधान प्रति प्रामाणिकत्वम् आदर्शत्वं संस्थानां राष्ट्रध्वजस्य राष्ट्रीयगीतस्य च आदरः।

(ख) स्वातन्त्र्याय अम्मीयराष्ट्रियसत्याग्रहं प्रेरयताम् आदर्शानां हृदये प्रतिष्ठापनम् अनुसरणं च।

(ग) भारतस्य सार्वभौमत्वस्य एकतायाः अखण्डिततायाश्च समर्थनं च।

(घ) देशस्य रक्षणं राष्ट्रियसेवायै उद्घोषाणायां जातायां तदनुसरणञ्च।

(च) धार्मिक-भाषाकीय-प्रादेशिकेभ्यः धार्मिकेभ्यो वा भेदेभ्यः परं स्थित्वा, समस्तभारतीयेषु साम्मनस्यसमानबन्धत्वभावनायाः वृद्धिः, स्त्रीणां गौरवहानिकारकव्यवहारत्यागश्च।

(छ) अस्माकं समन्वितसंस्कृतेः समृद्धदायस्य मूल्यं ज्ञात्वा तदवग्रहः।

(ज) वनानां तडागानां नदीनाम् अन्यवन्यपशुपक्षिसहितं प्राकृतिकपर्यावरणरक्षणं तद्वर्धनं तथैव जीवमात्रं प्रति अनुकम्पाभावः।

(झ) वैज्ञानकिमानसाय मानवतावादाय जिज्ञासायै भावनाभिगमाभिबोधः।

(ट) सामान्यसम्पत्तिरक्षणं हिंसायाः त्यागश्च।

(ठ) राष्ट्रं पुरुषार्थस्य सिद्धेश्च अधिकाधिकमुन्नतसोपानानि प्रति सततं प्रगतिशीलं स्यात्तदर्थं वैयक्तिकसामूहिकप्रवृत्तीनां समस्तक्षेत्रेषु श्रेष्ठत्वम् आसादयितुं प्रयत्नः।

(ड) मात्रा पित्रा अथवा अभिभावकेन षड्वर्षतः चतुर्दशवर्षं यावत् (६. तः १४) वयसे बालकाय अथवा पाल्याय शिक्षणलाभाः देयाः।

---

* भारतीय संविधानम् : अधिनियमः 51-क

# अनुक्रमणिका


| | | |
|---|---|---|
| 1. | तद्धितपरिचयः | 1 |
| 2. | कृदन्तपरिचयः | 4 |
| 3. | कारकपरिचयः | 8 |
| 4. | अदादिप्रकरणम् | 12 |
| 5. | जुहोत्यादिप्रकरणम् | 31 |
| 6. | दिवादिप्रकरणम् | 42 |
| 7. | स्वादिप्रकरणम् | 52 |
| 8. | तुदादिप्रकरणम् | 57 |
| 9. | रुधादिप्रकरणम् | 67 |
| 10. | तनादिप्रकरणम् | 71 |
| 11. | क्र्यादिप्रकरणम् | 76 |
| 12. | चुरादिप्रकरणम् | 81 |
| 13. | ण्यन्तप्रकरणम् | 84 |
| 14. | सन्नन्तप्रकरणम् | 89 |
| 15. | यङन्तप्रकरणम् | 94 |
| 16. | यङ्लुगन्तप्रकरणम् | 99 |
| 17. | तर्कसंग्रहः प्रत्यक्षखण्डः | 102 |
| 18. | अमरकोशे वारिवर्गः | 125 |
| | सूत्रसूचिः वार्तिकसूचिश्च | 129 |

# 1 तद्धितपरिचयः

**प्रास्ताविकम् :-**

पाणिनीयं तद्धितप्रकरणं भारतीयेतिहासस्य निदर्शकमस्ति। एतेन प्राचीनभारतवर्षस्य भौगोलिकचित्रं स्पष्टं भवति। यतः प्रकरणेऽस्मिन् अनेकेषां प्राचीनपुरुषाणाम्, राज्ञाम्, कुलानाम्, जनपदानाम्, नगराणाम्, ग्रामाणाम्, नदीनाम्, पर्वतादीनां स्थाने स्थाने उल्लेखः प्राप्यते। भारतस्य प्राक्कालिकं वैदिकोत्तरकालिकं च ऐतिह्यं ज्ञातुं पाणिनीयतद्धितप्रकरणम् अत्यन्तमुपयुक्तम्।

**तद्धितविषयप्रवेशः -**

''अपदं न प्रयुञ्जीत'' इति भाष्यवचनेन इदं स्पष्टं यत् सुप्प्रत्ययानां तिङ्प्रत्ययानां च महत्त्वमत्यन्तमस्ति। यतः सुप्तिङ्प्रत्ययैः एव पदनिर्माणम्भवति। किन्तु पदनिर्माणात्प्राक् प्रातिपदिकनिर्माणं कर्तव्यम्। एवञ्च धातुना सह तिङ्प्रत्ययानां वा कृत्प्रत्ययानां वा सनादिप्रत्ययानां योजनेन तिङन्तपदमुत्पद्यते। तथैव प्रातिपदिकेन सह सुप्प्रत्ययानां वा स्त्रीप्रत्ययानां वा तद्धितप्रत्ययानां योजनेन सुबन्तं पदमुत्पद्यते। यदा वयं तद्धितप्रत्ययानां विषये परिशीलयामस्तदानीम् इदमवश्यं ज्ञातव्यं यत् तद्धितप्रत्ययाः केवलं सुबन्तेभ्यः एव क्रियन्ते।

**किन्नाम तद्धितम् ? -**

तेभ्यः प्रयोगेभ्यः हिताः तद्धिताः। अर्थात् येषां प्रयोगाणां निष्पादनाय ये प्रत्ययाः हितकराः सिद्ध्यन्ति, ते प्रत्ययाः तद्धितप्रत्ययाः वा तद्धिताः इति उच्यन्ते। तद्धितप्रत्ययानाम् आवश्यकता का वर्तते ? इत्येकेन वाक्येन अवगच्छामः। उदा. ''कुरोः अपत्यानि पाण्डोः अपत्यैः सह अयुध्यन्त'' इति। वाक्यमिदं प्रकारान्तरेणापि प्रस्तोतुं शक्यते। तद्यथा - ''कौरवाः पाण्डवैः सह अयुध्यन्त'' इति। अनेन ज्ञायते यत् अत्र तद्धितान्तशब्दानां प्रयोगेण वाक्यं लघुभूतं सत् योग्यमेवार्थं बोधयति। येषां प्रत्ययानां संयोजनेन विभिन्नार्थेषु नूतनप्रातिपदिकानां निर्माणं भवति, तेषां प्रत्ययानां ''तद्धिताः'' इति नामधेयम्। तद्धितप्रत्ययाः प्रायेण अर्थविशेषम् अनुसृत्य प्रवर्तन्ते।

**तद्धितप्रत्ययानाम् उदाहरणानि -**

(1) कुरोः अपत्यम् - कुरु + अण् = कौरवः।

(2) जनानां समूहः - जन + तल् = जनता।

(3) व्याकरणम् अधीते सः - व्याकरण + अण् = वैयाकरणः।

(4) राष्ट्रे भवः - राष्ट्र + घ = राष्ट्रियः।

(5) नरस्य भावः - नर + त्व = नरत्वम्।

इत्थमत्र कानिचित् तद्धितप्रत्ययानाम् उदाहरणानि प्रस्तुतानि।

**तद्धितरूपनिर्माणाय सामान्यप्रक्रियाः -**

(1) तद्धितप्रत्ययानां योजनेन समास इव तद्धितान्तस्याऽपि प्रातिपदिकसंज्ञा क्रियते ''कृत्तद्धितसमासाश्च'' इति सूत्रेण।

(2) तदनन्तरं मध्ये विद्यमानानां सुप्प्रत्ययानां ''सुपो धातुप्रातपदिकयोः'' इति सूत्रेण लोपः भवति।

(3) तदनु, प्रकृतेः परतः तद्धितप्रत्यये सति गुणवृद्ध्यादिकार्याणि क्रियन्ते।

(4) अन्ते ''एकदेशविकृतमनन्यवत्'' इति न्यायेन प्रातिपदिकं मत्त्वा सुप्प्रत्ययानां संयोजनेन तद्धितान्त- पदस्य निर्माणं भवति।

**तद्धिताधिकारः -**

अष्टाध्याय्यां ''''तद्धिताः'' (4-1-76) इति सूत्रात् आरभ्य पञ्चमाध्यायस्य समाप्तिपर्यन्तं तद्धितप्रत्ययानाम् अधिकारः दृश्यते अर्थात् चतुर्थाध्यायस्य प्रथमपादस्य षट्सप्ततितमसूत्रात् आरभ्य आपञ्चमाध्यायसमाप्ति ये प्रत्ययाः सन्ति, तेषां ''तद्धित'' इति संज्ञाऽस्ति।

**अष्टाध्याय्याः संरचनाः**

| प्रथमः अध्यायः | द्वितीयः अध्यायः | तृतीयः अध्यायः | चतुर्थः अध्यायः | पञ्चमः अध्यायः | षष्ठः अध्यायः | सप्तमः अध्यायः | अष्टमः अध्यायः |
|---|---|---|---|---|---|---|---|

**प्रकृतिः** + **प्रत्ययः** = **पदम्**

अष्टाध्याय्याः संरचना अत्यन्तं वैज्ञानिकी वर्तते। उपरिनिर्दिष्टकोष्ठकं दृष्ट्वा इदं स्पष्टं ज्ञायते यत् भगवता पाणिनिना प्रथमाध्यायद्वये प्रकृतिविषयीणि सूत्राणि, ततः तृतीयचतुर्थपञ्चमाध्यायेषु प्रत्ययसम्बन्धीनि सूत्राणि, किञ्च षष्ठसप्तमाष्टमाध्यायेषु पदसम्बन्धीनि सूत्राणि उपदिष्टानि। अतः चतुर्थाध्यायः पञ्चमाध्यायश्च तद्धितप्रत्यय-विषयतया उपदिष्टः।

**तद्धितसूत्रविभाजनम् -**

तद्धितप्रकरणे सूत्राणां द्वैविध्यं दृश्यते। कानिचित् सूत्राणि अर्थज्ञापकानि सन्ति। कानिचित् सूत्राणि प्रत्ययविधायकानि सन्ति।

| अर्थज्ञापकानि सूत्राणि | प्रत्ययज्ञापकानि सूत्राणि |
|---|---|
| 4/1/92 - तस्याऽपत्यम् | 4/1/94 - तस्याऽपत्यम् |
| 4/2/69 - तस्य निवासः | 4/2/18 - दध्नष्ठक् |
| 4/4/8 - चरति | 5/2/62 - गोपदादिभ्यो वुन् |
| 5/2/78 - तस्याऽपत्यम् | |

प्रातिपदिकम् + प्रत्ययः = तद्धितान्तम्

**विशेषः -**

तद्धितप्रकरणे समग्रे इदमवश्यं सावधानतया अवगन्तव्यं यत् कदाचित् एकः एव प्रत्ययः विविधैः सूत्रैः, विविधैः वार्तिकैः, विविधेभ्यः प्रातिपदिकेभ्यः विविधेषु अर्थेषु विधीयते। तद्धितप्रकरणे प्रायेण 281 प्रत्ययानां विधानं दृश्यते। तद्धितप्रकरणे अनेके प्रत्ययाः सन्ति। किन्तु प्राधान्येन पञ्च प्रत्ययाः सन्ति। तद्यथा - 1. अण् 2. ठक् 3. यत् 4 छ 5 अञ् चेति। महाभाष्यकारः इमान् पञ्चप्रत्ययान् ''महोत्सर्ग'' नाम्ना उच्चारितवान्। एतेषां प्रत्ययानाम् अधिकारे अनेके अर्थाः कथिताः सन्ति। इत्थमत्र संक्षेपेण तद्धितविषयस्य परिचयः प्रदत्तः।

**स्वाध्यायः**

**1. योग्यविकल्पं चित्वा उत्तराणि लिखत।**

(1) ''अपदं न प्रयुञ्जीत'' इति कस्य वचनम् ?

(क) गीतावचनम् (ख) भाष्यवचनम्

(ग) रामायणवचनम् (घ) कालिदासस्य वचनम्

(2) नरस्य भावः इत्यर्थे रूपम् ?

(क) नरत्वम् (ख) नरः (ग) नारायणः (घ) नरभावः

(3) तद्धिताः इति कीदृशं सूत्रम् ?

(क) संज्ञासूत्रम् (ख) परिभाषासूत्रम् (ग) अधिकारसूत्रम् (घ) विधिसूत्रम्

(4) तद्धितप्रकरणे प्रायेण कति प्रत्ययाः दृश्यन्ते ?

(क) 80 (ख) 115 (ग) 176 (घ) 281

(5) तद्धितप्रकरणे प्राधान्येन कति प्रत्ययाः स्वीक्रियन्ते ?

(क) त्रयः (ख) नव (ग) पञ्च (घ) सप्त

**2. एकेन वाक्येन उत्तरं लिखत।**

(1) पाणिनीयतद्धितप्रकरणं कस्य निदर्शकम् अस्ति ?

(2) केन पदनिर्माणं भवति ?

(3) कथं सुबन्तपदम् उत्पद्यते ?

(4) तद्धितः इत्यत्रः कः विग्रहः ?

(5) जनता इति शब्दे प्रत्ययं निर्दिशत ।

(6) प्रत्ययज्ञापकम् एकं सूत्रं लिखत।

(7) अर्थज्ञापकम् एकं सूत्रं लिखत।

**3. सविस्तरं निरूपयत।**

(1) किन्नाम तद्धितम् ? सोदाहरणं लिखत।

(2) पाठानुरोधेन तद्धितसूत्रविभाजनं निरूपयत।

•

# 2 कृदन्तपरिचयः

**प्रास्ताविकम् :-**

सर्वः अपि सुबन्तसमुदायः पञ्चभिः वृत्तिभिः निष्पाद्यते। ताः पञ्चवृत्तयः इमाः सन्ति – कृद्वृत्तिः. तद्धितवृत्तिः समासवृत्तिः, एकशेषवृत्तिः, सनाद्यन्तधातुवृत्तिश्च।

आसु पञ्चवृत्तिषु अन्यतमा वृत्तिः कृद्वृत्तिः।

## 1. कृद्वृत्तिपरिचयः –

धातुमात्राद् द्विविधाः एव प्रत्ययाः भवन्ति । (1) तिङ्प्रत्ययाः (2) कृत्प्रत्ययाः। तिङ्प्रत्याहारे तिप्प्रत्ययात् आरभ्य महिङ्प्रत्ययं यावत् प्रत्ययाः अन्तर्भवन्ति। ते च अष्टादश सन्ति।

कृत्प्रत्ययाः ते सन्ति, ये ''कृदतिङ्'' इति सूत्रेण ''कृत्'' इति संज्ञां लभन्ते। यथा – अण्, अच्, ण्वुल्, तृच्, अनीयर् इत्यादयः। धातोः विधीयमानेषु प्रत्ययेषु तिङ्प्रत्ययान् विहाय, अन्येऽवशिष्टाः सर्वे प्रत्ययाः कृत्प्रत्ययाः उच्यन्ते। प्रातिपदिकनिर्माणाय सर्वादौ धातोः ''कृत्'' संज्ञकाः प्रत्ययाः विधीयन्ते। धातुभिः सह कृत्प्रत्ययानां संयोजनेन ''कृदन्तस्य'' निर्माणं भवति। तस्य च ''कृत्तद्धितसमासाश्च'' इति सूत्रेण ''प्रातिपदिकम्'' इति संज्ञा क्रियते।

संस्कृतवाङ्मये प्रायेण 94 % प्रतिशतं शब्दाः कृदन्ताः एव सन्ति। अतः कृदन्तज्ञानं विना व्याकरणज्ञानम् असम्भवम् एव। क्वचित् संस्कृतभाषायां तिङन्तक्रियापदानि विना एव कृदन्तक्रियावाचकैः पदैः सर्वोऽपि वाग्व्यहारः क्रियते। संस्कृतसाहित्ये कृदन्तशब्दानां प्रयोगः बहुधा कृतः दृश्यते। कृदन्तस्यैकम् उदाहरणं परिशीलयामस्तावत्। ''रामः'' इत्येकं सुबन्तपदम्। क्रीडार्थकात् ''रम्'' धातोः ''घञ्'' इति प्रत्ययः विधीयते। तत्र ''अ'' इत्यवशेषः भवति। अयं ''घञ्'' प्रत्ययः धातोः विहितः। सः तिङ्प्रत्ययो नास्ति। अतः ''घञ्'' प्रत्ययः''कृत्प्रत्ययः'' इत्युच्यते। इत्थं धातोः विहिताः तिङ्भिन्नाः सर्वेऽपि प्रत्ययाः ''कृत्संज्ञकाः'' उच्यन्ते।

कृदन्ताः

धातुः + कृत्प्रत्ययः = कृदन्तप्रातिपदिकम्

कृदन्तम् (प्रातिपदिकम्) + सुप्प्रत्ययः = सुबन्तम् (नामपदम्)

अतः केषाञ्चन प्रत्ययानां समूहस्य ''कृत्'' इतीयं संज्ञा। येषामन्ते कृत्प्रत्ययाः भविन्त, ते ''कृदन्ताः'' इत्युच्यन्ते। यथा – रामः, कृष्णः, करः उद्घाटनम्, दमनम्, पठित्वा, गन्तुम् इत्यादयः शब्दाः कृदन्ताः एव सन्ति। एवञ्च कृदन्तेभ्यः सुप्प्रत्ययानां संयोगेन सुबन्ताः शब्दाः निष्पद्यन्ते।

**कृत्प्रत्ययाः –**

कृत्प्रत्ययाः प्रायेण 150 सन्ति। एतेषु प्रत्ययेषु केचन वैदिकाः, केचन च लौकिकाः। लौकिकप्रत्ययेषु अपि केचन सामान्यप्रत्ययाः, केचिच्च विशेषप्रत्ययाः। येषां प्रत्ययानां विधानं सर्वेभ्यः धातुभ्यः भवति, ते ''सामान्यप्रत्ययाः'' इति कथ्यन्ते। ये प्रत्ययाश्च विशेषधातुभ्यः विधीयन्ते, ते ''विशेषप्रत्ययाः'' उच्यन्ते। ण्वुल्, तृच्, क्त्वा, तुमुन्, ल्यप् इत्यादयः सामान्यप्रत्ययाः। खश्, वुञ्, ड इत्यादयः विशेषप्रत्ययाः।

एते प्रत्ययाः धातुभ्यः परतः भवन्ति विभिन्नेषु अर्थेषु। इदानीमर्थानुसारं कृत्प्रत्ययविभागं परिशीलयेम।

| कृत्प्रत्ययविभागः | | | |
|---|---|---|---|
| **कर्तरि** | **भावे** | **भूते** | **विध्यादिषु** |
| ण्वुल् | ल्युट् | क्तवतु | तव्यत् |
| तृच् | क्तिन् | क्त | अनीयर् |
| शतृ/शानच् | अ | | यत्, ण्यत् |
| क्विप् | घञ् | | |
| | अच् | | |

**अन्ये कृदन्ताः**

| कृदन्ताव्ययानि | उपपदकृदन्ताः |
|---|---|
| क्त्वा - ल्यप् | अण् |
| तुमुन् | क |
| णमुल् | ट |
| | ड |
| | खश् |

### दैनन्दिनव्यवहारोपयोगिनां नवदशकृत्प्रत्ययानां निरूपणम् -

उपयुक्तानां कृत्प्रत्ययानां ज्ञानात्प्राक् काचित् तत्सम्बद्धा सामान्यव्यवस्था अस्माभिः अवश्यं ज्ञातव्या।

### कर्तरि कृत् -

''कर्तरि कृत्'' इति सूत्रेण सामान्यतया कृत्संज्ञकाः प्रत्ययाः कर्तरि अर्थे विधीयन्ते अर्थात् धातोः विहितैः कृत्प्रत्ययैः निष्पन्नं कृदन्तप्रातिपदिकं ''कर्तारम्'' बोधयति। यथा - ''तृच्'' इति कृत्प्रत्ययः। करोति इति कर्ता। अत्र कृधातोः विहितः ''तृच्'' इति कृत्प्रत्ययः। तृच्प्रत्यये ''कर्ता'' इति रूपं भवति। इदं ''कर्ता'' इति कृदन्तरूपं कर्तारं सूचयति। यत्र विशेषविधानं भवति, तत्र तु कृत्संज्ञकप्रत्ययाः कर्तरि न भवन्ति, किन्तु भावे कर्मणि च अर्थे भवन्ति।

कृत्प्रत्ययेषु सप्त प्रत्ययाः पाणिनिना ''कृत्य'' संज्ञकाः कृताः। ते च - तव्यत्, तव्य, अनीयर्, यत्, ण्यत्, क्यप्, केलिमर् चेति। इमे कृत्प्रत्ययाः भावेऽर्थे कर्मणि अर्थे च भवन्ति।

### प्रत्ययविवरणम् -

दैनन्दिनव्यवहारोपयोगिनः नवदश कृत्संज्ञकाः प्रत्ययाः ये सन्ति, ते त्रिधा विभक्तुं शक्यन्ते। कर्तरि, कर्मणि, भावे चेति।

**प्रत्ययाः**

| कर्तरि | कर्मणि | भावे |
|---|---|---|
| ण्वुल् - कारकः | यक् - पठ्यमानः | घञ्/अच् - पाकः, रामः |
| तृच् - कर्ता | क्तः - पठितः | क्तिन्/ - कृतिः, |
| शतृ/कुर्वन् | तव्यत् - कर्तव्यम् | सन् - पिपठिषा |
| शानच् - कुर्वाणः, वन्दमानः | अनीयर् - वन्दनीयम् | ल्युट् - पठनम् |
| स्य + शतृ - करिष्यन् | यत्/ण्यत् - चेयम्, पठ्यम्, कार्यम् | तुमुन् - पठितुम् |
| णिच् + शतृ - कारयन् | | क्त्वा - पठित्वा |
| णिच् + शानच् - गम्यमानः, कार्यमाणः | | ल्यप् - संपठ्य |
| क्त = गतः, भुक्तः, कृतः | | णमुल् - कारं, कारम्, पाठं, पाठम् |
| क्तवतु - कृतवान्, गतवान् | | |

**उपसंहारः -**

अस्मिन् पाठे भवद्भिः प्राप्तः कृदन्तानां परिचयः सामान्येन अस्ति। विशेषाऽवबोधाय यथाग्रन्थं कृदन्तप्रकरणमवश्यम् अभ्यसनीयम्।

**स्वाध्यायः**

**1. योग्यविकल्पं चित्वा उत्तराणि लिखत।**

(1) सुबन्तसमुदायः कतिभिः वृत्तिभिः निष्पाद्यते ?

(क) 3 (ख) 5 (ग) 8 (घ) 4

(2) धातुमात्रात् कतिविधाः प्रत्ययाः भवन्ति ?

(क) त्रिविधाः (ख) पञ्चविधाः (ग) द्विविधाः (घ) चतुर्विधाः

(3) 'रामाः' इति कीदृशं पदम् ?

(क) सुबन्तम् (ख) तिङन्तम् (ग) तद्धितम् (घ) स्त्रीप्रत्ययान्तम्

(4) कृत्प्रत्ययाः प्रायेण कति सन्ति ?

(क) 80 (ख) 75 (ग) 64 (घ) 150

(5) कृत्प्रत्ययेषु कति प्रत्ययाः कृत्यसंज्ञकाः ?

(क) 5 (ख) 9 (ग) 7 (घ) 11

(6) करोतीति विग्रहे कृदन्तं रूपं किम् ?

(क) कारकः (ख) कर्तव्यम् (ग) करोति (घ) एकमपि न

**2. संक्षिप्तमुत्तरं प्रदेयम्।**

(1) कति वृत्तयः ?

(2) कृदन्तस्य निर्माणं कथं भवति ?

(3) के कृत्संज्ञकाः उच्यन्ते ?

(4) के सामान्यकृत्प्रत्ययाः ?

(5) कर्तरि प्रयुक्तान् कृत्प्रत्ययान् लिखत ।

(6) कति कृदन्ताव्ययानि ?

(7) कर्मणि के कृत्प्रत्ययाः प्रयुज्यन्ते ?

**3. सविस्तरं निरूपयत।**

(1) कर्तरि, भावे, भूते, विध्यादिषु च निर्दिष्टान् कृत्प्रत्ययान् लिखत।

(2) सोदाहरणं कृत्प्रत्ययान् प्रतिपादयत।

•

| 3 | # कारकपरिचयः |
|---|---|

**प्रास्ताविकम् :-**

लोकव्यवहारे अर्थस्य स्पष्टज्ञानं वाक्यादेव भवति। अष्टाध्याय्यां वाक्यसम्बद्धानि कार्याणि वर्णितानि, किन्तु वाक्यं नाम किम् ? इति वाक्यस्य लक्षणं न निरूपितम्। तदर्थं वार्तिककारः कात्यायनः लक्षणद्वयं दत्तवान् – (1) आख्यातं साव्ययकारकविशेषणं वाक्यम्। अर्थात् अव्ययेन, कारकेण, एवं विशेषेण सहितम् आख्यातं नाम क्रियापदमेव 'वाक्यम्' इत्युच्यते। यथा – 'रामः उच्चैः गायति' – अत्र अव्ययस्य कर्तृक्रियाभ्यां सह अन्वयः अस्ति। 'रामः ग्रामं गच्छति' इत्यत्र कारकस्य कर्तृक्रियाभ्यां सह अन्वयः अस्ति। (2) द्वितीयं लक्षणमस्ति – ''एकतिङ् वाक्यम्'' अर्थात् यत्र न्यूनातिन्यूनम् एकं तिङन्तं नाम क्रियापदं भवति, तद्वाक्यम् उच्यते।

एतादृशे वाक्यविन्यासे कारकस्य महत्त्वं भूरिशः वर्तते। अतः एव व्याकरणे कारकप्रकरणस्य विशिष्य अध्ययनं क्रियते। इदमेव कारकप्रकरणं 'विभक्त्यर्थ-प्रकरणम्' इति नाम्नाऽपि प्रसिद्ध्यति। वस्तुतः सप्त-विभक्तीनाम् अर्थान् व्याख्यातुमपि कारकप्रकरणम् आरभ्यते।

**किन्नाम कारकम् ?**

सामान्येन ''क्रियान्वयि कारकम्'' इति कारकस्य परिभाषा उच्यते। क्रियायाः अन्वयः = क्रियान्वयः। अन्वयः नाम सम्बन्धः। यत् क्रियया सह सम्बन्धं प्राप्नोति, तत्कारकम् इत्युच्यते। अथवा ''साक्षात् क्रियाजनकं कारकम्'' अर्थात् यत् क्रियां निष्पादयितुं प्रमुखं निमित्तं भवति, तत्कारकम् इति वक्तुं शक्यम्।

**इदं कारकं षोढा अस्ति -**

**''कर्ता कर्म च करणं सम्प्रदानं तथैव च।**
**अपादानाधिकरणम् इत्यादुः कारकाणि षट्॥''**

इत्थं कर्तृकारकम्, कर्मकारकम्, करणकारकम्, सम्प्रदानकारकम्, अपादानकारकम्, अधिकरणकारकम् इति कारकाणि षट् सन्ति।

**उदाहरणैः सह समन्वयः -**

यस्य साक्षात् अथवा परम्परया क्रियया सह सम्बन्धः भवति, तत्कारकम् इत्युच्यते। कथम् ? इति वयम् उदाहरणैः स्पष्टज्ञानं कुर्मः।

**(1) कर्तृकारकम्** – 'पाचकः पचति' इत्यत्र पाचकः पाकक्रियया सह सम्बन्धं प्राप्नोति। अतः 'पाचकः' कर्तृकारकमस्ति। तस्मात् 'पाचक' पदस्य प्रथमाविभक्तिः।

**(2) कर्मकारकम्** – 'बालः फलं खादति' इत्यत्र फलं खादनक्रियायां सम्बन्धं प्राप्नोति। अतः 'फलम्' इति कारकम्। तच्च प्रकृते 'कर्मकारकम्'। कर्मकारकं सूचयितुं 'फलम्' इत्यत्र द्वितीया विभक्तिः।

**(3) करणकारकम्** – 'शिक्षकः लेखन्या लिखति' इत्यत्र लेखनी लेखनक्रियायां सम्बन्धं प्राप्नोति। अतः 'लेखनी' इति कारकम्। तच्च प्रकृते करणकारकम् अस्ति। करणकारकं सूचयितुं 'लेखनी' पदस्य तृतीयाविभक्तौ 'लेखन्या' इति निर्देशः कृतः।

**(4) सम्प्रदानकारकम्** – 'चैत्रः रजकाय वस्त्रं ददाति' इत्यत्र रजकः वस्त्रस्य दानक्रियया सह सम्बन्धं प्राप्नोति। अतः 'रजकः' कारकम्। तच्च प्रकृते सम्प्रदानकारकम्। सम्प्रदानकारकं कथयितुं 'रजक' शब्दस्य चतुर्थीविभक्तौ 'रजकाय' इति निर्देशः क्रियते।

**(5) अपादानकारकम्** – 'वृक्षात् फलं पतति' इत्यत्र 'वृक्षः' पतनक्रियायां सम्बन्धं प्राप्नोति। अतः 'वृक्षः' कारकम्। तच्च प्रकृते अपादानकारकम्। अत्र 'वृक्षात्' इत्यत्र अपादानकारकं सूचयितुं पञ्चमीविभक्तिनिर्देशः।

**(6) अधिकरणकारकम्** – 'गुरुः पीठे उपविशति' इत्यत्र पीठम् उपवेशनक्रियया सह सम्बन्धं प्राप्नोति। तच्च प्रकृते अधिकरणकारकम्। अधिकरणरकारकं सूचयितुं 'पीठे' इत्यत्र पीठशब्दस्य सप्तमीविभक्तौ निर्देशः कृतः।

इदम् अधिकरणकारकं त्रिविधम् अस्ति। (1) औपश्लेषिकम् (2) वैषयिकम् (3) अभिव्यापकम् इति।

(1) औपश्लेषिकस्य उदाहरणम् - कटे उपविशति।

(2) वैषयिकस्य उदाहरणम् - व्याकरणाध्ययने रुचि:।

(3) अभिव्यापकस्य उदाहरणम् - सर्वत्र वायु: अस्ति।

**अवधेयम् -**

''विवक्षात: कारकाणि भवन्ति''। वक्ता येन प्रकारेण वा भावेन यत्किञ्चित् प्रस्तोतुम् इच्छति, तत्सर्वं वक्तु: इच्छाधीनम् अस्ति। 'अग्नि: पचति' अथवा 'अग्निना पचति' इत्यादिप्रकारे: वक्ता यथा प्रयोक्तुमिच्छति तथा स: प्रयोक्तुम् अर्हति।

**कोष्ठकेन कारकावगमनम् -**

षट्सु कारकेषु 'कर्तृकारकम्' एव प्रधानं मन्यते। इतराणि कारकाणि तु गौणरूपेण क्रियायां सम्बन्धं प्राप्नुवन्ति।

**इदं परिशील्यताम्**




**विद्यालयस्य शिक्षक: ग्रन्थं सङ्गणकेन छात्राय ग्रन्थालयात् वर्गखण्डे पाठयति। -**

प्रस्तुतवाक्ये क: ? कम् ? कस्मै ? कस्मात् ? कुत्र पाठयति ? इति प्रश्ना: समाहिता: भवन्ति। अत: पाठनक्रियायां षट् अपि कारकाणि सम्बद्धानि इति स्पष्टम्। कस्य शिक्षक: ? इत्येषा आकाङ्क्षा तु 'विद्यालयस्य शिक्षक:' इति वाक्येन समाहिता: भवति। किञ्च विद्यालयस्य अन्वय: शिक्षके एव, न तु पाठनक्रियायाम्। अत: षष्ठीविभक्ति: कारकं न इति सिद्धान्त:।

**श्लोक:**

**रामो राजमणि: सदा विजयते रामं रमेशं भजे। रामेणाभिहता निशाचरचमू: रामाय तस्मै नम:। रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहम्। रामे चित्तलय: सदा भवतु मे भो राम! मामुद्धर** अयं श्लोक: षण्णां कारकाणां सप्तानां विभक्तीनां च अवगमने अत्यन्तम् उपकरोति।

**कारकम्**

- कर्तृकारकम् → प्रथमाविभक्तिः
- कर्मकारकम् → द्वितीयाविभक्तिः
- करणकारकम् → तृतीयाविभक्तिः
- सम्प्रदानकारकम् → चतुर्थीविभक्तिः
- अपादानकारकम् → पञ्चमीविभक्तिः
- अधिकरणकारकम् → सप्तमीविभक्तिः

| क्रमः | वाक्यम् | कारकम् | विभक्तिः |
|---|---|---|---|
| 1. | राजमणिः रामः सदा विजयते। | कर्तृकारकम् (रामः) | प्रथमाविभक्तिः |
| 2. | रमेशं रामं भजे। | कर्मकारकम् (रामम्) | द्वितीयाविभक्तिः |
| 3. | रामेण निशाचरचमूः अभिहता। | करणकारकम् (रामेण) | तृतीयाविभक्तिः |
| 4. | तस्मै रामाय नमः। | सम्प्रदानकारकम् (रामाय) | चतुर्थीविभक्तिः |
| 5. | रामात् परायणं परतरं नास्ति। | अपादानकारकम् (रामात्) | पञ्चमीविभक्तिः |
| 6. | रामस्य दासः अस्मि। | 'रामस्य' इत्यत्र शेषे षष्ठी | षष्ठीविभक्तिः |
| 7. | रामे मे सदा चित्तलयः भवतु। | अधिकरणकारकम् (रामे) | सप्तमीविभक्तिः |
| 8. | भो राम ! माम् उद्धर ! | | सम्बोधनप्रथमाविभक्तिः |

## स्वाध्यायः

**1. योग्यविकल्पं चित्वा उत्तरं ददत।**

(1) एकतिङ् किमस्ति ?

(क) प्रातिपदिकम् (ख) व्याकरणम् (ग) वाक्यम् (घ) पदम्

(2) किन्नाम कारकम् ?

(क) क्रियाजनकम् (ख) सुबन्तम् (ग) शब्दानुशासनम् (घ) वाक्यम्

(3) कति कारकाणि ?

(क) सप्त (ख) दश (ग) षट् (घ) अष्टौ

(4) कारकेषु प्रधानं कारकं किम् ?

(क) कर्मकारकम् (ख) करणकारकम्

(ग) कर्तृकारकम् (घ) अधिकरणकारकम्

(5) का विभक्तिः कारकं नास्ति ?

(क) षष्ठी (ख) द्वितीया (ग) प्रथमा (घ) तृतीया

(6) कानि विवक्षातः भवन्ति ?

(क) पदानि (ख) कारकाणि (ग) सूत्राणि (घ) एतेष्वेकमपि न

(7) कर्तृकारकस्य का विभक्तिः ?

(क) सप्तमी (ख) प्रथमा (ग) तृतीया (घ) चतुर्थी

**2. एकेन वाक्येन उत्तरं लिखत।**

(1) किन्नाम वाक्यम् ?

(2) किन्नाम कारकम् ?

(3) कारकप्रकरणस्यापरं नाम किम् ?

(4) 'पाचकः पचति' इत्यत्र किं कर्तृकारकम् ?

(5) कर्मकारकं सूचयितुं का विभक्तिः ?

(6) अधिकरणकारकस्य कति प्रकाराः ? के च ते ?

(7) षट्कारकसहितं सप्तविभक्तिसहितं वाक्यमेकं लिखत।

**3. सविस्तरं निरूपयत।**

(1) षट्कारकाणां सोदाहरणं निरूपणं क्रियताम्।

(2) 'रामो राजमणिः' इति श्लोकं प्रपूर्य तत्र कारकाणां विभक्तीनाञ्च निर्देशं कुरुत।

•

# 4 ॥ अदादिप्रकरणम् ॥

**अद भक्षणे ॥ 1 ॥**

**1. अदिप्रभृतिभ्यः शपः 1 | 4 | 72 ||**

लुक् स्यात्। अत्ति। अत्तः अदन्ति। अत्सि। अत्थः। अत्थ। अद्मि। अद्वः। अद्मः॥

**2. लिट्यन्यतरस्याम् 2 | 4 | 40 ||**

अदो घस्लृ वा स्याल्लिटि। जघास। उपधालोपः॥

**3. शासिवसिघसीनां च 8 | 3 | 60 ||**

इण्कुभ्यां परस्य एषां सस्य षः स्यात्। घस्य चर्त्वम्। जक्षतुः। जक्षुः। जघसिथ। जक्षथुः। जक्ष। जघास, जघस। जक्षिव। जक्षिम। आद। आदतुः। आदुः॥

**4. इडत्त्यर्तिव्ययतीनाम् 7 | 2 | 66 ||**

अद् ऋ व्येञ् एभ्यस्थलो नित्यमिट् स्यात्। आदिथ। अत्ता। अत्स्यति। अत्तु। अत्तात्। अत्ताम्। अदन्तु॥

---

**1. पदपरिचयः** - अदिप्रभृतिभ्यः (प.ब.व.) शपः (ष.ए.व.)।

**समासः** - अदिः प्रभृतिः (आदिः) येषां ते अदिप्रभृतयः, तेभ्यः अदिप्रभृतिभ्यः। तद्गुणसंविज्ञानबहुव्रीहिः।

**अनुवृत्तिः** - ''ण्यक्षत्रियार्षञितो यूनि लुगणिञोः'' (2.4.58) इत्यतः लुक्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अदादिगणपठितेभ्यः अदिप्रभृतिभ्यः परस्य **शप्** इति प्रत्ययस्य लुग् भवति।

**विशेषार्थः** - अदादिगणे पठितेभ्यः धातुभ्यः अनन्तरं विद्यमानस्य शपः लुक् भवति। अस्मिन् सूत्रे 'लुक्' इति उक्तं यतो हि ''प्रत्ययलोपे प्रत्ययलक्षणम्'' इत्यनेन प्राप्तस्य प्रत्ययलक्षणकार्यस्य ''न लुमताङ्गस्य'' इत्यनेन सूत्रेण निषेधः।

**रूपसिद्धिः** - **अत्ति** - अद - भक्षणे इति धातोरनुबन्धलोपे, तिपि, तिपः ''तिङ्शित्सार्वधातुकम्'' इत्यनेन तिपः सार्वधातुकसंज्ञात्वात् ''कर्तरि शप्'' इत्यनेन शप्प्रत्यये अद् + शप् + तिप् इति स्थिते '**अदिप्रभृतिभ्यः शपः**' इत्ययेन शप्प्रत्ययस्य लोपे, ''खरि च'' इत्यनेन दकारस्य चर्त्वेन तकारे **अत्ति** इति रूपम्।

**2. पदपरिचयः** - लिटि (स.ए.व.) अन्यतरस्याम् (स.ए.व.)।

**अनुवृत्तिः** - ''अदो जग्धिर्ल्यप्ति किति'' (2.4.37) इत्यतः अदः, ''लुङ्सनोर्घस्लृ'' (2.4.37) इत्यतः घस्लृ।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - **अद्** इति धातोः स्थाने **घस्लृ** इति आदेशो विकल्पेन भवति, लिटि परे।

**विशेषार्थः** - लिटि इति सप्तम्यन्तम्, अन्यतरस्याम् इति सप्तमीप्रतिरूपकम् अव्ययम्। घस्लृ इत्यत्र अनुबन्धलोपे घस् इति अवशिष्यते। लिट् लकारे अद्धातोः स्थाने घस्लृ इत्यादेशो विकल्पेन भवति।

**रूपसिद्धिः** - **जघास** - अद्धातोर्लिटि, तिपि, णलि, अनुबन्धलोपे **लिट्यन्यतरस्याम्** इत्यनेन अदो घस्लृ आदेशेऽनुबन्धे **घस्** + अ इति स्थिते **लिटि धातोरनभ्यासस्य** इति द्वित्वे अभ्याससंज्ञायां **हलादिः शेषः** इत्यभ्याससकारस्य लोपे, **कुहोश्चुः** इत्यनेन घकारस्य स्थाने झकारे, **अभ्यासे चर्च** इति झकारस्य जकारे, **अत उपधायाः** इत्यनेन उपधावर्तिनो घकाराकारस्य वृद्धौ आकारे, जघास इति। '**लिट्यन्यतरस्याम्**' इति **घस्लृ** इत्यादेशाऽभावपक्षे **आद** इति रूपं भवति।

**3. पदपरिचयः** - शासि-वसि-घसीनाम् (ष.ब.व.) च (अव्य.)।

**समासः** - शासिश्च वसिश्च घसिश्च तेषाम् इतरेतरद्वन्द्वः, शासिवसिघसयः, तेषां शासिवसिघसीनाम्।

**5. हुझल्भ्यो हेर्धिः 6 | 4 | 101 ||**

होर्झलन्तेभ्यश्च हेर्धिः स्यात्। अद्धि। अत्तात्। अत्तम्। अत्त। अदानि। अदाव। अदाम॥

**6. अदः सर्वेषाम् 7 | 3 | 100 ||**

अदः परस्य अपृक्तसार्वधातुकस्य अट् स्यात्सर्वमतेन। आदत्। आत्ताम्। आदन्। आदः। आत्तम्। आत्त। आदम्। आद्व। आद्म। अद्यात्। अद्याताम्। अद्युः। अद्यात्। अद्यास्ताम्। अद्यासुः॥

---

**अनुवृत्तिः** – ''**इण्कोः**'' इत्यस्य अधिकारः। **अपदान्तस्य मूर्धन्यः (2.4.58)** इत्यतः मूर्धन्यः। **सहेःसाडःसः (2.4.58)** इत्यतः सः।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – इण्कवर्गभ्यां परस्य शास् वस् घस् इत्येषां त्रयाणां दन्त्यसकारस्य स्थाने मूर्धन्यादेशो भवति।

**विशेषार्थः** – शासिवसिघसीनाम् इति षष्ठयन्तम्। च इति अव्ययपदम्। इण्प्रत्याहारात् कवर्गात् वा अनन्तरं विद्यमानस्य शास् धातोः, वस् धातोः घस् धातोः च सकारस्य स्थाने मूर्धन्यादेशो भवति। यथा जक्षतुः।

**रूपसिद्धिः** – **जक्षतुः** – अद्धातोर्लिटि, तसि, तसोऽतुसि, अद्धातोः **घस्लृ** इत्यादेशेऽनुबन्धलोपे **घस्** + **अतुस्** इति स्थिते, द्वित्वे, अभ्याससंज्ञायां, हलादिशेषे, **कुहोश्चुः** इति चुत्वेन घकारस्य स्थाने झकारे, **अभ्यासे चर्च** इति जश्त्वेन झकारस्य जकारे **गमहनजनखनघसां लोपः क्ङित्यनङि** इति उपधाभूतस्य अकारस्य लोपे, **जघ्स्** + **अतुस्** इति जाते, **खरि च** इति घस्य चर्त्वेन ककारे, **शासिवसिघसीनां च** इत्यनेन सकारस्य स्थाने षकारे, **जक्ष्** + **अतुस्** इत्यस्य सकारस्य स्थाने रुत्वे विसर्गे च, जक्षतुरिति रूपं निष्पन्नम्।

**4. पदपरिचयः** – इट् अत्त्यर्तिव्ययतीनाम्।

**समासः** – अत्तिश्च अर्तिश्च व्ययीतश्च इति अत्त्यव्ययतयः तेषाम् अत्त्यर्तिव्ययतीनाम् इति इतरेतरद्वन्द्वः।

**अनुवृत्तिः** – ''**अचस्तास्वत्थल्यनिटो नित्यम्**'' इत्यस्मात्सूत्रात् विभक्तिं विपरिणमय्य 'थलः' तथा 'नित्यम्' इति पदे अनुवर्तेते।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – अद्, ऋ व्येञ् इति त्रिभ्यो धातुभ्यः परस्य लिडादेशस्य थलो नित्यमिडागमो भवति।

**विशेषार्थः** – इट् प्रथमान्तम्, अत्त्यर्तिव्ययतीनाम् इति षष्ठयन्तम्। क्रादिनियमेन अद् + थ इत्यत्र निषिद्धस्य इडागमस्य पुनः इडागमप्राप्तिः। परन्तु ''**उपदेशेऽत्वतः**'' इत्यनेनः सूत्रेण थलि इट् निषेधः। ''**ऋतो भारद्वाजस्य**'' इत्यनेन सूत्रेण विकल्पेन इडागमः प्राप्नोति। थलि नित्यम् इट्निमित्तं सूत्रमिदम्। अद् भक्षणे, ऋ गतौ, व्येञ् आच्छादने इति त्रिभ्यः धातुभ्यः परस्य थलः नित्यमिडागमः स्यात्।

**रूपसिद्धिः** – **आदिथ** – अद्धातोर्लिटि, सिपि, तस्य थलादेशे, लिट्यन्यतरस्याम् इति अभावपक्षे द्वित्वे, अभ्याससंज्ञायां, हलादिशेषे, ''**अतः आदेः**'' इति अभ्यासस्य अकारस्य दीर्घे, सवर्णेदीर्घे च **इडत्यर्तिव्ययतीनाम्** इत्यनेन थलः इडागमे, आदिथ इति रूपं सिद्धम्।

**5. पदपरिचयः** – हुझल्भ्यः (प.ब.व), हेः (ष.ए.व.) धिः (प्र.ए.व.)।

**समासः** – हुश्च झलश्च तेषाम् इतरेतरद्वन्द्वः हुझलः, तेभ्यः हुझल्भ्यः।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – हु धातोः एवं झल्वर्णान्तधातुभ्यः परस्य **हि** इत्यस्य स्थाने **धि** भवति।

**विशेषार्थः** – हुझल्भ्यः इति पञ्चम्यन्तम्, हेः षष्ठयन्तम्, धिः प्रथमान्तम्। अङ्गस्य इति अधिकृतत्त्वात् 'झलः' इति पदं तदन्तविधिना 'झलन्तेभ्यः' इति जायते। हुधातोः तथा झल्प्रत्याहारवर्णान्तधातुभ्यः परस्य विद्यमानस्य हि इत्यस्य स्थाने धि आदेशो भवति। धि इत्यादेशः अनेकालत्वात् ''**अनेकाल्शित्सर्वस्य**'' इत्यनेन सर्वादेशः।

**6. पदपरिचयः** – अदः (ष.ए.व), सर्वेषाम् (ष.ब.व)।

**अनुवृत्तिः** – ''**अस्तिसिचोऽपृक्ते**'' **(7.3.96)** 'अपृक्ते' इति पदस्य षष्ठयां विपरिणामे, ''**तुरुस्तुशम्यमः सार्वधातुके**'' इत्यतः 'सार्वधातुके' इत्यनुवृत्तस्य षष्ठ्यां विपरिणय्य 'सार्वधातुकस्य' इति भवति। ''**अड्गार्ग्यगालवयोः**'' इत्यतः 'अट्' इत्यनुवर्तते।

**सूत्रप्रकारः** – विधिसूत्रम्।

**7. लुङ्सनोर्घस्लृ 2 | 4 | 37 ||**

अदो घस्लृ स्याल्लुङि सनि च। लृदित्त्वादङ्। अघसत्। आत्स्यत्॥ **हन् हिंसागत्योः** ॥ २ ॥ हन्ति॥

**8. अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति 6 | 4 | 37 ||**

अनुनासिकान्तानामेतेषां वनतेश्च लोपः स्याज्झलादौ किति ङिति परे। यमि रमि नमि गमि हनि मन्यतयोऽनुदात्तोपदेशा। तनु क्षणु क्षिणु ऋणु तृणु घृणु वनु मनु तनोत्यादयः। हतः घ्नन्ति। हंसि। हथः। हथ। हन्मि। हन्वः। हन्मः। जघान जघ्नतुः। जघ्नुः।

**9. अभ्यासाच्च 7 | 3 | 55 ||**

अभ्यासात्परस्य हन्तेर्हस्य कुत्वं स्यात्। जघनिथ-जघन्थ। जघ्नथुः। जघ्न। जघान-जघन। जघ्निव। जघ्निम। हन्ता। हनिष्यति। हन्तु, हतात्। हताम्। घ्नन्तु॥

**10. हन्तेर्जः 6 | 4 | 36 ||**

हौ परे॥

---

**सरलार्थः** - सर्वोषामाचार्य्याणां मतेन अद्धातोः परस्य अपृक्तस्य सार्वधातुकप्रत्ययस्य अडागमो भवति।

**विशेषार्थः** - अदः इति पञ्चम्यन्तम्, सर्वेषाम् इति षष्ठयन्तम्। पूर्वोक्तेषु सूत्रेषु गार्ग्यगालवयोः मतानुसारेण जातेषु कार्येषु अत्रापि तद्वत् विकल्पेन कार्यं न स्यात् तदर्थं 'सर्वेषाम्' इति उक्तम्। टित्वात् अपृक्तसार्वधातुकस्य आद्यावयवः।

**7. पदपरिचयः** - लुङ्सनोः (स.द्वि.व) घस्लृ (लुप्तप्रथमान्तम्)।

**समासः** - लुङ् च सञ्च तयोः इतरेतरद्वन्द्वः लुङ्सनौ, तयोः लुङ्सनोः।

**अनुवृत्तिः** - "अदोजग्धिर्ल्यप्ति किति" **(2.4.36)** इत्यतः "अदः" इत्यनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अद्धातोः स्थाने घस्लादेशो भवति, लुङि सन्प्रत्यये परे च। लृदित्त्वात् **पुष्पादिद्युताद्यलृदितः परस्मैपदेषु** इत्यनेन च्लेरङ् भवति।

**विशेषार्थः** - लुङ्सनोः इति सप्तम्यन्तम्, घस्लृ इति लुप्तप्रथमान्तम्। लुङ्लकारः अथवा सन् प्रत्ययः यदि अनन्तरं भवति, तर्हि अद् धातोः स्थाने घस्लृ आदेशः स्यात्। अनेकाल्त्वात् सर्वादेशः।

**8. पदपरिचयः** - अनुदात्तोपदेशवनतितनोत्यादीनाम् (ष.ब.व) अनुनासिकलोपः (प्र.ए.व) झलि (स.ए.व), क्ङिति (स.ए.व)।

**समासः** - अनुदात्त उपदेशे येषां ते अनुदात्तोपदेशाः इति बहुव्रीहिः। तनोतिः आदिः येषां ते तनोत्यादयः इति बहुव्रीहिः। अनुदात्तोपदेशाश्च वनतिश्च तनोत्यादयश्च इति अनुदात्तोपदेशवनतितनोत्यादयः तेषाम् अनुदात्तोपदेशवनतितनोत्यादीनाम् इति इतरेतरद्वन्द्वः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - यमिरमीत्यादयः षडनुदात्तोपदेशाः, वनु - तनु, क्षणु इत्यादयः तनोत्यादयः नव, इत्थमनुनासिकान्तानां षोडशधातूनामनुनासिकलोपो भवति झलादौ किति ङिति प्रत्यये परे सति।

**विशेषार्थः** - क् च ङ् च इति क्ङौ, तौ इतौ यस्य तत् क्ङित् तस्मिन् क्ङिति। अनुदात्तोपदेशवनतितनोत्यादीनां षष्ठयन्तम्। अनुनासिक इति लुप्तषष्ठीकं पदम्, लोपः प्रथमान्तम्, झलि सप्तम्यन्तम्, क्ङिति सप्तम्यन्तम्। वन्धातुः तथा यम्, रम्, नम् गम्, हन् इत्येते अनुनासिकान्ताः अनुदात्तोपदेशधातवः तथा तनु क्षिणु, क्षणु, ऋणु, तृणु, घृणु, वनु, मनु इत्येते तनोत्यादिधातवः एतेषु धतुषु अन्यतमात् धातोः परत्र झलादिः कित् वा ङित् प्रत्ययः परत्र भवति, तर्हि धातौ विद्यमानस्य अनुनासिकवर्णस्य लोपः भवति।

**रूपसिद्धिः** - **हतः** - हन्धातोर्लटि तसि शप्प्रत्यये, तस्य लोपे च हन् + तस् इति जाते

**अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति** इत्यनेन नकारस्य लोपे, सस्य रुत्वे विसर्गे च हतः इति रूपं भवति।

**11. असिद्धवदत्राभात् 6 | 4 | 22 ||**

इत ऊर्ध्वमापादसमाप्तेराभीयम्, समानाश्रये तस्मिन्कर्तव्ये तदसिद्धम्। इति जस्यासिद्धत्वादत्र हेर्लुक्। जहि, हतात्। हतम्। हत। हनानि। हनाव। हनाम। अहन्। अहताम्। अघ्नन्। अहन्। अहतम्। अहत। अहनम्। अहन्व। अहन्म। हन्यात् हन्याताम्। हन्युः॥

**12. आर्धधातुके 2 | 4 | 35 ||**

इत्यधिकृत्य॥

**13. हनो वध लिङि 2 | 4 | 42 ||**

---

**9. पदपरिचयः** - अभ्यासात् (प.ए.व), च (अव्य.)।

**अनुवृत्तिः** - हो हन्तेर्ञ्णिन्नेषु **(7.3.54)** इत्यतः हः, चजोः कुघिण्यतोः **(7.3.52)** इत्यतः कुः इति अनुवर्तेते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अभ्याससंज्ञकात्परस्य **हन्** धातोः हकारस्य कुत्वं भवति।

**विशेषार्थः** - अभ्यासात् इति पञ्चम्यन्तम्, च अव्ययपदम्। द्विपदमिदं सूत्रम्। अभ्यासात् परस्य विद्यमानस्य ''**हन्**'' धातोः हकारस्य स्थाने कुत्वं स्यात्।

**रूपसिद्धिः** - **जघनिथ** - हन्धातोर्लिटि सिपि, तस्य थलादेशे, द्वित्वे, अभ्याससंज्ञायाम्, हलादिशेषे, जहन् + थ इति स्थिते, **अभ्यासाच्च** इत्यनेन हकारस्य कुत्वेन घकारे, **ऋतो भारद्वाजस्य इति** नियमात् विकल्पेन इडागमे **जघनिथ** इति रूपं सिद्धम्। इड् अभावे **जघन्थ**।

**10. पदपरिचयः** - हन्तेः (ष.ए.व), जः (प्र.ए.व)।

**अनुवृत्तिः** - ''**शा हौ**'' इत्यतः हौ इति अनुवर्तते। **(6.4.35)**

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - **हन्** धातोः स्थाने **ज** इति आदेशो भवति, हि इति वर्णे परे सति।

**विशेषार्थः** - हन्तेः षष्ठयन्तम्, जः इति प्रथमान्तम्। द्विपदात्मकमिदं सूत्रम्। हि इति वर्णे परे सति हन् धातोः स्थाने ज आदेशः भवति। जकारस्य अनेकाल्त्वात् **अनेकाल् शित्सर्वस्य** इत्यनेन सर्वादेशः।

**11. पदपरिचयः** - असिद्धवत् (अव्य.), अत्र (अव्य.), आ (अव्य.), भात् (प.ए.व)।

**सूत्रप्रकारः** - अधिकारसूत्रम्।

**सरलार्थः** - ''असिद्धवदत्राऽभात्'' **2 | 4 | 22 तः** षष्ठाध्यायचतुर्थपादसमाप्तिपर्य्यन्तम् आभीयं भवति, अर्थात् तस्मिन्कर्तव्ये तानि सूत्राणि असिद्धानि भवन्ति।

**विशेषार्थः** - असिद्धेन तुल्यम् असिद्धवत्, असिद्धवदिति अव्ययम्, अत्र इत्यव्ययम् आ इत्यव्ययम्, भात् इति पञ्चम्यन्तम्। भम् अभिव्याप्य आभं, तस्मात् तत्र भवम् आभीयम्। भस्य - 6 | 4 | 129 इत्यस्य सूत्रस्याधिकारः चतुर्थपादसमाप्तिं यावत् अस्ति। 'असिद्धवदत्राभात्' इति सूत्रात् आरभ्य यावत्पर्यन्तं भसंज्ञाऽधिकारः, तदवधौ यानि सूत्राणि, ते सूत्रैः यत्कार्यं क्रियते, तत् 'आभीयम्' इत्युच्यते। भम् अभिव्याप्य आभीयम्। आभीये कर्तव्ये आभीयम् असिद्धम्। अस्यायमाशयः यत् येषां कार्याणां निमित्तं समानम्भवति, तानि समानाश्रयाणि कथ्यन्ते। अतः समानाश्रये यदि द्वितीयम् आभीयकार्यं कर्तव्यं, तर्हि प्रथमम् आभीयकार्यम् असिद्धं भवति। यथा - 'जहि' इत्यत्र 'हन्तेर्जः' - 6 | 4 | 36 तथा 'अतो हेः' - 6 | 4 | 105 इत्येवम् आभीकार्यद्वयं प्राप्नोति। अत्र ''अतो हेः'' इत्यनेन हेः लुकि कर्तव्ये सति ''हन्तेर्जः'' इति सूत्रेण क्रियमाणं कार्यम् असिद्धम्भवति। तस्मात्कारणात् 'हि' इत्यस्य लोपः न भवति।

**रूपसिद्धिः** - **जहि** - हन्धातोर्लोटि, सिपि, तस्य स्थाने हि इत्यादेशेन हन् + हि इति स्थिते, **हन्तेर्जः** इति हन् इत्यस्य स्थाने जादेशे ज + हि इति स्थिते, **अतो हेः** इत्यनेन हेर्लुकि प्राप्ते, **हन्तेर्जः** सूत्रमिदं षष्ठाध्यायचतुर्थपादस्य षट्त्रिंशत्तमं सूत्रम्। अतः **असिद्धवदत्राभावात्** इत्यनेन जादेशस्यासिद्धत्वात् हेर्लुक् न भवति।

**12. पदपरिचयः** - आर्धधातुके (स.ए.व)।

**सूत्रप्रकारः** - अधिकार सूत्रम्।

**14. लुङि च 2 | 4 | 43 ||**

वधादेशोऽदन्तः। आर्धधातुके इति विषयसप्तमी, तेन आर्धधातुकोपदेशे अकारान्तत्वादतो लोपः। वध्यात्। वध्यास्ताम्। आदेशस्यअनेकाच्त्वात् इतीण्निषेधाभावादिट्। अतो हलादेः इति वृद्धौ प्राप्तायाम्।

**15. अचः परस्मिन् पूर्वविधौ 1 | 1 | 57 ||**

परानिमित्तोऽजादेशः स्थानिवत्, स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये। इत्यल्लोपस्य स्थानिवत्त्वान्न वृद्धिः। अवधीत्। अहनिष्यत्। यु मिश्रणामिश्रणयोः ॥ ३॥

**16. उतो वृद्धिर्लुकि हलि 7 | 3 | 89 ||**

लुग्विषये उतो वृद्धिः पिति हलादौ सार्वधातुके, न त्वभ्यस्तस्य। यौति। युतः। युवन्ति। यौषि। युथः। युथ। यौमि। युवः। युमः। युयाव। यविता। यविष्यति। यौतु, युतात्। अयौत्। अयुताम्। अयुवन्। युयात्। इह उतो वृद्धिर्न, भाष्ये पिच्च ङिन्न, ङिच्च पिन्न इति व्याख्यानात्। युयाताम्। युयुः। युयात्। यूयास्ताम्। यूयासः। अयावीत्। अयविष्यत्। या प्रापणे ॥ ४॥ याति॥ यातः। यान्ति। ययौ। यास्यति। यातु। अयात्। अयाताम्।

---

**सरलार्थः** - 'आर्धधातुके' इति सूत्रस्याधिकारः ''ण्यक्षत्रियार्षञितो लुगणिञोः'' (2 | 4 | 42) इति सूत्रपर्यन्तः वर्तते। 'आर्धधातुके' इत्यस्मिन् पदे विषयसप्तमीं स्वीकृत्य आर्धधातुकस्य विषये इत्यर्थः क्रियते, न तु आर्धधातुके परे इति। अतः ''आर्धधातुके'' इत्येतत्सूत्राधिकारे यानि कार्याणि भवन्ति, तानि सर्वाणि आर्धधातुकविषये वा आर्धधातुकविवक्षायां भवन्तीति ज्ञेयम्।

**13. पदपरिचयः** - हनः (ष.ए.व), वध (प्र.ए.व), लिङि (स.ए.व)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - हन् धातोः स्थाने वध इत्यादेशो भवति लिङ्लकारे परे।

**विशेषार्थः** - हन् इति षष्ठयन्तम्, वध लुप्तप्रथमाकम्, लिङि सप्तम्यन्तम्। आर्धधातुके लिङि हन् धातोः स्थाने वधादेशो भवति।

**14. पदपरिचय** - लुङि (स.ए.व), च (अव्य.)

**अनुवृत्तिः** - हनो वध लिङि **(2. 4. 42)** इत्यतः 'हनः', वध च इति अनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - हन् धातोः स्थाने वध इत्यादेशो भवति लुङ्लकारे परे। वधादेशोऽयमदन्तः।

**विशेषार्थः** - लुङ्विषये अपि हन् धातोः स्थाने वधादेशः स्यात्।

**रूपसिद्धिः - अवधीत्** - हन् धातोः लुङि, तिपि, च्लिप्रत्यये, सिजादेशे, **लुङि च** इत्यनेन वधादेशे, अवध् + स् + त् इति जाते, इडागमे, अपृक्तस्य ईडागमे च अवध् + इस् + ईत् इति जाते, **अतो लोपः** इत्यनेन 'वध' **इत्यस्य** अकारस्य लोपे इट इटि इति सकारलोपे, सवर्णदीर्घे ''अवधीत्'' इति रूपं सिद्धम्।

**15. पदपरिचयः** - अचः (ष.ए.व) परस्मिन् (स.ए.व) पूर्वविधौ (स.ए.व)।

**अनुवृतिः** - ''स्थानिवदादेशोऽनल्विधौ'' इत्यस्मात् स्थानिवत्, आदेशः इति पदे अनुवर्तेते।

**विशेषार्थः** - अत्र 'अचः' इति पदम् आवर्तते। एकं पञ्चम्यन्तम्। अपरं षष्ठ्यन्तम्। एवञ्च अचः स्थाने यः आदेशः, सः स्थानिवद्भवति इति सामान्यार्थः लभ्यते। परं निमित्तीकृत्य अचः स्थाने यः आदेशः सः स्थानिवद् भवति, तस्मात् स्थानिभूतात् अचः पूर्वस्य कार्ये कर्तव्ये इत्यर्थः।

**16. पदपरिचयः** - उतः (ष.ए.व), वृद्धिः (प्र.ए.व), लुकि (स.ए.व), हलि (स.ए.व)।

**अनुवृत्तिः** - ''नाभ्यस्तस्याचि पिति सार्वधातुके'' **(7.3.87)** इत्यतः न, अभ्यस्तस्य, पिति, सार्वधातुके इत्येतेषाम् अनुवर्तनम्।

**सूत्रप्रकारः - विधिसूत्रम्।**

**सरलार्थः** - लुग्विषये अकारान्तस्य धातोः स्थाने वृद्धिर्भवति, पिति हलादौ सार्वधातुके प्रत्यये परे, न तु अभ्यस्तस्य।

**विशेषार्थः** - उतः इति षष्ठयन्तम्, वृद्धिः प्रथमान्तम्, लुकि सप्तम्यन्तम्, हलि सप्तम्यन्तम्। सूत्रेऽस्मिन् **अङ्गस्य**

**17. लङः शाकटायनस्यैव 3 | 4 | 111 ||**

आदन्तात्परस्य लङो झेर्जुस् वा स्यात्। अयुः, अयान्। यायात्। यायताम्। यायुः। यायात्। यायास्ताम्। यायासुः। अयासीत्। अयास्यत्। **वा गतिगन्धनयोः** ॥ 5॥ **भा दीप्तौ** ॥ 6॥ **ष्णा शौचे** ॥ **श्रा पाके** ॥ 8॥ **द्रा कुत्सायां गतौ** ॥ 9॥ **प्सा भक्षणे** ॥ 10॥ **रा दाने** ॥ 11॥ **ला आदाने** ॥ 12॥ **दाप् लवने** ॥ 13॥ **पा रक्षणे** ॥ 14॥ **ख्या प्रकथने** ॥ 15॥ अयं सार्वधातुक एव प्रयोक्तव्यः ॥ **विद ज्ञाने** ॥ 16॥

**18. विदो लटो वा 3 | 4 | 83 ||**

वेत्तेर्लटः परस्मैपदानां णलादयो वा स्युः । वेद। विदतुः। विदुः। वेत्थ। विदथुः। विद। वेद। विद्व। विद्म। पक्षे - वेत्ति। वित्तः विदन्ति॥

**19. उष-विद-जागृभ्योऽन्यतरस्याम् 3 | 1 | 38 ||**

एभ्यो लिटि आम् वा स्यात्। विदेरदन्तत्वप्रतिज्ञानादामि न गुणः। विदाञ्चकार, विवेद। वेदिता। वेदिष्यति॥

**20. विदाङ्कुर्वन्त्वित्यन्यतरस्याम् 3 | 1 | 41 ||**

वेत्तेर्लोटि आम् गुणाभावो लोटो लुक्, लोडन्तकरोत्यनुप्रयोगश्च वा निपात्यते पुरुषवचने न विवक्षिते॥

---

इत्यधिक्रियते। उतः इति अङ्गस्य विशेषणं, तेन तदन्तविधिना उदन्तस्य अङ्गस्य इति जायते। 'हलि' इति पदं 'सार्वधातुके' इत्यस्य विशेषणम्, अतः हलादौ सार्वधातुके इत्यर्थः। लुकः विषये अभ्यस्तभिन्नस्य अकारान्ताङ्गस्य वृद्धिः क्रियते हलादौ पित्संज्ञके सार्वधातुके प्रत्यये परे सति। लटि, लोटि, लङि, विधिलिङि च 'तिप्सिप्मिप्' इत्येषु प्रत्ययेषु परतः पूर्वस्य उकारस्य वृद्धिः क्रियते।

**रूपसिद्धिः - यौति**। यु धातोः लटि, तिपि, शपि, शपः लुकि, यु + ति इति जाते, ''उतो वृद्धिर्लुकि हलि'' इति, प्रकृतसूत्रेण अकारस्य वृद्धौ औकारे **''यौति''** इति रूपं सिद्धम्।

**17. पदपरिचयः** - लङः (ष.ए.व), शाकटायनस्य (ष.ए.व), एव (अव्य)।

**अनुवृत्तिः** - अस्मिन् सूत्रे आतः **(3.4.110)** तथा झेर्जुस् **(3.4.108)** इत्येताभ्यां सूत्राभ्याम् 'आतः, झेः, जुस्' इति पदानि अनुवर्तन्ते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - आदन्ताद्धातोः परस्य लङः स्थाने जातस्य झि इत्यस्य स्थाने विकल्पेन जुसादेशो भवति।

**विशेषार्थः** - लङः-षष्ठ्यन्तम्, शाकटायनस्य-षष्ठ्यन्तम्, एव-अव्ययपदम्,। आतः इति धातोः विशेषणम् तदन्तविधिना आदन्तात् धातोः इत्यर्थः लभ्यते। आदन्तात् धातोः लङः झेः स्थाने जुस् आदेशः वा स्यात्। अयम् आदेशः शाकटायनस्य एव। अनेकाल्त्वात् सर्वादेशः।

**रूपसिद्धिः** - ''**अयुः**'' याधातोः लङि झि प्रत्यये, शपि, तस्य लोपे, झेः स्थाने अन्तादेशे प्राप्ते, ''**लङः शाकटायनस्यैव**'' इत्यनेन झि इत्यस्य स्थाने जुसादेशेऽनुबन्धलोपे, अडागमे, अनुबन्धलोपे अया + उस् इति जाते ''**उस्यपदान्तात्**'' इत्यनेन आकारउकारयोः स्थाने पररूपे उकारे, सस्य रुत्वे विसर्गे च अयुः इति रूपं सिद्धम्।

**18. पदपरिचयः** - विदः (प.ए.व), लटः (ष.ए.व), वा (अव्य)।

**अनुवृत्तिः** - परस्मैपदानां णलतुसुस्थलथुसणल्वमाः **(3.4.82)** इत्यस्य अनुवृत्तिः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - विद्धातोः परस्य लटः स्थाने निष्पन्नानां तिबादिनवानां परस्मैपदानां स्थाने णलादयो नव आदेशाः भवन्ति।

**विशेषार्थः** - विदः पञ्चम्यन्तम्, लटः षष्ठयन्तम्, वा-अव्ययपदम्। विद् धातोः अनन्तरं लटः स्थाने आदिष्टानां परस्मैपदप्रत्ययानां स्थाने णलादयः नव विकल्पेन आदेशाः भवन्ति।

**19. पदपरिचयः** - उषविदजागृभ्यः (प.ब.व), अन्यतरस्याम् (स.ब.व)।

**समासः** - उषश्च विदश्च जागा च तेषाम् इति इतरेतरद्वन्द्वः - उषविदजागारः, तेभ्यः उषविदजागृभ्यः।

**21. तनादिकृञ्भ्य उः 3 | 1 | 79 ||**

तनादेः कृञश्च उः प्रत्ययः स्यात्। शपोऽपवादः। गुणः। विदाङ्करोतु॥

**22. अत उत्सार्वधातुके 6 | 4 | 110 ||**

उप्रत्ययान्तस्य कृञोऽत उत्सार्वधातुके क्ङिति। विदाङ्कुरुतात्। विदाङ्कुरुताम्। विदाङ्कुर्वन्तु। विदाङ्कुरु। विदाङ्करवाणि। अवेत्। अवित्ताम्। अविदुः।

---

**अनुवृत्तिः** - कास्प्रत्ययादाममन्त्रे लिटि **(3.1.35)** इत्यतः आम्, लिटि अनयोः अनुवृत्तिः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - उषविदजागृतिभ्यः परस्य लिट्लकारे परे सति आम्प्रत्ययो भवति। आमि प्रत्यये एव परे विद्धातोः अदन्तत्वप्रतिज्ञानाद् उपधागुणो न भवति।

**विशेषार्थः** - उषविदजागृभ्यः इति पञ्चम्यन्तम्, अन्यतरस्यां-सप्तम्यन्तम्। उष् धातोः विद् धातोः तथा जागृ धातोः अनन्तरं यदि लिट् लकारः अस्ति, तर्हि विकल्पेन आम् प्रत्ययः स्यात्।

**रूपसिद्धिः** - **विदाञ्चकार।** विद् धातोः लिटि, प्रकृतसूत्रेण विकल्पेन आम् प्रत्यये, विद् + आम् + लिट् इति जाते आमः आर्धधातुकसंज्ञायां, लघूपधगुणे प्राप्ते, प्रकृतसूत्रेण विदः अदन्तत्वात् **अतो लोपः** इत्यनेन अन्त्याकारस्य लोपे विद् + आम् + लिट् इति जाते, **आमः** इत्यनेन लकारस्य लुकि कृते **''कृञ्चानुप्रयुज्यते लिटि''** इत्यनेन लिट्परके कृधातोः अनुप्रयोगे, विद् + आम्, कृ + लिट् इति जाते, तिपि, णलि, द्वित्वे, अभ्यासकार्ये वृद्धौ, रपरत्वे **विदाञ्चकार** इति रूपम्।

**20. पदपरिचयः** - विदांकुर्वन्तु (क्रियापदम्), इति (अव्य.), अन्यतरस्याम् (स.ए.व)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - विद्धातोः परे लोट्लकारे सति आम्प्रत्ययः, लघूपधगुणस्य अभावः, लोट् इत्यस्य लुक् तथा लोडन्तकरोत्यनुप्रयोगः, इत्थं चत्वारि कार्य्याणि निपातनाद् भवन्ति।

**विशेषार्थः** - विदाङ्कुर्वन्तु इति क्रियापदस्य अनुकरणम्, इति अव्ययपदम्, अन्यतरस्यां सप्तम्यन्तम्। सूत्रस्य प्रवृत्तिः पुरुषवचनयोः अविवक्षायां भवति। सूत्रेणाऽनेन चत्वारि कार्याणि भवन्ति। यथा - लोटि परे विद् धातोः आम् प्रत्ययः। आम् प्रत्ययत्वात् गुणाभावः, आमः लोटः लुक्, लोडन्तकृधातौः अनुप्रयोगः।

**21. पदपरिचयः** - तनादिकृञ्भ्यः (प.ब.व), उः (प्र.ए.व)

**समासः** - तन् आदिः येषां ते तनादयः, तनादयश्च कृञ्च ते तनादिकृञः, तेभ्यः तनादिकृञ्भ्यः इति इतरेतरद्वन्द्वः।

**अनुवृत्तिः** - **कर्तरि शप् (3.1.68)** इत्यतः **कर्तरि**, **सार्वधातुके यक् (3.1.67)** इत्यतः **सार्वधातुके**।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - तनादिगणपठितधातुभ्यः **कृञ्** धातोः च शपम्प्रबाध्य उप्रत्ययो भवति।

**विशेषार्थः** - तनादिगणपठितेभ्यः धातुभ्यः तथा कृञ्धातोः परत्र शपम्प्रबाध्य 'उ' प्रत्ययः विकरणत्वेन विधीयते, सार्वधातुकप्रत्यये परतः।

**रूपसिद्धिः** - **विदाङ्करोतु** - विद्धातोः लोटि, **विदाङ्कुर्वन्त्वित्यन्यतरस्याम्** इति आमि, उपधागुणाऽभावे, लोटो लुकि लोट्परकृञोऽनुप्रयोगे च निपातिते विदाम् + कृ + लोट् इति स्थिते, लोटः स्थाने तिपि, शपि प्राप्ते तम्प्रबाध्य **तनादिकृञ्भ्य** उः इत्यनेन उप्रत्यये, **सार्वधातुकार्धधातुकयोः** इति गुणे, रपरत्वे च कृते उकारस्य गुणे, इकारस्य उत्वे, मस्यानुस्वारे परसवर्णे च विदाङ्करोतु इति। तातङि पक्षे, **अत उत्सार्वधातुके** इति ककारस्य उकारे विदाङ्कुरुतात्। पक्षे वेत्तु वित्तात् इति।

**22. पदपरिचयः** - अतः (ष.ए.व), उत् (प्र.ए.व), सार्वधातुके (स.ए.व)।

**अनुवृत्तिः** - उतश्च प्रत्ययादसंयोगपूर्वात् **(6.4.106)** इत्यतः **उतः**, एवं **प्रत्ययात्, नित्यं करोतेः (6.4.108)** इत्यतः करोतेः, गमहनजनखनघसां लोपः क्ङित्यनङि **(6.4.98)** इत्यतः क्ङिति।

**23. दश्च 8 | 2 | 75 ||**

धातोर्दस्य पदान्तस्य सिपि रुर्वा। अवेः, अवेत्। विद्यात्। विद्याताम्। विद्युः। विद्यात्। विद्यास्ताम्। अवेदीत्। अवेदिष्यत्॥ अस भुवि॥ 17॥ अस्ति॥

**24. श्नसोरल्लोपः 6 | 4 | 110 ||**

श्नस्यास्तेश्चातो लोपः सार्वधातुके क्ङिति। स्तः। सन्ति। असि। स्थः। स्थ। अस्मि। स्वः। स्मः॥

**25. उपसर्गप्रादुर्भ्यामस्तिर्यच्परः 8 | 3 | 87 ||**

उपसर्गेणः प्रादुसश्चास्तेः सस्य षो यकारेऽचि च परे। निष्यात्। प्रनिषन्ति। प्रादुःषन्ति। यच्परः किम् ? अभिस्तः॥

---

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - उप्रत्ययान्तस्य कृञ् धातोः अकारस्य स्थाने अकारः भवति, किति ङिति सार्वधातुके प्रत्यये च परे।

**विशेषार्थः** - अतः षष्ठयन्तम्, उत् प्रथमान्तम्, सार्वधातुके-सप्तम्यन्तम्। उतः इति करोतेः विशेषणम् अतः उप्रत्ययान्तस्य करोतेः इति जायते। उतः प्रत्ययात् अर्थात् उप्रत्ययान्तस्य कृधातोः अत् इत्यस्य स्थाने उत् आदेशः स्यात् सार्वधातुके क्ङिति।

**रूपसिद्धिः** - **विदाङ्कुरुतात्** - विद्धातोः लोटि, तत्स्थाने तिपि, सार्वधातुकसंज्ञात्वात् शपि, तल्लुकि च ''विदाङ्कुर्वन्त्वित्यन्यतरस्याम्'' इत्यनेन आम्प्रत्यये, लघूपधगुणस्याभावे, लोटः लुकि पुनः लोट्लकारपूर्वके कृधातोः अनुप्रयोगे, विदाम् + कृ + लोट् इति जाते, लोटः स्थाने तिबादेशे, सार्वधातुकत्वात् शपि प्राप्ते, तम्प्रबाध्य **''तनादिकृञ्भ्यः उः''** इत्यनेन उप्रत्यये, 'विदाम् + कृ + उ + ति' इति जाते **''एरुः''** इत्यनेन तिप्रत्ययावयवस्य इकारस्य स्थाने उकारे, तातङादेशे च, धातोः गुणे, रपरत्वे च 'विदाङ्कर् + उ + तात्' इति जाते, **''अत उत्सार्वधातुके''** इत्यनेन लकारोत्तरवर्तिनः अस्य उकारादेशे - 'विदाङ्कुरुतात्' इति रूपं साधु।

**23. पदपरिचयः** - दः (प.ए.व), च (अव्य.)।

**अनुवृत्तिः** - **सिपि धातो रुर्वा (8.2.74)** इति संपूर्णम् अनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - धातोः पदान्तस्य दकारस्य स्थाने रुर्वा भवति, सिपि प्रत्यये परे सति।

**विशेषार्थः** - दः इति पञ्चम्यन्तम्, च-अव्ययपदम्। दः इति धातोः विशेषणम्, विशेषणेन तदन्तविधिः। अतः दकारान्तस्य पदसंज्ञकधातोः स्थाने विकल्पेन रुकारादेशः भवति, सिपि परे। अलोऽन्त्यपरिभाषया धातोः अन्त्ये आदेशः।

**रूपसिद्धिः** - **अवेः**। विद् धातोः लङि, सिपि, शपि शप्प्रत्ययस्य लुकि, **इतश्च** इत्यनेन 'सि' इत्यस्य इकारस्य लोपे लघूपधगुणे, अडागमे, अवेद् + स् इति जाते, प्रकृतसूत्रेण विकल्पेन 'रु' इत्यादेशे अपृक्तलोपे च ''अवेः'' इति रूपम्। रुत्वाभावपक्षे **''वाऽवसाने''** इति सूत्रेण दकारस्य स्थाने वैकल्पिकचर्त्वे 'अवेत्-अवेद्' इति रूपे स्तः।

**24. पदपरिचयः** - श्नसोः (ष.द्वि.व), अत् (प्र.ए.व), लोपः (प्र.ए.व)।

**अनुवृत्तिः** - **अत उत् सार्वधातुके (6.4.110)** इत्यतः सार्वधातुके तथा **''गमहनजनखनघसां लोपः क्ङित्यनङि'' (6.4.98)** इत्यतः क्ङिति।

**समासः** - श्नश्च अश्च श्नसौ, तयोः श्नसोः इति इतरेतरद्वन्द्वः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - **श्नम्** इति प्रत्ययस्य, **अस्** धातोश्च अकारस्य लोपो भवति, सार्वधातुके किति ङिति परे।

**विशेषार्थः** - **श्न**सोः इति षष्ठयन्तम्, अल्लोपः-इति प्रथमान्तम्। सार्वधातुके कित्संज्ञके वा ङित्संज्ञके प्रत्यये परतः सति, श्नम्प्रत्ययावयवस्य अकारस्य अथवा अस्धातोः अकारस्य लोपः भवति।

**रूपसिद्धिः** - **स्तः**। अस् धातोः लटि, तसि, **सार्वधातुकमपित्** इत्यनेन तसः ङिद्वद्भावेन, प्रकृतसूत्रेण अस्धातोः अकारस्य लोपे, रुत्वे विसर्गे च **''स्तः''** इति रूपं सिद्ध्यति।

**26. अस्तेर्भूः 2 | 4 | 52 ||**

आर्धधातुके। बभूव। भविता। अस्तु, स्तात्। स्ताम्। सन्तु॥

**27. घ्वसोरेद्धावभ्यासलोपश्च 6 | 3 | 119 ||**

घोरस्तेश्च एत्वं स्याद्धौ परे अभ्यासलोपश्च। एत्वस्यासिद्धत्वाद्धेर्धिः। श्नसोरित्यल्लोपः। तातङ्पक्षे एत्वं न, परेण तातङा बाधात्। एधि स्तात्। स्तम्। स्म। असानि। असाव। असाम। आसीत्। आस्ताम्। आसन्। स्यात्। स्याताम्। स्युः। भूयात्। अभूत्। अभविष्यत्। **इण् गतौ ॥ 18॥** एति। इतः॥

**28. इणो यण् 6 | 4 | 81 ||**

अजादौ प्रत्यये परे। यन्ति॥

**29. अभ्यासस्यासवर्णे 6 | 4 | 78 ||**

अभ्यासस्य इवर्णोवर्णयोर् इयँङवँङौ स्तोऽसवर्णेऽचि। इयाय॥

---

**25. पदपरिचयः** - उपसर्गप्रादुर्भ्याम् (प.द्वि.व), अस्तिः (प्र.ए.व), यच्परः (प्र.ए.व)।

**अनुवृत्तिः - सहे साडः सः (8.3.56)** इत्यतः ''**अपदान्तस्य मूर्धन्यः**'' इत्यस्मात् 'मूर्धन्यः' इति पदमनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - उपसर्गस्थस्य इणः परस्य प्रादुसः सकारस्य अथवा अस् धातोः सकारस्य षकारो भवति यकारे अचि च परे सति।

**विशेषार्थः** - उपसर्गप्रादुर्भ्यां-पञ्चम्यन्तम्, अस्तिः - प्रथमान्तम्, यच्परः - उपसर्गस्थात् इण्प्रत्याहारवर्णात् परत्र अथवा 'प्रादुस्' इत्यव्ययात् परत्र विद्यमानस्य अस्धातोः सकारस्य स्थाने षकारादेशः भवति, यकारे वा अचि परतः।

**26. पदपरिचयः** - अस्तेः (ष.ए.व), भूः (प्र.ए.व)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - **अस्** धातोः स्ताने **भू** इत्यादशो भवति, आर्धधातुके प्रत्यये परे।

**विशेषार्थः** - अस्तेः षष्ठयन्तम्, भूः-प्रथमान्तम्। आर्धधातुके इत्यस्याधिकारः। अतः आर्धधातुकस्य विवक्षायाम् अस् धातोः स्थाने भू आदेशः भवति। अनेकाल्त्वात् अयमादेशः सर्वादेशः भवति।

**रूपसिद्धिः** - **बभूव।** अस् धातोः लिटि, तिपि, प्रकृतसूत्रेण अस् स्थाने भू आदेशे, णलि, द्वित्वे, अभ्यासकार्ये ''**बभूव**'' इति रूपम्।

अभ्यासस्य इवर्णोवर्णयोरियङुवङौ स्तोऽसवर्णेऽचि। इयाय॥

**27. पदपरिचयः** - घ्वसोः (ष.द्वि.व), एत् (प्र.ए.व), हौ (स.ए.व), अभ्यासलोपः (प्र.ए.व), च (अव्य.)।

**समासः** - घुश्च अस् च तयोरितेरतरद्वन्द्वे घ्वसौ, तयोः घ्वसोः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - घुसंज्ञकधातोः, अस् धातोः एत्वाभ्यासलोपौ भवतः, हौ परे।

**विशेषार्थः** - हौ परे घुसंज्ञकधातूनां तथा अस् धातोः स्थाने एकारादेशः भवति। किञ्च अभ्यासस्य लोपः जायते।

**रूपसिद्धिः** - **एधि** - अस्धातोर्लोटि, सिपि, सिपो 'हि' आदेशे, शपि, तस्य लोपे अस् + हि इति जाते '**घ्वसोरेद्धावभ्यासलोपश्च**' इत्यनेन सूत्रेण, सस्य एत्वे प्राप्ते '**असिद्धवदत्राभात्**' इति नियमेन आभीयस्य एत्वस्याऽसिद्धत्वात् '**हुझल्भ्यो हेर्धिः**' इति हेः स्थाने 'धि' इत्यादेशे '**श्नसोरल्लोपः**' इत्यलोपे '**एधि**' इति सिद्धम्।

**28. पदपरिचयः** - इणः (ष.ए.व), यण् (प्र.ए.व)।

**अनुवृत्तिः - अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (6.4.77)** इत्यतः अचि।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - इण् धातोः इकारस्य स्थाने यण् भवति, अजादिप्रत्यये परे।

**विशेषार्थः** - इणः षष्ठयन्तम्, यण्-प्रथमान्तम्। अङ्गस्य इत्यधिक्रियते। ''**अचि श्नुधातुभ्रुवां य्वोरियङुवङौ**'' इत्यस्यापवादभूतं सूत्रमिदम् अजादौ प्रत्यये परे इण् धातोः स्थाने यण् आदेशं शास्ति। आन्तरतम्यात् इकारस्य स्थाने यकारः।

**30. दीर्घ इणः किति 7 | 8 | 61 ||**

इणोऽभ्यासस्य दीर्घः स्यात् किति लिटि। ईयतुः। ईयुः। इययिथ, इयेथ। एता। एष्यति। एतु। ऐत् ऐताम्। आयन्। इयात्।

**31. एतेर्लिङि 7 | 4 | 241 ||**

उपसर्गात्परस्य इणोऽणो ह्रस्वः आर्धधातुके किति लिङि। निरियात्। **उभयत आश्रयणे नान्तादिवत्**। अभीयात्। अणः किम् ? समेयात्॥

**32. इणो गा लुङि 2 | 4 | 45 ||**

गातिस्थेति सिचो लुक्। अगात्। ऐष्यत्॥ **शीङ् स्वप्ने ॥ 11 ॥**

---

**रूपसिद्धिः - यन्ति।** इण् गतौ इति धातोः लटि, बहुवचने झि प्रत्यये, अन्तादेशे, इ + अन्ति इत्यवस्थायाम्, **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** इत्यनेन इयङादेशे प्राप्ते, **इणो यण्** इत्यनेन यणादेशे ''**यन्ति**'' इति रूपम्।

**29. पदपरिचयः** - अभ्यासस्य (ष.ए.व), असवर्णे (स.ए.व)।

**समासः** - न सवर्णः असवर्णः, तस्मिन् असवर्णे।

**अनुवृत्तिः - अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (6.4.77)** इत्यतः अचि, य्वोः, इयङुवङौ इत्येषाम् अनुवृत्तिः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अभ्यासस्य इवर्णस्य स्थाने इयङ् आदेशः, उवर्णस्य स्थाने उवङादेशो भवति, असवर्णे अचि परे।

**विशेषार्थः** - असवर्णे अचि परे, अभ्यासस्य इकारस्य तथा अभ्यासस्य उकारस्य स्थाने क्रमात् इयङ् आदेशः तथा उवङ् आदेशः भवति। अलोऽन्त्यपरिभाषया, ''**यथासंख्यमनुदेशःसमानाम्।**'' परिभाषया च इकारस्य स्थाने इयङ्, उकारस्य स्थाने उवङ् च भवति।

**30. पदपरिचयः** - दीर्घः (प्र.ए.व), इणः (ष.ए.व), किति (स.ए.व)।

**अनुवृत्तिः - अत्र लोपोऽभ्यासस्य (7.4.58)** इत्यतः अभ्यासस्य, एवं **व्यथो लिटि (7.4.68)** इत्यतः लिटि।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - इण् धातोः अभ्यासस्य इकारस्य स्थाने दीर्घो भवति किति लिटि परे।

**विशेषार्थः** - दीर्घः प्रथमान्तम्, इणः षष्ठयन्तम्, किति-सप्तम्यन्तम्। किति लिटि इण् धातोः अभ्यासस्य इकारस्य स्थाने दीर्घः आदेशः स्यात्।

**31. पदपरिचयः** - एतेः (ष.ए.व), लिङि (स.ए.व)।

**अनुवृत्तिः** - '**केऽणः**' **(7.7.13)** इत्यतः अणः, ''**उपसर्गाद्ध्रस्व ऊहतेः**'' **(7.4.23)** इत्यतः उपसर्गात् एवं ह्रस्वः एवम् **अयङ् यि क्ङिति (7.7.13)** इत्यतः क्ङिति।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - उपसर्गात् परत्र विद्यमानस्य इण्धातोः अण्वर्णस्य स्थाने ह्रस्वादेशः भवति, आर्धधातुके कित्संज्ञके लिङ्लकारे परे सति।

**विशेषार्थः** - एतेः षष्ठयन्तम्, लिङि सप्तम्यन्तम्, उपसर्गात् परस्य इण् धातोः अणः ह्रस्वादेशः स्यात्, आर्धधातुके किति लिङि।

**32. पदपरिचयः** - इणः (ष.ए.व), गा (प्र.ए.व), लुङि (स.ए.व)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - इण् धातोः स्थाने 'गा' आदेशो भवति लुङि परे।

**विशेषार्थः** - इणः षष्ठयन्तम्, गा-लुप्तप्रथमाकम्, लुङि वैषयिकं सप्तम्यन्तम्। लुङ्विषये अर्थात् लुङ्विवक्षायां इण् धातोः स्थाने गा आदेशः।

**रूपसिद्धिः - अगात्।** इण् धातोः लुङ्विवक्षायां प्रकृतसूत्रेण इण् धातोः स्थाने गादेशे, लुङि तिपि, अनुबन्धलोपे, च्लि प्रत्यये, सिजादेशे, अडागमे अ + गा + स् + त् इति जाते, गातिस्था...इत्यादि सूत्रेण सिचः लुकि कृते अगात् इति रूपम्।

## ॥ ''अदादिगणे आत्मनेपदिधातूनां वर्णनम्''॥

**33. शीङः सार्वधातुके गुणः 7 | 4 | 21 ||**

क्ङिति चेत्यस्यापवादः । शेते। शयाते॥

**34. शीङो रुट् 7 | 1 | 6 ||**

शीङः परस्य झादेशस्यातो रुडागमः स्यात्। शेरते। शेषे। शयाथे। शेध्वे। शये। शेवहे। शेमहे। शिश्ये। शिश्याते। शिश्यिरे। शयिता। शयिष्यते। शेताम्। शयाताम्। अशेत। अशयाताम्। अशेरत। शयीत। शयीयाताम्। शयीरन्। शयिषीष्ट। अशयिष्ट। अशयिष्यत। **इङ् अध्ययने ॥ 20॥** इङिकावध्युपसर्गतो न व्यभिचरतः। अधीते। अधीयाते। अधीयते॥

**35. गाङ् लिटि 2 | 4 | 49 ||**

इङो गाङ् स्याल्लिटि। अधिजगे। अधिजगाते। अधिजगिरे। अध्येता। अध्येष्यते। अधीताम्। अधीयाताम्। अधीयताम्। अधीष्व। अधीयाथाम्। अधीध्वम्। अध्ययै अध्ययावहै। अध्ययामहै। अध्यैत। अध्यैयाताम्। अध्यैयत। अध्यैथाः। अध्यैयाथाम्। अध्यैध्वम्। अध्यैयि। अध्यैवहि। अध्यैमहि। अधीयीत। अधीयीयाताम्। अधीयीरन्। अध्येषीष्ट॥

---

**33. पदपरिचयः** - शीङः (ष.ए.व), सार्वधातुके (स.ए.व), गुणः (प्र.ए.व)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - शीङ्धातोः गुणो भवति सार्वधातुके प्रत्यये परे।

**विशेषार्थः** - सार्वधातुके प्रत्यये परे सति शीङ्धातोः गुणः भवति। **इको गुणवृद्धी** इति परिभाषया शीङः ईकारस्य स्थाने गुणादेशः।

**रूपसिद्धिः - शेते** - शीङ्धातोरनुबन्धलोपे, लटि, ङित्त्वात् '**अनुदात्तङित्त आत्मनेपदम्**' इत्यात्मनेपदे त प्रत्यये, शपि, तस्य लोपे शी + त इति जाते '**सार्वधातुकार्धधातुकयोः**' इत्यनेन गुणे प्राप्ते, 'क्ङिति च' इति गुणनिषेधे, तम्प्रबाध्य '**शीङःसावर्धातुके गुणः**' इत्यनेन गुणे टेरेत्वे '**शेते**' इति रूपं जातम्।

**34. पदपरिचयः** - शीङः (प.ए.व), रुट् (प्र.ए.व)

**अनुवृत्तिः - झोऽन्तः (7.1.3)** इत्यतः झः, एवम् **अदभ्यस्तात् (7.1.4)** इत्यतः अत्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - शीङ्धातोः परस्य झस्य स्थाने जातस्य 'अत्' इत्यस्य रुडागमो भवति।

**विशेषार्थः** - शीङः परस्य झकारस्य स्थाने आदिष्टस्य अतः अवयवः रुट् भवति।

**साधनिका - शेरते** - शीङ्धातोः लटि, तत्स्थाने प्रथमपुरुष बहुत्वे 'झ' प्रत्यये, ''आत्मनेपदेष्वनतः'' इत्यनेन 'झ्' इत्यस्य स्थाने 'अत्' इत्यादेशे 'शी + अत' इति जाते, ''**शीङो रुट्**'' इति सूत्रेण सार्वधातुके परे, धातोः परत्र विद्यमानस्य 'अत्' इत्यस्य रुडागमे, अनुबन्धलोपे, शी + र् + अत इति जाते, ''**शीङः सार्वधातुके गुणः**'' इत्यनेन धातोः गुणे, टेः एत्वे च - ''शेरते'' इति रूपं सिद्ध्यति।

**35. पदपरिचयः** - गाङ् (प्र.ए.व), लिटि (स.ए.व)

**अनुवृत्तिः - इडश्च (2.4.48)** इत्यतः इङः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - इङ्धातोः स्थाने 'गाङ्' आदेशो भवति लिटि परे सति।

**विशेषार्थः** - गाङ् इति प्रथमान्तम्, लिटि-सप्तम्यन्तम्। लिट्लकारस्य विवक्षायाम् इङ्धातोः स्थाने गाङ् इत्यादेशः भवति।

**साधनिका - अधिजगे** - अध्युपसर्गात् 'इङ् अध्ययने' इति धातोः अनुबन्धलोपे, लिटि, तप्रत्यये तस्य स्थाने एशादेशे '**गाङ् लिटि**' इति गाङ् आदेशेऽनुबन्धलोपे द्वित्वे, अभ्याससंज्ञायां, ह्रस्वे, गकारस्य स्थाने चुत्वेन जकारे अधिजगा + ए इति जाते '**आतो लोप इटि च**' इत्याकारलोपे '**अधिजगे**' इति रूपं जातम्।

**36. विभाषा लुङ्लृङोः 2 | 4 | 50 ||**

इङो गाङ् वा स्यात्॥

**37. गाङ्कुटादिभ्योऽञ्णिन् ङित् 1 | 2 | 1 ||**

गाङादेशात् कुटादिभ्यश्च परेऽञ्णितः प्रत्ययाः ङितः स्युः।

**38. घुमास्थागापाजहातिसां हलि 6 | 4 | 66 ||**

एषामात ईत्स्याद्धलादौ क्ङित्यार्धधातुके। अध्यगीष्ट, अध्यैष्ट। अध्यगीष्यत, अध्यैष्यत॥ **दुह प्रपूरणे ॥ २१॥** दोग्धि। दुग्धः। दुहन्ति। धोक्षि। धुग्धे। दुहाते। दुहते। धुक्षे। दुहाथे। दुग्ध्वे। दुहे। दुह्वहे। दुह्महे। दुदोह, दुदुहे। दोग्धासि, दोग्धासे। धोक्ष्यति, धोक्ष्यते। दोग्धु, दुग्धात्। दुग्धाम्। दुहन्तु। दुग्धि, दुग्धात्। दुग्धम्। दुग्ध। दोहानि। दोहाव। दोहाम। दुग्धाम्। दुहाताम्। दुहताम्। धुक्ष्व। दुहाथाम्। धुग्ध्वम्। दोहै। दोहावहै। दोहामहै। अधोक्। अदुग्धाम्। अदुहन्। अदोहम्। अदुग्ध। अदुहाताम्। अदुहत। अधुग्ध्वम्। दुह्यात्, दुहीत॥

**39. लिङ्सिचावात्मनेपदेषु 1 | 2 | 11 ||**

इक्समीपाद्धलः परौ झलादी लिङ्सिचौ कितौ स्तस्तङि। धुक्षीष्ट॥

---

**36. पदपरिचयः** - विभाषा (प्र.ए.व), लुङ्लृङोः (स.द्वि.व)।

**समासः** - लुङ् च लृङ् च लुङ्लृङौ, तयोः लुङ्लृङोः इति इतरेतरद्वन्द्वः।

**अनुवृत्तिः - इङश्च (2.4.48)** इत्यतः इङ्, **गाङ् लिटि (2.4.49)** इत्यतः गाङ्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - इङ् इत्यस्य स्थाने विकल्पेन 'गाङ्' आदेशो भवति लुङ्लृङोः परयोः।

**विशेषार्थः** - लुङ् अथवा लृङ् इत्यनयोः विवक्षायाम् इङ् धातोः स्थाने विकल्पेन गाङ् आदेशः भवति।

**37. पदपरिचयः** - गाङ्कुटादिभ्यः (प.ब.व) अञ्णित् (प्र.ए.व), ङित् (प्र.ए.व)।

**समासः** - कुट आदिर्येषां ते कुटादयः, बहुव्रीहिः। गाङ्च कुटादयश्च ते गाङ्कुटादयः, तेभ्यः गाङ्कुटादिभ्यः। ञ् च ण् च तयोरितरेतरद्वन्द्वः ञ्णौ, ञ्णौ इतौ यस्य स ञ्णित् बहुव्रीहिः। न ञ्णित् अञ्णित्, इति द्वन्द्वगर्भः बहुव्रीहिः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - गाङ्धातोः, कुटादिभ्यो धातुभ्यः परे ञिद्भिन्ना णिद्भिन्नाः प्रत्ययाः ङितः स्युः।

**विशेषार्थः** - गाड्कुटादिभ्यः अर्थात् गाङ् आदेशात् कुटादिभ्यश्च धातुभ्यः परत्र विद्यमानाः अञ्णित् अर्थात् ञिद्भिन्नाः, णिद्भिन्नाश्च प्रत्ययाः ङिद्वद् भवन्ति।

**38. पदपरिचयः** - घुमास्थागापाजहातिसां (ष.ब.व), हलि (स.ए.व)।

**सूत्रसमासः** - घुश्च माश्च स्थाश्च गाश्च पाश्च जहातिश्च साश्च तेषाम् इतरेतरद्वन्द्वः घुमास्थागापाजहातिसः, तेषां घुमास्थागापाजहातिसाम्।

**अनुवृत्तिः - दीङो युडचि क्ङिति (6.4.63)** इत्यतः क्ङिति, **आतो लोप इटि च (6.4.64)** इत्यतः आतः एवम् **ईद्यति (6.4.65)** इत्यतः ईत् इत्येषाम् अनुवृत्तिः भवति।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - घुसंज्ञकधातुः, माधातुः, स्थाधातुः, गाधातुः, पाधातुः, हा (ओहाक्) धातुः, सा (षो) धातुः इत्येतेषां धातूनाम् आकारस्य स्थाने ईकारादेशः भवति, हलादौ कित्संज्ञके वा ङित्संझके आर्धधातुकप्रत्यये परतः।

**विशेषार्थः** - घुमास्थागापाजहातिसाम् इति षष्ठयन्तम्, हलि इति सप्तम्यन्तम्। घुसंज्ञकधातूनां तथा मा, स्था, गा, पा, ओहाक्, सा इत्येतेषां धातूनां च आकारस्य स्थाने ईकारादेशः स्यात्, हलादौ क्ङिति आर्धधातुके।

**40. शल इगुपधादनिटः क्सः 3 | 4 | 45 ||**

इगुपधो यः शलन्तस्तस्मादनिटःच्लेः क्सादेशः स्यात्। अधुक्षत्॥

**41. लुग्वा दुह-दिह-लिह-गुहामात्पनेपदे दन्त्ये 7 | 3 | 73 ||**

एषां क्सस्य लुग्वा स्याद्दन्त्ये तङि। अदुग्ध, अधुक्षत।

**42. क्सस्याचि 7 | 3 | 72 ||**

अजादौ तङि क्सस्य लोपः। अधुक्षताम्। अधुक्षन्त। अदुग्धाः, अधुक्षथाः। अधुक्षाथाम्। अधुग्ध्वम्, अधुक्षध्वम्। अधुक्षि। अदुह्वहि, अधुक्षावहि। अधुक्षामहि। अधोक्ष्यत॥ एवं **दिह उपचये ॥२२॥ लिह आस्वादने॥२३॥** लेढि। लीढः लिहन्ति। लेक्षि। लीढे। लिहाते। लिहते। लिक्षे। लिहाथे। लिढ्वे। लिलेह, लिलिहे। लेढासि, लेढासे। लेक्ष्यति, लेक्ष्यते। लेढु, लिढाम्। लिहन्तु। लेढि। लेहानि। लीढाम्। अलेट्, अलेड्। अलिक्षत्, अलीढ, अलिक्षत। अलेक्ष्यत् अलेक्षत॥ **ब्रूञ् व्यक्तायां वाचि ॥२४॥**

---

**रूपसिद्धिः - अध्यगीष्ट** - अध्युपसर्गपूर्वात् 'इङ्' धातोः लुङलकारे ''**विभाषा लुङ्लृङोः**'' इत्यनेन विकल्पेन गाङ् आदेशे, अनुबन्धलोपे 'गा + लुङ्' इति जाते, अडागमेऽनुबन्धलोपे च अधि + अ + गा + लुङ् इति जाते, लुङः स्थाने प्रथमपुरुषैकवचनविक्षायां 'त' प्रत्ययादेशे, 'अधि + गा + त' इति जाते, ''**च्लि लुङि**'' इत्यनेन च्लिप्रत्यये, ''**च्लेः सिच्**'' इत्यनेन सिजादेशेऽनुबन्धलोपे च 'अधि + अ + गा + स् + त' इति जाते, अत्र 'गा' इत्यस्मात्परत्र ञिद्भिन्नः णिद्भिन्नश्च सिचः सकारो विद्यते, अतः ''**गाङ्कुटादिभ्योऽञ्णिन् ङित्**'' इत्यनेन सकारस्य ङिद्वद्भावे ''**घुमास्थागापाजहातिसां हलि**'' इति सूत्रेण 'गा' धातोः आकारस्य स्थाने ईकारादेशे 'अधि + अ + गी + स् + त' इति जाते, सकारस्य षत्वे, तकारस्य च ष्टुत्वे यणादेशे - 'अध्यगीष्ट' इति रूपं निष्पद्यते। गाङ्आदेशाऽभावे - 'अध्यैष्ट' इति रूपं भवति।

**39. पदपरिचयः** - लिङ्सिचौ (प्र.द्वि.व), आत्मनेपदेषु (स.ब.व)।

**सूत्रसमासः** - लिङ् च सिच् च लिङ्सिचौ इतरेतरद्वन्द्वः।

**अनुवृत्तिः - इको झल् (1.2.9)** इत्यतः झल्, **हलन्ताच्च (1.2.10)** इत्यतः हलन्तात्, **असंयोगाल्लिट् कित् (1.2.5)** इत्यतः कित् इत्यनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - इक्प्रत्याहारसमीपस्थः यः हल्वर्णः तस्मात् परत्र झलादिः लिङ्लकारः तथा इकः समीपात् हलन्तात् झलादिलिङः सिचश्च किद्वद् भवति, आत्मनेपदेषु तङ्प्रत्ययेषु सत्सु सिजादेशः कित्संज्ञां प्राप्नोति, तङ्प्रत्यये परे सति।

**विशेषार्थः** - लिङ्सिचौ इति प्रथमान्तम्, आत्मनेपदेषु इति सप्तम्यन्तम्।

**साधनिका - धुक्षीष्ट।** दुह्धातोः आशीर्लिङि, तप्रत्यये ''**लिङः सीयुट्**'' इत्यनेन सीयुडागमेऽनुबन्धलोपे ''**सुट्तिथोः**'' इत्यनेन सुडागमेऽनुबन्धलोपे 'दुह् + सीय् + स् + त' इति जाते, प्रकृतसूत्रेण किद्वद्भावे, हकारस्य घत्वे, **घकाररस्य** जश्त्वेन गकारे, दकारस्य **भष्त्वेन** धकारे, गकारस्य चर्त्वेन ककारे, सस्य षत्वे, यलोपे, ष्टुत्वे च 'धुक्षीष्ट' इति रूपं सिद्धम्।

**40. पदपरिचयः** - शलः (प.ए.व), इगुपधाद् (प.ए.व), अनिटः (ष.ए.व), क्सः (प्र.ए.व)।

**समासः** - इक् उपधा यस्य स इगुपधः, तस्मात् इगुपधात्, बहुव्रीहिः।

**अनुवृत्तिः - च्लेः सिच् (3.1.44)** इत्यतः च्लेः, **धातोरेकाचो हलादेः क्रियासमभिहारे यङ् (3.1.22)** इत्यतः धातोः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - इगुपधात् शलन्ताद् धातोः परस्य अनिटश्च्लेः क्सादेशो भवति।

**विशेषार्थः** - यस्य धातोः उपधासंज्ञावर्णः इक्प्रत्याहारस्थः भवति, सः इगुपधः उच्यते। सः इगुपधधातुः शल्प्रत्याहारान्तः यदि वर्तते, तर्हि ततः परत्र इडागमरहितस्य च्लेः स्थाने 'क्सादेशः' भवति।

**43. ब्रुवः पञ्चानामादित आहो ब्रुवः 3 | 4 | 84 ||**

ब्रुवो लटस्तिबादीनां पञ्चानां णलादयः पञ्च वा स्युर्ब्रुवश्चाहादेशः। आह। आहतुः। आहुः॥

**44. आहस्थः 8 | 2 | 35 ||**

झलि परे। चर्त्वम्। आत्थ। आहथुः॥

**45. ब्रुव ईट् 7 | 3 | 93 ||**

ब्रुवः परस्य हलादेः पित ईट् स्यात्। ब्रवीति। ब्रूतः। ब्रुवन्ति। ब्रूते। ब्रुवाते। ब्रुवते।

---

**रूपसिद्धिः - अधुक्षत् - दुह** - प्रपूरणे धातोरनुबन्धलोपे लुङि, तिपि, अडागमे, शपम्प्रबाध्य च्लौ, तस्य स्थाने **''शल इगुपधादनिटः क्सः''** इत्यनेन च्लेः स्थाने क्सादेशे, अनुबन्धलोपे अदुह् + स + ति इति जाते **'दादेर्धातोर्घः'** इति हस्य घत्वे, **'एकाचो बशो भष् झषन्तस्य स्ध्वोः'** इति दकारस्य धकारे जश्त्वेन चर्त्वेन ककारे षत्वे **''अधुक्षत्''** इति रूपं सिद्धम्।

**41. पदपरिचयः** - लुक् (प्र.ए.व), वा (अव्य.), दुहदिहलिहगुहाम् (ष.ब.व), आत्मनेपदे (स.ए.व), दन्त्ये (स.ए.व)।

**सूत्रसमासः** - दुह् च दिह् च लिह् च गुह् च दुहदिहलिहगुहः, तेषां दुहदिहलिहगुहाम् इति इतरेतरद्वन्द्वः।

**अनुवृत्तिः - क्सस्याचि (7.3.72)** इत्यतः क्सस्य।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - दुह् दिह् लिह् गुह् इत्येषां चतुर्णां धातूनां परस्य क्सस्य लुग्वा स्याद् दन्त्यादितङ्प्रत्याहारे परे।

**विशेषार्थः** - लुक् प्रथमान्तम्, वा-अव्ययपदम्, दुहदिहलिहगुहां-षष्यन्तम्, आत्मनेपदे-सप्तम्यन्तम्, दन्त्ये सप्तम्यन्तम्। दुहदिहलिहगुहां धातूनां परत्र तङ्प्रत्याद्वारे न सर्वे प्रत्ययाः दन्त्र्यादयः अतः दन्त्यादिः इतिविशेषक्सप्रत्ययस्य विकल्पेन लुक् भवति, दन्त्यादौ तङ्प्रत्याहारे सति।

**42. पदपरिचयः** - क्सस्य (ष.ए.व), अचि (स.ए.व)।

**अनुवृत्तिः - घोर्लोपो लेटि वा (7.2.70)** इत्यतः लोपः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अजादौ तङ्प्रत्याहारे परे क्सस्य लोपो भवति। **'अलोऽन्त्यस्य'** इति नियमेन क्सस्य अकारस्य लोपो भवति।

**विशेषार्थः** - क्सस्य इति षष्ठयन्तम्, अचि इति सप्तम्यन्तम्। यदि क्सप्रत्ययात् अनन्तरम् अजादितङ्प्रत्ययः अस्ति तर्हि क्सप्रत्ययस्य लोपः स्यात्। **अलोऽन्त्यस्य** इत्यनेन लोपकार्यम् अन्त्यस्य अलः भवति।

**साधनिका - अधुक्षाताम्** - दुह्धातोः लुङि प्रथमपुरुष द्विवचने 'अदुह् + स + आताम्' इति स्थिते, अत्र अजादिः तङ्प्रत्ययः 'आताम्' इत्यस्ति। अतः **''क्सस्याचि''** इति सूत्रेण सकारोत्तरवर्तिनः अकारस्य लोपे 'अदुह् + स् + आताम्' इति जाते, घत्वे, भष्त्वे, जश्त्वे चर्त्वे, षत्वे, क्षत्वे च 'अधुक्षाताम्' इति रूपं सिद्ध्यति।

**43. पदपरिचयः** - ब्रुवः (प.ए.व), पञ्चानाम् (ष.ब.व), आदितः (अव्य.), आह (प्र.ए.व), ब्रुवः (ष.ए.व)।

**अनुवृत्तिः - विदो लटो वा (3.4.83)** इत्यतः लटः, एवं वा, **परस्मैपदानां णलतुसुस्थलथुसणल्वमाः (3.4.82)** इत्यतः परस्मैपदानाम् इति पदद्वयम् अनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - 'ब्रू' धातोः स्थाने भूतानाम् 'तिप् तस् झि सिप् थस्' इत्येषां पञ्चानां स्थाने यथाक्रमं णलादयः आदेशाः भवन्ति।

**विशेषार्थः** - ब्रू धातोः अनन्तरं लट्स्थाने आदिष्टानां परस्मैपदसंज्ञकानाम् आदितः पञ्चानां पञ्चप्रत्ययानां स्थाने, णल्, अतुस्, उस्, थल्, अथुस्, इमे पञ्च आदेशाः क्रमशः विकल्पेन भवन्ति। तथा ब्रूधातोः स्थाने आहादेशः अपि भवति।

**44. पदपरिचयः** - आहः (ष.ए.व), थः (प्र.एव.)।

**46. ब्रुवो वचिः 2 | 4 | 53 ॥**

आर्धधातुके। उवाच। ऊचतुः। ऊचुः। उवचिथ, उवक्थ। ऊचे। वक्तासि, वक्तासे। वक्ष्यति, वक्ष्यते। ब्रवीतु, ब्रूतात्। ब्रुवन्तु। ब्रूहि। ब्रवाणि। ब्रूताम्। ब्रवै। अब्रवीत्, अब्रूत। ब्रूयात्, ब्रुवीत। उच्यात्, वक्षीष्ट॥

**47. अस्यतिवक्तिख्यातिभ्योऽङ् 3 | 1 | 52 ॥**

एभ्यश्च्लेरङ् स्यात्॥

**48. वच उम् 7 | 4 | 20 ॥**

अङि परे। अवोचत्, अवोचत। अवक्ष्यत्, अवक्ष्यत। **( ग.सू. ) चर्करीतं च।** चर्करीतमिति यङ्लुगन्तस्य संज्ञा, तददादौ बोध्यम् ॥ **ऊर्णुञ् आच्छादने ॥ 25॥**

---

**अनुवृत्तिः** - **झलो झलि (8.2.26)** इत्यतः झलि।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - 'ब्रू' धातोः स्थाने 'ब्रुवः पञ्चानाम्.....' इत्यादिना कृतस्य 'आह' इत्यादेशस्य हकारस्य स्थाने थकारदेशो भवति झलि परे।

**विशेषार्थः** - झलि परे सति आहः इत्यादेशस्य हकारस्य स्थाने थ आदेशः भवति। अलोऽन्त्यपरिभाषया अयं थकारादेशः अन्त्यस्य हकारस्य स्थाने स्यात्।

**45. पदपरिचयः** - ब्रुवः (प.ए.व), ईट् (प्र.ए.व)।

**अनुवृत्तिः** - **उतो वृद्धिर्लुकि हलि (7.3.19)** इत्यतः हलि, एवं **नाभ्यस्तस्याचि पिति सार्वधातुके (7.3.87)** इत्यतः पिति एवं सार्वधातुके इति पदे अनुवर्तेते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - 'ब्रू' इति धातोः परस्य हलादेः पितः ईडागमो भवति।

**विशेषार्थः** - ब्रूधातोः अनन्तरं हलादेः पित्सार्वधातुकस्य ईडागमः भवति। टित्त्वात् आद्यवयवः स्यात्।

**रूपसिद्धिः** - **ब्रवीति** - ब्रूधातोः लटि, तिबादेशेऽनुबन्धलोपे, ब्रू + ति इति जाते, ''बुव ईट्'' इत्यनेन ईडागमेऽनुबन्धलोपे, ब्रू + ईति इति जाते, सार्वधातुकगुणे 'ब्रो + ईति' इति जाते, ओकारस्य स्थाने अवादेशे 'ब्रवीति' इति रूपं सिद्ध्यति।

**46. पदपरिचयः** - ब्रुवः (ष.ए.व), वचिः (प्र.ए.व)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - ब्रूधातोः स्थाने 'वच्' इति आदेशो भवति, आर्धधातुकप्रत्यये परे।

**विशेषार्थः** - ब्रुवः इति षष्ठयन्तम्, वचि प्रथमान्तम्। आर्धधातुकविवक्षायां ब्रू इत्यस्य स्थाने वच् आदेशः स्यात् अनेकाल्त्वात् सर्वादेशः।

**रूपसिद्धिः** - **उवाच** - ब्रूधातोर्लिटि तिपि, तिपो णलादेशे, अनुबन्धलोपे **'ब्रुवो वचिः'** इति वचादेशे, द्वित्वे, अभ्याससंज्ञायां, हलादिशेषे, ववच् + अ इति जाते **'लिट्यभ्यासस्योभयेषाम्'** इत्ययेन वस्य सम्प्रसारणे, पूर्वरूपे, उपधावृद्धौ सत्याम् 'उवाच' इति रूपं सिद्धम्।

**47. पदपरिचयः** - अस्यतिवक्तिख्यातिभ्यः (प.ब.व), अङ् (प्र.ए.व.)।

**समासः** - अस्यतिश्च वक्तिश्च ख्यातिश्च तेषामितरेतरयोगद्वन्द्वः अस्यतिवक्तिख्यातयः, तेभ्यः अस्यतिवक्तिख्यातिभ्यः।

**अनुवृत्तिः** - **च्लेः सिच् (3.1.44)** इत्यतः च्लेः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अस् वच् ख्या इति त्रिभ्यो धातुभ्यः परस्य च्लेः स्थाने अङादेशो भवति।

**विशेषार्थः** - अस्यतिवक्तिख्यातिभ्यः इति पञ्चम्यन्तम्, अङ् प्रथमान्तम्। वच् धातोः, ख्या धातोः. अस् धातोः अनन्तरं

**49. ऊर्णोतेर्विभाषा 7 | 3 | 90 ||**

वा वृद्धिः स्याद् हलादौ पिति सार्वधातुके। ऊर्णौति, उर्णोति। ऊर्णुतः, ऊर्णुवन्ति। ऊर्णुते। ऊर्णुवाते। ऊर्णुवते। वार्तिकम्-**उर्णोतेराम्नेति वाच्यम्।**

**50. न न्द्राः संयोगादयः 3 | 1 | 52 ||**

अचः पराः संयोगादयो नदरा द्विर्न भवन्ति। नु शब्दस्य द्वित्वम्। ऊर्णुनाव। ऊर्णुनुवतुः। ऊर्णुनुवुः।

**51. विभाषोर्णोः 7 | 4 | 20 ||**

इडादिप्रत्ययो वा ङित्स्यात्। ऊर्णुनुविथ, ऊर्णुनविथ। ऊर्णुविता, ऊर्णविता। ऊर्णुविष्यति, ऊर्णविष्यति। ऊर्णौतु, ऊर्णोतु। ऊर्णवानि। ऊर्णवै॥

---

विद्यमानस्य च्लिप्रत्ययस्य स्थाने अङादेशः भवति।

**48. पदपरिचयः** - वचः (ष.ए.व), उम् (प्र.ए.व)।

**अनुवृत्तिः** - **ऋदृशोऽङि गुणः (7.4.16),** इत्यतः अङि।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - 'वच्' इत्यस्य उमागमो भवति अङि परे।

**रूपसिद्धिः** - **अवोचत्** - ब्रूधातोः लुङ्लकारे अनुबन्धलोपे, अडागमे, शपम्प्रबाध्य च्लौ '**अस्यतिवक्तिख्यातिभ्योऽङ्**' इति च्लेः स्थाने अङादेशे '**ब्रुवो वचिः**' इति वचादेशे, तिपः इकारलोपे '**मिदचोऽन्त्यात्परः**' इति परिभाषासहकारेण '**वच उम्**' इत्यनेन उमागमे '**आद्गुणः**' इत्यनेन आकारउकारयोः स्थाने गुणे ''**अवोचत्**'' इति रूपं सिद्धम्।

**49. पदपरिचयः** - ऊर्णोतेः (ष.ए.व), विभाषा (प्र.ए.व)।

**अनुवृत्तिः** - **उतो वृद्धिर्लुकि हलि (7.3.89)** इत्यतः वृद्धिः, हलि, इति पदे अनुवर्तेते, **नाभ्यस्तस्याचि पिति सार्वधातुके (7.3.87)** इत्यतः पिति, सार्वधातुके।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - ऊर्ण्धातोः उकारस्य स्थाने विकल्पेन वृद्धिर्भवति, हलादौ पिति सार्वधातुके परे। (वार्तिकम्) ऊर्णुञ् - धातोः आम् प्रत्ययः न भवति।

**विशेषार्थः** - ऊर्ण् धातोः स्थाने विकल्पेन वृद्धिः स्यात् हलादौ पिति सार्वधातुके परे।

**50. पदपरिचयः** - न (अव्य.), न्द्राः (प्र.ब.व), संयोगादयः (प्र.ब.व.)।

**सूत्रसमासः** - न् च द् च रश्च तेषामितरेतरद्वन्द्वः न्द्राः।

**अनुवृत्तिः** - **अजादेः द्वितीयस्य (6.1.2)** इत्यतः अजादेः, **एकाचो द्वे प्रथमस्य (6.1.1)** इत्यतः द्वे।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अचः परेषां संयोगादीनां नकारदकाररेफाणामिति त्रयाणां द्वित्वं न भवति।

**विशेषार्थः** - अच्चासौ आदिश्च अजादिः। तस्मात् अजादेः इत्यत्र पूर्वसूत्रे कर्मधारयसमासः प्रदर्शितः। अजादेः संयोगादयः न्द्राः द्वित्वं न प्राप्नुवन्ति।

**रूपसिद्धिः** - **ऊर्णुनाव** - ऊर्णुधातोर्लिटि, तिपि, तिपो णलादेशे ऊर्णु + अ इति स्थिते अनेकाच्त्वात् '**कास्यनेकाच.....**' इत्यादिना आम्प्रत्यये प्राप्ते '**ऊर्णोतेराम्नेति वाच्यम्**' इति निषेधे '**अजादेर्द्विद्वितीयस्य**' इति नियमेन 'र्णु' इत्यस्य द्वित्वे प्राप्ते '**न न्द्राः संयोगादयः**' इति रेफस्य द्वित्वाभावे णत्वस्याऽसिद्धत्वात् 'नु' शब्दस्य द्वित्त्वे '**रषाभ्यां नो णः समानपदे**' इत्यनेन प्रथमनकारस्य णत्वे वृद्धौ आवादेशे 'ऊर्णुनाव' इति रूपं सिद्धम्।

**51. पदपरिचयः** - विभाषा (प्र.ए.व), ऊर्णोः (ष.ए.व)।

**अनुवृत्तिः** - **विज इट् (1.2.2),** इत्यतः इट्, **गाङ्कुटादिभ्योऽञ्णिन्ङित् (1.2.1),** इत्यतः ङित्।

**52. गुणोऽपृक्ते 7 | 3 | 91 ॥**

ऊर्णोतेः गुणोऽपृक्ते हलादौ पिति सार्वधातुके। वृद्ध्यपवादः। और्णोत्। और्णोः। ऊर्णुयात्। ऊर्णुयाः। ऊर्णुवीत। ऊर्णूयात्। ऊर्णुविषीष्ट, ऊर्णविषीष्ट॥

**53. ऊर्णोतेर्विभाषा 7 | 2 | 6 ॥**

इडादौ सिचि वा वृद्धिः परस्मैपदे परे। पक्षे गुणः। और्णावीत्, और्णुवीत्। और्णवीत्, और्णाविष्टाम्, और्णुविष्टाम्। और्णविष्टाम्। और्णुविष्ट, और्णाविष्ट। और्णुविष्यत्, और्णुविष्यत। और्णविष्यत॥

---

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – ऊर्णुधातोः परः इडादिप्रत्ययो विकल्पेन ङिद्वद् भवति।

**विशेषार्थः** – ऊर्णोः अर्थात् ऊर्णु धातोः अनन्तरम् इडादिप्रत्ययः विकल्पेन ङिद्वत् स्यात्।

**52. पदपरिचयः** – गुणः (प्र.ए.व), अपृक्ते (स.ए.व)।

**अनुवृत्तिः** – **उतो वृद्धिर्लुकि हलि (7.3.89)** इत्यतः हलि, **नाभ्यस्तस्याचि पिति सार्वधातुके (7.3.87)** इत्यतः पिति, सार्वधातुके एवं **ऊर्णोतेर्विभाषा** इत्यतः ऊर्णोतेः।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – ऊर्णधातोः गुणो भवति, अपृक्ते सार्वधातुके हलादौ पिति परे।

**विशेषार्थः** – गुणः इति प्रथमान्तम्, अपृक्ते इति सप्तम्यन्तम्। ऊर्णुधातोः स्थाने गुणः स्यात् अपृक्ते हलादौ पिति सार्वधातुक परे।

**रूपसिद्धिः** – **और्णोत्।** ऊर्णुधातोः लङि, तिपि, शपि, शब्लुकि, **इतश्च** इति इकारलोपे ऊर्णु + त् इति जाते, **ऊर्णोतेर्विभाषा** इत्यनेन सूत्रेण विकल्पेन वृद्धौ प्राप्तायाम्, ताम् प्रबाध्य प्रकृतसूत्रेण गुणे, आडागमे, **आटश्च** इति वृद्धौ ''और्णोत्'' इति रूपम्।

**53. पदपरिचयः** – ऊर्णोतेः (ष.ए.व), विभाषा (प्र.ए.व.)।

**अनुवृत्तिः** – **सिचि वृद्धिः परस्मैपदेषु (7.2.1)** इति सम्पूर्णसूत्रम् अनुवर्तते। एवं **नेटि (7.2.4)** इत्यतः इटि।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – ऊर्णुधातोः परे इडादौ, सिचि परस्मैपदे परे वा वृद्धिर्भवति।

**विशेषार्थः** – ऊर्णोतेः षष्ठयन्तम्, विभाषा प्रथमान्तम्। परस्मैपदेषु इडादौ सिचि ऊर्णुधातोः विकल्पेन वृद्धिः भवति। कदा ? तर्हि उच्यते यदा ऊर्णुधातोः परत्र तादृशः इडादिः सिच्प्रत्ययः भवेत्, यस्य इडादेः सिचः परत्र अपि परस्मैपदसंज्ञकः प्रत्ययः स्यात्।

**रूपसिद्धिः** – **और्णावीत्** – ऊर्णुधातोर्लुङि, तिपि, अनुबन्धलोपे, आडागमे **'आटश्च'** इति आकारऊकारयोः स्थाने औकारे वृद्धिरेकादेशे, शपम्प्रबाध्य च्लौ, तस्य स्थाने सिचि, अनुबन्धलोपे, इडागमे, ईडागमे, च सिचः सस्य लोपे, सवर्णदीर्घे, गुणे प्राप्ते, **'ऊर्णोतेर्विभाषा'** इत्यनेन ऊकारस्य वृद्धौ, आवादेशे ''और्णावीत्'' इति रूपं सिद्धम्॥

**स्वाध्यायः**

**1. योग्यविकल्पं चित्वा उत्तरं लिखत।**

(1) अदिप्रभृतिभ्यः शपः किं स्यात् ?

(क) लुक् स्यात् (ख) वृद्धिः स्यात् (ग) लोपः स्यात् (घ) एकमपि न

(2) शासिवसिघसीनाञ्च इत्यनेन किं भवति ?

(क) चर्त्वम् (ख) ढत्वम् (ग) सस्य षः (घ) घस्लृ आदेशः

(3) अद भक्षणे धातोः लङि प्रथमपुरुषैकवचने रूपम् किम् ?

(क) आदत् (ख) अत्तः (ग) जघास (घ) अत्तात्

(4) जघनिथ इत्यत्र कुत्वविधायकं सूत्रम् ?

(क) हन्तेर्जः (ख) अभ्यासाच्च (ग) अदः सर्वेषाम् (घ) आर्धधातुके

(5) लङः शाकटायानस्यैव इत्यनेन किं स्यात् ?

(क) वधादेशः (ख) झेर्जुस् (ग) हेर्धिः (घ) एकमपि न

(6) अस्-भुवि धातोः लङि प्रथमपुरुषैकवचने किं रूपं भवति ?

(क) आसीत् (ख) अभूत् (ग) अभवत् (घ) एषु एकमपि न

(7) अजादौ प्रत्यये परे इणः किं स्यात् ?

(क) ए स्यात् (ख) यण् स्यात् (ग) अ स्यात् (घ) वृद्धिः स्यात्

(8) तनादिकृञ्भ्यः उः इति कस्यापवादः ?

(क) णलः (ख) तिपः (ग) गुणस्य (घ) शपः

(9) आहस्थः इति सूत्रस्य किं कार्यम् ?

(क) हकारस्य तकारः (ख) हकारस्य थकारः (ग) आहादेशः (घ) एषु एकमपि न

(10) और्णोत् इत्यत्र केन गुणः ?

(क) आद् गुणः (ख) गुणोऽपृक्ते

(ग) सार्वधातुकार्धधातुकयोः (घ) ओर्गुणः

**2. संक्षिप्तमुत्तरं प्रदेयम्।**

(1) अद् धातोः लटि किं रूपम् ?

(2) लिट्यन्यतरस्याम् इत्यस्य कोऽर्थः ?

(3) हतः इत्यस्य धातुं प्रत्ययं च लिखत।

(4) विद् धातोः लटि णलादिपक्षे किं रूपम् ?

(5) श्नसोरल्लोपः इत्यस्य किम् उदाहरणम् ?

(6) आर्धधातुके प्रत्यये परे अस् धातोः स्थाने कः आदेशः ?

(7) शीङो रुट् इति सूत्रं किं करोति ?

(8) दुह् धातोः कोऽर्थः ?

(9) ब्रवीति इत्यत्र केन ईडागमः भवति ?

(10) अवोचत् इति रूपं कस्य लकारस्य ?

**3. सविस्तरमुत्तरं लिखत।**

(1) अद् धातोः लिट्लकारे वैकल्पिकं घस्लृ-आदेशपक्षं तद् अभावपक्षं च सूत्रनिर्देशपुरस्सरं प्रतिपादयत।

(2) केषु केषु लकारेषु अस् धातोः स्थाने भू इत्यादेशो भवति ? तल्लिखत।

(3) ब्रूधातोः लिटि रूपाणि लिखत।

**4. अधोलिखितानि रूपाणि साधयत।**

| | | |
|---|---|---|
| (1) जघास | (2) आदिथ। | (3) जघनिथ। |
| (4) जहि। | (5) यौति। | (6) अयुः। |
| (7) बभूव। | (8) अगात् | (9) अधुक्षत्। |

**5. अधोलिखितानां सूत्राणां व्याख्या कार्या ।**

| | |
|---|---|
| (1) लिट्यन्यतरस्याम्। | (2) अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति। |
| (3) विदो लटो वा। | (4) श्नसोरल्लोपः। |
| (5) घुमास्थागापाजहातिसां हलि। | (6) लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये। |
| (7) अस्यतिवक्तिख्यातिभ्योऽङ्। | (8) न न्द्राः संयोगादयः। |

•

# 5 जुहोत्यादिप्रकरणाम्

**हु दानादानयोः ॥ 1॥**

**54. जुहोत्यादिभ्यः श्लुः 2 | 4 | 75 ॥**

शपः श्लुः स्यात्॥

**55. श्लौ 6 | 1 | 10 ॥**

धातोर्द्वे स्तः। जुहोति। जुहुतः॥

---

**54. पदपरिचयः** – 'जुहोत्यादिभ्यः' (प.ब.व.), 'श्लुः' (प्र.ए.व.)।

**समासः** – जुहोतिः आदिः येषां ते जुहोत्यादयः, तेभ्यः 'जुहोत्यादिभ्यः' (प.तत्पु.)।

**अनुवृत्तिः** – 'अदिप्रभृतिभ्यः शपः' (2.4.72) इत्यस्मात् शपः इत्यनुवर्तते।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – हु इत्यादिभ्यः धातुभ्यः परे शपः श्लुः नाम लोपः भवति।

**विशेषार्थः** – ''**प्रत्ययस्य लुक्-श्लु-लुपः**'' इत्ययेन प्रत्ययादर्शनस्य एव लुक्-श्लु-लुप्संज्ञा प्रतिपादिता। अतः जुहोत्यादिभ्यः धातुभ्यः परत्र विद्यमानस्य शपः लोपः भवति। 'श्लु' संज्ञायाः प्रयोगः '**श्लौ**' इत्यनेन द्वित्वकार्यार्थम्।

**55. पदपरिचयः** – 'श्लौ' (स.ए.व.)।

**अनुवृत्तिः** – '**लिटि धातो.....**' **(6.1.8)** इत्यस्मात् 'धातोः' इत्यनुवर्तते। '**एकाचो द्वे प्रथमस्य**' **(6.1.1)** इत्यस्मात् 'द्वे' इत्यनुवर्तते।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – श्लुकार्ये जाते सति द्वित्वं भवति।

**विशेषार्थः** – श्लुरूपशप्प्रत्ययं मत्वा ''प्रत्ययलोपे प्रत्ययलक्षणम्'' इति सूत्रेण तन्निमित्तकगुणो न भवति। ''**न लुमताङ्गस्य**'' इति सूत्रेण तन्निमित्तकगुणो न भवति। ''**न लुमताङ्गस्य**'' इति सूत्रविरोधात्।

**रूपसिद्धिः** – **जुहोति** '**हु**' दानाऽदानयोः इत्यस्माद् धातोः ''**लः कर्मणि च भावे चाकर्मकेभ्यः**'' इति 'खले कपोताः' इति न्यायेन कर्तरि दशाऽपि लकाराः प्राप्ताः, एषु केनाऽत्र भाव्यम् इत्याकाङ्क्षायां ''**वर्तमाने लट्**'' इति हु धातोः वर्तमानक्रियावृत्तित्वविवक्षायां लटि अनुबन्धलोपे 'हु + ल्' इति दशायां ''**लस्य**'' इत्यधिकृत्य ''तिप् तस्'' इत्यादिना इत्येतेऽष्टादश लादेशाः प्राप्ताः ततश्च ''**लः परस्मैपदम्**'' इत्यनेन अष्टादशानामप्येषां परस्मैपदसंज्ञा सञ्जाता, एवं ''**तङानावात्मनेपदम्**'' इत्यनेन तङ्प्रत्याहारान्तःपातिनां नवानाम् आत्मनेपदसंज्ञा सञ्जाता। एवं सति तिबादयः परस्मैपदसंज्ञाः, तादयश्च आत्मनेपदसंज्ञाः, एषां मध्येऽत्र परस्मैपदसंज्ञिनः आहोस्विद् आत्मनेपदसंज्ञिनः प्रत्ययाः स्युः इति सन्देहे ''**शेषात्कर्तरि परस्मैपदम्**'' इत्यनेन 'हु' धातोरात्मनेपदनिमित्तहीनत्वात्कर्तरि परस्मैपदं प्राप्तं, ततः परस्मैपदसंज्ञिनां नवानां मध्यात्कतमेन भाव्यमित्याकांक्षायां ''**तिङ स्त्रीणि त्रीणि प्रथममध्यमोत्तमाः**'' इत्यनेन क्रमात् त्रयाणां त्रिकाणां प्रथममध्यमोत्तमसंज्ञासु जातासु च लब्धप्रथमादिसंज्ञानां तिङस्त्रयाणां वचनानां प्रत्येकमेकवचनद्विवचनबहुवचनसंज्ञासु अत्र प्रथमेन भाव्यम्, उत मध्यमेन आहोस्विद् उत्तमेन इत्याकांक्षायां ''**शेषे प्रथमः**'' इति प्रथमपुरुषो भवितुं युक्तः, तथापि त्रीणि वचनानि, एष्वपि कतमेन भाव्यम् इत्याकांक्षायां ''**द्व्येकयोर्द्विवचनैकवचने**'' इत्यनेन अत्र एकवचनस्य विवक्षायां प्रथमपुरुषे ''**तिप्तस्झि...**'' इति सूत्रेण तिपि प्रत्यये जाते अनुबन्धलोपे च कृते ''**तिङ्शित्सार्वधातुकम्**'' इति सार्वधातुकसंज्ञायां ''**कर्तरि शप्**'' इत्यनेन 'शप्' प्रत्यये कृते ''**जुहोत्यादिभ्यः श्लुः**'' इति शपः श्लौ ''**कुहोश्चुः**'' इति चर्त्वेन झकारे तथा ''**अभ्यासे चर्च**'' इति चर्त्वेन जकारे कृते ''**सार्वधातुकार्धधातुकयोः**'' अनेन गुणादेशे **जुहोति** इति रूपं सिद्धम् ॥

**56. अदभ्यस्तात् 7 | 1 | 4 ||**

झस्यात्स्यात्। हुश्नुवोरिति यण्। जुह्वति॥

**57. भीह्रीभृहुवां श्लुवच्च 3 | 1 | 39 ||**

एभ्यो लिटि आम् वा स्यादामि श्लाविव कार्यं च। जुहवाञ्चकार, जुहाव। होता। होष्यति। जुहोतु, जुहुतात्। जुहुताम्। जुह्वतु। जुहुधि। जुहवानि। अजुहुताम्॥

---

**जुहुतः** - '**हु**' दानाऽदानयोः इत्यस्माद् धातोः लट्लकारे, प्रथमपुरुषद्विवचने तसि प्रत्ययेऽनुबन्धलोपे शपि आगते शपः लोपे तं मत्वा 'श्लौ' इति द्वित्वे हु + हु + तस् इति जाते ''**कुहोश्चुः**'' इति चर्त्वेन झकारे ''**अभ्यासे चर्च**'' इति चर्त्वेन जकारे सस्य रुत्वे विसर्गे जुहुतः इति सिद्धम्।

**56. पदपरिचयः** - 'अत्' (प्र.ए), 'अभ्यस्यात्' (प.ए)।

**समासः** - जुहोतिः आदिः येषां ते जुहोत्यादयः, तेभ्यः 'जुहोत्यादिभ्यः।' (प. तत्पु.)।

**अनुवृत्तिः** - '**आयनेयीनीयियः...**' **(7.1.2)** इत्यस्मात् 'प्रत्ययादेः' इत्यनुवर्तते। '**झोऽन्तः**' **(7.1.3)** इत्यस्मात् 'झ' इति अनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अभ्यस्तसंज्ञकात् परस्य प्रत्ययावयवस्य झकारस्य स्थाने अत् आदेशो भवति।

**विशेषार्थः** - विभक्तिसंज्ञकस्य ''झ'' इत्यस्य झकारस्य स्थाने 'अत्' आदेशेन 'अत्' आदेशोपि विभक्तिसंज्ञको वर्तते। अतः तकारस्य ''**हलन्त्यम्**'' इत्ययनेन इत् संज्ञा न भवति। ''**न विभक्तौ तुस्माः**'' इति सूत्रनिषेधात्।

**रूपसिद्धिः** - **जुह्वति** 'हु' दानाऽदानयोः इत्यस्माद् धातोः लट्कारे, प्र.पु.बहुवचने 'झि' प्रत्यये अनुबन्धलोपे च शपि आगते शपः लोपे, तं मत्वा ''श्लौ'' इति द्वित्वे हु + हु + झि ''**कुहोश्चुः**'' इति चर्त्वेन झकारे ''**अभ्यासे चर्च**'' इति चर्त्वेन जकारे जु + हु +झि ''**अदभ्यस्तात्**'' इति 'अत्' आदेशे सति जु + हु + अत् + इ इति स्थिते ''**हुश्नुवोः सार्वधातुके**'' इति यणि कृते जुह्वति इति रूपं निष्पन्नम्॥

**57. पदपरिचयः** - 'भी-ह्री भृहुवाम्' (ष.ब.व), 'श्लुवत्' (अव्य.) 'च' (अव्य.)।

**समासः** - भीश्च ह्रीश्च भा च हूश्च, तेषां 'भीह्रीभृहुवाम्' (ष. तत्पु.)।

**अनुवृत्तिः** - '**कास्प्रत्ययात् आममन्त्रे लिटि**' **(3.1.35)** इत्यस्मात् 'अन्यतरस्याम्' तथा **उषविदजागृभ्योऽन्यतरस्याम्** इत्यस्मात् अन्यतरस्याम् इति तथा, **प्रत्ययः**, **परश्च** इति अनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - लिट्प्रत्यये परे भी-ह्री-भृ-हु-धातुभ्यः परे आम्प्रत्ययो विकल्पेन भवति। आमि परे श्लुवत् कार्यं भवति।

**विशेषार्थः** - '**आमि श्लाविव कार्यम्**' अर्थात् श्लौ प्रत्यये परे सति यथा द्वित्वम् इत्त्वमित्यादि-कार्याणि भवन्ति, तथैव आमि सत्यपि भवन्ति।

**रूपसिद्धिः** - **जुहवाञ्चकार** - 'हु' धातोः लिटि ''**भीह्रीभृहुवां श्लुवच्च**'' इति लिटः पाक्षिके आमि श्लुवद्भावे च विहिते द्वित्वे, अभ्यासत्वे, चुत्वेन हस्य झत्वे ''**अभ्यासे चर्च**'' इति झस्य जत्वे कृते गुणे, अवादेशे च ''**आमः**'' इति लिटो लुकि ''**कृञ्चानुप्रयुज्यते लिटि**'' इति अभ्यासत्वे ''**उरत्**'' इत्यत्वे रपरत्वे ''**हलादिः शेषः**'' इत्यनेन अभ्याससम्बन्धिरेफस्य लोपे ''**कुहोश्चुः**'' इति अभ्यासककारस्य चुत्वे 'जुहवाम् + चकृ + अ' इति स्थिते ''**अचो ञ्णिति**'' इति वृद्धौ रपरत्वे च विहिते, मस्य अनुस्वारे परसवर्णे 'जुहवाञ्चकार' इति रूपं सिद्धम्। आमः अभावपक्षे लिटस्तिपि णलि द्वित्वादिकार्ये ''**अचोऽञ्णिति**'' इति वृद्धौ अवादेशे च 'जुहाव' इति रूपं निष्पद्यते।

**58. जुसि च 7 | 3 | 83 ||**

इगन्ताङ्गस्य गुणोऽजादौ जुसि। अजुहवुः। जुहुयात्। हूयात्। अहौषीत्। अहोष्यत्॥ **ञिभी भये॥ 2॥** बिभेति

**59. भियोऽन्यतरस्याम् 6 | 4 | 115 ||**

इकारो वा स्यात् हलादौ क्ङिति सार्वधातुके। बिभितः, बिभीतः। बिभ्यति। बिभयाञ्चकार बिभाय, बिभितात्। भेता। भेष्यति। बिभेतु, बिभितात्, बिभीतात्। अबिभेत्। बिभीयात्। भीयात्। अभैषीत्॥ **ह्री लज्जायाम् ॥ 3॥**

जिह्रेति। जिह्रीतः। जिह्रियति। जिह्रयाञ्चकार, जिह्राय। ह्रेता। ह्रेष्यति। जिह्रेतु। अजिह्रेत्। जिह्रीयात्। ह्रीयात्॥ **पॄ पालनपूरणयोः ॥ 4॥**

**60. अर्तिपिपर्त्योश्च 7 | 4 | 77 ||**

अभ्यासस्य इकारोऽन्तादेशः स्यात् श्लौ। पिपर्ति

---

**58. पदपरिचयः** - 'जुसि' (स.ए.व), 'च' (अव्य.)।

**अनुवृत्तिः** - ''**क्सस्याचि**'' **(7.3.72)** इत्यस्मात् 'अचि', ''**मिदेर्गुणः**'' **(7.2.114)** इत्यस्मात् 'गुणः' इत्यनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अजादौ जुस्-प्रत्यये परे इगन्ताङ्गस्य गुणो भवति।

**विशेषार्थः** - सूत्रे 'गुणः' इति कार्यनिर्देशस्तु वर्तते, किन्तु स्थानिनः निर्देशो नास्ति। अतः ''**इको गुणवृद्धी**'' इति सूत्रात् 'इकः' इति पदम् उपस्थाय्य तदन्तविधिना इगन्तस्य अङ्गस्य इति अर्थलाभः।

**रूपसिद्धिः - अजुहवुः** - 'हु' इत्यस्माद् धातोः लङ्लकारे, प्र.पु.बहुवचने 'झि' प्रत्यये, शपि, श्लौ, द्वित्वे, गुणे, अटि च अजुहो + झि अत्र ''**सिजभ्यस्तविदिभ्यश्च**'' इत्यनेन अभ्यस्तात् परस्य झि इत्यस्य जुस् आदेशे अनुबन्धलोपे च अजुहु + उस् अत्र ''**जुसि च**'' इत्यनेन गुणे कृते, अवादेशे च 'अजुहवुः' इति रूपं साधु॥

**59. पदपरिचयः** - 'भियः' (ष.ए.व), 'अन्यतरस्याम्' (स.ए.व)।

**अनुवृत्तिः** - ''**इद् दरिद्रस्य**'' **(6.4.114)** इत्यस्मात् 'इत्' ''**ई हल्यघोः**'' **(6.4.113)** इत्यस्मात् 'हलि', ''**गमहनजनखनघसां लोपः क्ङित्यनङि**'' **(6.4.98)** इत्यस्मात् 'क्ङिति' तथा ''**अत उत्सार्वधातुके**'' **(6.4.110)** इत्यस्मात् 'सार्वधातुके' इत्यनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - हलादौ किति ङिति च सार्वधातुकप्रत्यये परे 'भी' धातोः विकल्पेन इकारः आदेशो भवति।

**विशेषार्थः** - भी-धातोः लिट्लकारे ''भीह्रीभृहुवाम्...'' इत्यनेन 'आम्' प्रत्ययः, तं श्लुवत् मत्वा द्वित्वादिकार्यं गुणः तथा कृञादीनाम् अनुप्रयोगे सति, बिभयाञ्चकार बिभयाम्बभूव बिभयामास इत्यादिरूपाणि भवन्ति।

**रूपसिद्धिः - बिभितः - बिभीतः** ञिभी भये इत्यस्माद् धातोः लटि, तत्स्थाने तसादेशे, सार्वधातुकसंज्ञायां, शप्प्रत्यये, शपः श्लुकार्ये द्वित्वे 'भी + भी +तस्' अभ्यासादिकार्ये, बि + भी + तस् अत्र ''**भियोऽन्यतरस्याम्**'' इति विकल्पेन इकारे, सस्य रुत्वे विसर्गे च, बिभितः इति रूपं निष्पद्यते। विकल्पाभावे बिभीतः इति रूपं सिद्धम्॥

**60. पदपरिचयः** - 'अर्तिपिपर्त्योः' (ष.द्वि.व.), 'च' (अव्य.)।

**समासः** - अर्तिश्च पिपर्तिश्च अर्तिपिपर्ती, तयोः 'अर्तिपिपर्त्योः' (इतरे. द्वन्द्व)।

**अनुवृत्तिः** - ''**अत्र लोपोऽभ्यासस्य**'' **(2.4.72)** इत्यस्मात् 'अभ्यासस्य' ''**भृञामित्**'' **(7.4.76)** इत्यस्मात् 'इत्' तथा ''**णिजां त्रयाणां गुणः श्लौ**'' **(7.4.75)** इत्यस्मात् 'श्लौ' इत्यनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - ऋधातोः तथा पृधातोः अभ्यासस्य अन्त्यवर्णस्य इकारादेशो भवति, श्लौ प्रत्यये परे।

**61. उदोष्ठ्यपूर्वस्य 7 | 1 | 102 ॥**

अङ्गावयवौष्ठ्यपूर्वो य ऋत् तदन्तस्याङ्गस्य उत् स्यात्॥

**62. हलि च 8 | 2 | 77 ॥**

रेफवान्तस्य धातोरुपधाया इको दीर्घो हलि। पिपूर्तः। पिपुरति। पपार॥

**63. शॄदॄप्रां ह्रस्वो वा 7 | 4 | 12 ॥**

एषां लिटि ह्रस्वो वा स्यात्। पप्रतुः॥

---

**विशेषार्थः** - ''**अलोन्त्यस्य**'' इति परिभाषया इकारादेशः अभ्यासस्य स्थाने भवति। ऋ-धातोः लटि 'इयर्ति' इति रूपम्।

**रूपसिद्धिः** - **पिपर्ति** - '**पॄ**' पालनपूरणयोः इत्यस्माद् धातोः लटि, तिपि, शपि, शपः श्लुकार्ये श्लुत्वे (लोपत्वे) ''श्लौ'' इति द्वित्वे ''**उरत्**'' इति सूत्रेण उरदत्त्वे रपरत्वे च 'पर् + पॄ + ति' इति जाते, हलादिशेषे 'प + पॄ + ति' इति जाते, ''**अर्तिपिपर्त्योश्च**'' इत्यनेन अभ्यासाकारस्य इकारादेशे 'पि + पॄ + ति' इति जाते, ''**सार्वधातुकार्धधातुकयोः**'' इति अनभ्यासस्य ॠकारस्य गुणे, रपरत्वे च - 'पिपर्ति' इति रूपं जातम्।

**61. पदपरिचय** - 'उत्' (प्र.ए.व.), 'ओष्ठ्यपूर्वस्य' (ष.ए.व.)।

**समासः** - ओष्ठ्यः पूर्वो यस्य सः ओष्ठ्यपूर्वः, तस्य 'ओष्ठ्यपूर्वस्य' (बहुव्रीहि)

**अनुवृत्तिः** - '**ॠत इद्धातोः**' **(7. 1. 100)** इत्यस्मात् 'ॠत' इत्यनुवर्तते। **अङ्गस्य** इत्यधिकृतम्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अङ्गावयवः यः ओष्ठ्यवर्णः यस्मात् पूर्वं भवति, तादृशः ॠवर्णः, तदन्ताङ्गस्य ह्रस्वः उकारादेशो भवति।

**विशेषार्थः** - 'अङ्गस्य' इति अधिकृतम्, 'अङ्गस्य' इति पदस्य द्विरावर्तनं कृत्वा प्रथमस्य 'अङ्गस्य' सम्बन्धः ओष्ठ्यवर्णः इत्यनेन सह विशेषणरूपेण, अर्थात् अङ्गावयवः ओष्ठ्यः (वर्णः) पूर्वो यस्य सः ओष्ठ्यपूर्वः। द्वितीयम् 'अङ्गस्य' इति पदं विशेष्यरूपेण स्वीकृत्य ॠदन्तस्य अङ्गस्य इति।

**62. पदपरिचयः** - 'हलि' (स.ए.व.), 'च' (अव्य.)।

**अनुवृत्तिः** - ''**सिपि धातोः रुर्वा**'' **(2.4.72)** इत्यस्मात् 'धातोः', ''**र्वोरुपधाया दीर्घ इकः**'' **(2.4.72)** इति सम्पूर्णं सूत्रमनुवर्तते

**सूत्रप्रकारः** - **विधिसूत्रम्।**

**सरलार्थः** - हलि परे रेफान्तस्य वकारान्तस्य च धातोः उपधायाः इकः दीर्घो भवति।

**विशेषार्थः** - ''**र्वोरुपधाया दीर्घ इकः**'' इति सूत्रं पदान्ते दीर्घं करोति, ''**हलि च**'' सूत्रमिदं हलः परे दीर्घं निर्दिशति। एतावानेव भेदः उभयोर्मध्ये॥ सूत्रे तकारः समुच्चयार्थः। अर्थात् अष्टाध्यायीसूत्रक्रमेण पूर्वोक्तं ''**र्वोरुपधाया...**'' इति दीर्घं हलि परे अपि भवति।

**रूपसिद्धिः** - **पिपूर्तः** पॄ धातोः लटि, तसि शपि, श्लौ, द्वित्वे, अभ्यासत्वे ''**उरत्**'' इति ऋकारस्य अत्वे रपरत्वे हलादिलोपे ''**अर्तिपिपर्त्योश्च**'' इति अभ्यासस्य इकारान्तादेशे ''**उदोष्ठ्यपूर्वस्य**'' इति उकारे कृते ''**हलि च**'' इति दीर्घे सस्य रुत्वे विसर्गे च '**पिपूर्तः**' रूपं सिद्धम् इति।

**63. पदपरिचयः** - 'शॄदॄप्रां' (ष.ब.व.), 'ह्रस्वः' (प्र.ए.व), 'वा' (अव्य.)।

**समासः** - शॄश्च दॄश्च पॄश्च इति तेषामितरेतरद्वन्द्वः शॄदॄप्रः, तेषां 'शॄदॄप्राम्' (इतरे. द्वन्द्वः)।

**अनुवृत्तिः** - ''**दयतेर्दिगि लिटि**'' **(7.4.9)** इत्यस्मात् 'लिटि' इत्यनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - किति लिटि प्रत्यये परे एषां धातूनां ह्रस्वो वा भवति।

**64. ऋच्छत्यॄताम् 7 | 4 | 11 ||**

तौदादिकऋच्छेर्ऋधातोर्ॠतां च गुणो लिटि। पपरतुः पपरुः॥

**65. वॄतो वा 7 | 2 | 38 ||**

वृङ्वृञ्भ्यामॄदन्ताच्चेटो दीर्घो वा स्यान्न तु लिटि। परीता, परिता। परीष्यति, परिष्यति। पिपर्तु। अपिपः। अपिपूर्ताम्। अपिपरुः। पिपूर्यात्। पूर्यात्। अपारीत्॥

**66. सिचि च परस्मैपदेषु 7 | 2 | 40 ||**

अत्र इटो न दीर्घः। अपारिष्टाम्। अपरीष्यत्, अपरिष्यत्॥ **ओहाक् त्यागे** ॥ 5॥ जहाति।

---

**विशेषार्थः** - सूत्रोदाहरणे ह्रस्वविधिसामर्थ्यात् ''ऋच्छत्यॄताम्'' इति वक्ष्यमाणसूत्रेण गुणो न भवति। ''अचश्च'' इति परिभाषया ऋकारस्य विकल्पेन ह्रस्वः क्रियतेऽनेन सूत्रेण।

**रूपसिद्धिः** - पॄ धातोः लिटि, तत्स्थाने तसादेशे, तसः स्थाने अतुसादेशे 'पॄ + अतुस्' इति जाते, द्वित्वे, 'पॄ + पॄ + अतुस्' इति जाते, उरदत्वे रपरत्वे च 'पर् + पॄ + अतुस्' इति जाते, हलादिशेषे 'प + पॄ + अतुस्' इति जाते, ''शॄदॄप्रां ह्रस्वो वा'' इति सूत्रेण विकल्पेन दीर्घ-ऋकारस्य स्थाने ह्रस्वे, 'प+ पृ + अतुस्' यणादेशे 'पप्रतुस्' इति जाते, सस्य रुत्वे विसर्गे 'पप्रतुः' इति रूपं निष्पद्यते। ''लिटि धातोः ...'' इति द्वित्वे, अभ्यासत्वे, ह्रस्वे, अत्वे, रपरत्वे, अभ्यासलोपे पपॄ + अतुस् इति भूते ''शॄदॄप्रां ह्रस्वो वा'' इत्यनेन वैकल्पिके ह्रस्वे ''**इको यणचि**'' इति यणि, सस्य रुत्वे विसर्गे पप्रतुः रूपं जातम्।

**64. पदपरिचयः** - 'ऋच्छत्यॄताम्' (ष.ब.व)।

**समासः** - ऋच्छतिश्च 'ऋ' च 'ॠत्' च इति ऋच्छत्यॄतः, तेषां 'ऋच्छत्यॄताम्'।

**अनुवृत्तिः** - '**ऋतश्च संयोगादेः**' **(7.4.10)** इत्यस्मात् 'गुणः', ''**दयतेर्दिगि लिटि**'' **(7.4.9)** इत्यस्मात् 'लिटि' इत्यनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - लिटि परे तौदादिकः ऋच्छ धातुः, ऋ धातुः तथा ॠदन्तधातवः इत्येषां धातूनां गुणो भवति।

**विशेषार्थः** - ''**इको गुणवृद्धी**'' इति परिभाषया 'इकः' इति परिभाषया 'इकः' इति पदम् उपतिष्ठते॥ ऋच्छधातौ ऋवर्णः उपधायां नास्ति, अतः लघूपध-गुणो न प्राप्नोति, तथा ऋ-धातौ ॠदन्तेषु च धातुषु ''**असंयोगाल्लिट् कित्**'' इत्यनेन कित्त्वकारणात् गुणप्रतिषेधः आसीत्। अतः अनेन सूत्रारम्भद्वारा गुणविधानम्।

**रूपसिद्धिः** - **पपरतुः पप्रतुः** इत्यस्य ह्रस्वाभावपक्षे ''**ऋच्छत्यॄताम्**'' इति गुणे रपरे विहिते पपरतुः इति रूपं भवति।

**65. पदपरिचयः** - 'वॄतः' (प.ए.व), 'वा' (अव्य.)।

**समासः** - वृ च ॠत् च इति **वॄतः, तस्मात्** 'वॄतः' (इतरे. द्वन्द्वः)।

**अनुवृत्तिः** - ''**आर्धधातुकस्येड्..**'' **(7.3.35)** इत्यस्मात् 'इट्', ''**ग्रहोऽलिटि दीर्घः**'' **(7.2.37)** इत्यस्मात् दीर्घः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - वृङ्, वृञ् तथा ॠदन्तधातुभ्यः परस्य इडागमस्य विकल्पेन दीर्घः भवति, किन्तु लिटि परे सति न स्यात्।

**विशेषार्थः** - 'वृ' धातोः अनुबन्धनिर्देशरहितात् 'वृङ्' तथा 'वृञ्' उभयोः धात्वोः ग्रहणम्।

**रूपसिद्धिः** - **परीता, परिता** - पॄ धातोः लुटि, तिपि, तत्स्थाने डादेशे कृते, तासि कृते 'पॄ + तास् + डा' इति जाते अत्र सार्वधातुके गुणे पर् + इ +तास् + डा, इति जाते, डित्वात् टिलोपे परि + त् + आ ''वॄतो वा'' इति विकल्पेन इकारस्य दीर्घे **परीता** इति रूपं सिद्धम्। दीर्घाभावे **परिता** इति रूपं साधु॥

**66. पदपरिचयः** - 'सिचि' (स.ए.व.), 'च' (अव्य.), 'परस्मैपदेषु' (स.ब.व.)।

**अनुवृत्तिः** - ''**वॄतो वा**'' **(7.2.38)** इत्यस्मात् 'वॄतः', ''**आर्धधातुकस्येड्...**'' **(7.3.35)** इत्यस्मात् 'इट्', ''**ग्रहोऽलिटि दीर्घः**'' **(7.2.37)** इत्यस्मात् 'दीर्घः' तथा ''**न लिङि**'' इत्यतः 'न' इति चानुवर्तते।

**67. जहातेश्च 6 | 4 | 116 ||**

इद्वा स्याद्धलादौ क्ङिति सार्वधातुके। जहितः॥

**68. ई हल्यघोः 6 | 4 | 113 ||**

श्नाभ्यस्तयोरात ईत् स्यात् सार्वधातुके क्ङिति हलादौ, न तु घोः। जहीतः॥

**69. श्नाऽभ्यस्तयोरातः 6 | 4 | 112 ||**

अनयोरातो लोपः क्ङिति सार्वधातुके। जहति। जहौ। हाता। हास्यति। जहातु, जहितात्।

---

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - परस्मैपदपरके सिचि परे वृङ्धातोः, वृञ्धातोः तथा ऋदन्तधातुभ्यः परस्य इडागमस्य दीर्घो न भवति।

**रूपसिद्धिः** - **अपारिष्टाम्** - लुङि अपॄ + इस् + इ + ताम् इति स्थितौ ''**वृतो वा**'' इति इटः विकल्पेन दीर्घे प्राप्ते ''**सिचि च परस्मैपदेषु**'' इत्यनेन इटः दीर्घनिषेधे ''**सिचि वृद्धिःपरस्मैपदेषु**'' इत्यनेन इगन्तलक्षणायां वृद्धौ कृतायां, रपरत्वे च 'अपार् + इस् + ताम्' इति जाते, सस्य षत्वे, ष्टुत्वे च 'अपारिष्टाम्' इति रूपं साधु।

**67. पदपरिचयः** - 'जहातेः' (ष.ए.व), 'च' (अव्य.)।

**अनुवृतिः** - ''**इद् दरिद्रस्य**'' **(6.4.113)** इत्यस्मात् 'इद्', ''**भियोऽन्यतरस्याम्**'' **(6.4.115)** इत्यस्मात् अन्यतरस्याम्, ''**ई हल्यघोः**'' **(6.4.113)** इत्यस्मात् हलि, ''**गमहनजनखनघसां लोपः क्ङित्यनङि**'' **(6.4.98)** इत्यस्मात् 'क्ङिति' ''**अत उत्सार्वधातुके**'' **(6.4.110)** इत्यस्मात् 'सार्वधातुके' इति पदानि अनुवर्तन्ते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - हलादौ किति ङिति च सार्वधातुके प्रत्यये परे हा (ओहाक्) धातोः आकारस्य विकल्पेन ह्रस्वः इकारादेशो भवति।

**विशेषार्थः** - ''**अलोऽन्त्यस्य**'' इति परिभाषया इत्वकार्यम् अन्त्यस्य अलः (आकारस्य) स्थाने भवति। सूत्रमिदम् ''**ई हल्यघोः**'' इत्यस्य अपवादकम्॥

**रूपसिद्धिः** - **जहितः, जहीतः** - 'ओहाक् त्यागे' इत्यस्माद् धातोः लटि तत्स्थाने तसादेशे श्लुकार्ये, द्वित्वे कृते हा + हा + तस् जाते अभ्यासादिकार्ये जहा + तस् इति ''**जहातेश्च**'' इति विकल्पेन इकारे, सस्य रुत्वे विसर्गे च कृते 'जहितः' रूपं सिद्धम्। विकल्पाभावेन ''**ई हल्यघोः**'' इति सूत्रेण ईकारे कृते सस्य रुत्वे विसर्गे च कृते 'जहीतः' इति रूपं सिद्धम्।

**68. पदपरिचयः** - 'ई' (लुप्तप्र.ए.व.), 'हलि' (स.ए.व), 'अघोः' (ष.ए.व.)।

**समासः** - न घुः अघुः, तस्य अघोः नञ्तत्पुरुषः।

**अनुवृतिः** - ''**श्नाभ्यस्तयोरातः**'' **(6.4.112)** इत्यस्मात् 'श्नाभ्यस्तयोः' तथा 'आतः' ''**गमहनजनखनघसां लोपः क्ङित्यनङि**'' **(6.4.98)** इत्यस्मात् 'क्ङिति' तथा ''**अत उत्सार्वधातुके**'' **(6.4.110)** इत्यस्मात् 'सार्वधातुके' इत्यनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - हलादौ किति ङिति सार्वधातुके प्रत्यये परे श्ना-प्रत्ययस्य तथा अभ्यस्तसंज्ञकस्य धातोः इकारागमो भवति। किन्तु घु-संज्ञकधातोः आकारस्य इकारागमो न भवति।

**विशेषार्थः** - इदं सूत्रं वक्ष्यमाणस्य ''**श्नाऽभ्यस्तयोरातः**'' इति सूत्रस्य अपवादकम्।

**69. श्नाऽभ्यस्तयोरातः 6 | 4 | 112 ||**

अनयोरातो लोपः क्ङिति सार्वधातुके। जहति। जहौ। हाता। हास्यति। जहातु, जहितात्।

**69. पदपरिचयः** - 'श्नाऽभ्यस्तयोः' (ष.द्वि.व), 'आतः' (ष.ए.व)।

**समासः** - श्नाश्च अभ्यस्तश्च श्नाभ्यस्तौ, तयोः श्नाभ्यस्तयोः (इतरेतरद्वन्द्वः)

**अनुवृत्तिः** - ''**श्नसोरल्लोपः**'' **(6.4.111)** इत्यस्मात् 'लोपः', ''**अत उत्सार्वधातुके**'' **(6.4.110)** इत्यस्मात् 'सार्वधातुके', ''**गमहनजन...**'' **(6.4.98)** इत्यस्मात् 'क्ङिति' इत्यनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**70. आ च हौ 6 | 4 | 117 ||**

जहातेर्हौ परे स्याच्चादिदीतौ। जहाहि, जहिहि, जहीहि। अजहात्। अजहुः॥

**71. लोपो यि 6 | 4 | 118 ||**

जहातेरालोपो यादौ सार्वधातुके। जह्यात्। एर्लिङि। हेयात्। अहासीत्। अहास्यत्॥ **माङ् माने शब्दे च ॥ 6॥**

**72. भृञामित् 7 | 4 | 76 ||**

भृञ् माङ् ओहाङ् एषां त्रयाणामभ्यासस्य इत्स्यात् श्लौ। मिमीते। मिमाते। मिमते। ममे। माता। मास्ते। मिमीताम्। अमिमीत। मिमीत। मासीष्ट। अमास्त। अमास्यत॥ **ओहाङ् गतौ** ॥ 7॥ जिहीते। जिहाते। जिहते। जहे। हाता। हास्यते।

---

**सरलार्थः** - किति ङिति सार्वधातुके प्रत्यये परे श्ना-प्रत्ययस्य तथा अभ्यस्तसंज्ञकात् धातोः परस्य आकारस्य लोपो भवति।

**विशेषार्थः** - इदं सूत्रम् 'अजादौ हलादौ च किति ङिति च सार्वधातुके' इत्येभ्यः सामान्यं वर्तते। किन्तु हलादौ किति ङिति सार्वधातुके ''**ई हल्यघोः**'' इति सूत्रम् अस्य सूत्रस्य अपवादकम्। अतः 'अजादौ हलादौ च किति ङिति च सार्वधातुके तथा घुसंज्ञकविषये हलादौ किति ङिति च सार्वधातुके अस्य सूत्रस्य प्रवृत्तिर्भवति। एतद् ध्यातव्यम् यद् ''**ई हल्यघोः**'' इत्यस्यापि ''**जहातेश्च**'' इति अपवादकम्।

**रूपसिद्धिः** - **जहति** - ओहाक् त्यागे इत्यस्माद् धातोः लटि, तत्स्थाने 'झि' आदेशे सार्वधातुकसंज्ञायां, शपि, शपः श्लुकार्ये, द्वित्वे कृते हा + हा + झि इति जाते अभ्यासादिकार्ये कृते, जहा + झि इति जाते ''**अदभ्यस्तात्**'' इति झस्य स्थाने 'अत्' आदेशे कृते जहा + अति इति स्थिते ''**श्नाऽभ्यस्तयोरातः**'' इति सूत्रेण आकारस्य लोपे कृते 'जहति' इति रूपं निष्पद्यते।

**70. पदपरिचयः** - 'आ' (लुप्त प्र.ए.व.), च (अव्य.), हौ (स.ए.व)।

**अनुवृत्तिः** - ''**इद् दरिद्रस्य**'' **(6.4.114)** इत्यस्मात् 'इत्', ''**ई हल्यघोः**'' **(6.4.113)** इत्यस्मात् 'हलि', ''**जहातेश्च**'' **(6.4.116)** इत्यस्मात् 'जहातेः' इत्यनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - हि प्रत्यये परे हा धातोः आकारस्य स्थाने आकारः इकारः ईकारश्च आदेशो भवति।

**विशेषार्थः** - ''**अलोऽन्त्य...**'' इति परिभाषया एते आदेशाः अन्त्यस्य अलः (आकारस्य) स्थाने भवन्ति। लोट्-लकारे रूपमाला यथा-जहातु-जहितात् जहिताम्, जहिताम्-जहीताम्, जहतु। जहाहि। जहिहि, जहीहि, जहीतात्, जहितम्-जहीतम्, जहित-जहीत। जहानि, जहाव जहाम।

**रूपसिद्धिः** - **जहाहि-जहिहि, जहीहि।** 'ओहाक् त्यागे' इत्यस्माद्धातोः लोटळस्थाने मध्यमपुरुषैकवचने सिपि ''**सेर्ह्यपिच्च**'' इति सिपः स्थाने हि इत्यादेशे, सार्वधातुकसंज्ञायां, शपि शपः श्लौ, ''**श्लौ**'' इति द्वित्वे अभ्याससंज्ञायां ''**ह्रस्वः**'' इत्यभ्यासस्याचो ह्रस्वे ''**कुहोश्चुः**'' इति अभ्यासहकारस्य चुत्वेन झत्वे ''**अभ्यासे चर्च**'' इत्यनेन झस्य जत्वे ''**आ च हौ**'' इति आत्वपक्षे 'जहाहि' इति, इत्वपक्षे 'जिहिहि' इति, ईत्वपक्षे तु 'जहीहि' इति रूपत्रयं सिद्धं भवति।

**71. पदपरिचयः** - 'लोपः' (प्र.ए.व.), 'यि' (स.ए.व.)।

**अनुवृत्तिः** - ''**अत उत्सार्वधातुके**'' **(6.4.110)** इत्यस्मात् 'सार्वधातुके', '**जहातेश्च**' (6.4.116) इत्यस्मात् 'जहातेः' इत्यनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - यकारादौ सार्वधातुके प्रत्यये परे 'हा' धातोः आकरस्य लोपो भवति।

**विशेषार्थः** - उत्कर्षं द्योतयितुं प्रायः अनेन धातुना सह प्र, वि तथा सम् इति उपसर्गाः प्रयुज्यन्ते यथा-प्रजहाति, विजहाति, संजहाति॥ अत्र जुहोत्यादिगणस्य परस्मैपद-धातूनां विवेचनं समाप्तम्। **माङ् माने शब्दे च** इत्यतः आत्मनेपदिधातूनाम् आरम्भो भवति।

**रूपसिद्धिः** - **जह्यात्** - 'ओहाक् त्यागे' इत्यस्माद् धातोः वि.लिङ्लकारे तत्स्थाने तिबादेशेऽनुबन्धलोपे '**इतश्च**' इति तिपः इकारलोपे, यासुडागमेऽनुबन्धलोपे, शपि, तस्य श्लौ, द्वित्वादिकार्ये कृते जहा + यास् + त् इति स्थिते, इत्व-ईत्वयोः प्राप्तयोः ''लोपो यि'' इत्यनेन आकारस्य लोपे कृते 'जह्यात्' इति रूपं निष्पद्यते।

**73. दाधा घ्वदाप् 1 | 1 | 20 ||**

दारूपा धारूपाश्च धातवो घुसंज्ञाः स्युर्दाप्दैपौ विना। घ्वसोरित्येत्वम्। देहि। दत्तम्। अददात्, अदत्त। दद्यात्, ददीत। देयात्, दासीष्ट। अदात्। अदाताम्। अदुः॥

**74. स्थाघ्वोरिच्च 1 | 2 | 17 ||**

अनयोरिदन्तादेशः सिच्च कित्स्यादात्मनेपदे। अदित। अदास्यत्, अदास्यत ॥ **डुधाञ् धारणपोषणयोः ॥ 10** दधाति।

---

जिहीताम्। अजिहीत। जिहीत। हासीष्ट। अहास्त। अहास्यत॥ **डुभृञ् धारणपोषणयोः** ॥ 8॥ बिभर्ति। बिभृतः। बिभ्रति। बिभृते। बिभ्राते। बिभ्रते। बिभराञ्चकार, बभार। बभर्थ। बभृव। बभृम। बिभराञ्चके, बभ्रे। भर्तासि, भर्तासे। भरिष्यति, भरिष्यते। बिभर्तु। बिभराणि। बिभृताम्। अबिभः। अबिभृताम्। अबिभरुः। अबिभृत। बिभृयात् बिभ्रीत। भ्रियात्, भृषीष्ट। अभार्षीत्, अभृत। अभरिष्ययत्, अभरिष्यत॥ **डुदाञ् दाने** ॥ 9॥ ददाति। दत्तः ददति। दत्ते। ददाते। ददते। ददौ, ददे। दातासि, दातासे। दास्यति, दास्यते। ददातु॥

**72. पदपरिचयः** - 'भृञाम्' (ष.ब.व.), 'इत्' (प्र.ए.व.)।

**अनुवृत्तिः** - **''णिजां त्रयाणां गुणः श्लौ'' (6.4.75)** इत्यस्मात् 'श्लौ' 'त्रयाणाम्' इत्यनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - श्लु-प्रत्यये परे भृञ्धातोः, माङ्धातोः तथा हाधातोः अभ्यासस्य इत् भवति।

**विशेषार्थः** - भृञादित्रयः धातवः धातुपाठे मूलोक्तक्रमेण उक्ताः। एतेषां वर्णनम् अस्मिन् गणे वर्तते॥ उपसर्गयोगे यथा-**प्रमीमिते**-निश्चयं करोति, **निर्मिमीते**-निर्माणं करोति, **अनुमिमीते**-अनुमानं करोति, **उपमिमीते**-तुलनां करोति, **उन्मिमीते**-तोलयति॥

**रूपसिद्धिः** - **मिमीते** 'माङ् माने शब्दे च' इत्यस्माद् धातोः लटि, तत्स्थाने 'त' इत्यादेशे, टेः एत्वे, सार्वधातुकसंज्ञायां शपि, शपः श्लौ, द्वित्वे अभ्यासादिकार्ये **''भृञामित्''** इति अभ्यासस्य इत्वे ''ई हल्यघोः'' इत्यनेन अनभ्यासस्य आकारस्य ईत्वे कृते, 'मिमीते' इति रूपं जातम्।

**73. पदपरिचयः** - 'दाधा' (प्र.ब.व), 'घु' (लुप्तप्रथमाकम्)। अदाप् (प्र.ए.व.)।

**समास** - दाश्च दाश्च दाश्च दाश्चेत्येषाम् एकशेषः दाः, धाश्च धाश्च तयोः इतरेतरद्वन्द्वः धौ, दाश्च धौ च 'दाधाः' (इतरे. द्वन्द्वः), न दाप् अदाप् (नञ्. तत्पु.)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - दा-स्वरूपाः धा-स्वरूपाश्च धातवः 'घु' संज्ञकाः, भवन्ति, दाप् तथा दैप् इति धातुद्वयं विहाय।

**विशेषार्थः** - दारूपाणां धारूपाणाञ्च सर्वेषां धातूनां ग्रहणमत्र अभिप्रैति। अत्र केचन स्वाभाविकाः यथा-डुदाञ् दाने, दाण् दाने, डुधाञ् धारणपोषणयोः। केचन लाक्षणिकाः आदेच उपदेशेऽशिति **(6.1.45)** इति सूत्रेण निष्पन्नाः यथा-धेट् पाने, देङ् रक्षणे, दो अवखण्डने। अत्र उभयोर्ग्रहणम् अभीष्टम्॥

**रूपसिद्धिः** - **देहि** 'दा' धातोर्लोट्लकारे तत्स्थाने सिपि, तस्य हौ **''दाधाघ्वदाप्''** इति घुसंज्ञायां, शपः श्लौ, द्वित्वे, अभ्यासत्वे ह्रस्वत्वे च कृते **''घ्वसोरेद्धावभ्यासलोपश्च''** इति एत्वे अभ्यासलोपे च कृते 'देहि' इति रूपं सिद्धम्।

**74. पदपरिचयः** - 'स्थाघ्वोः' (ष.द्वि.व.), 'इत्' (प्र.ए.व.), 'च' (अव्य.)।

**समास** - स्थाश्च घुश्च स्थाघू, तयोः स्थाघ्वोः (इतरे. द्वन्द्वः)।

**अनुवृत्तिः** - **''हनः सिच्'' (2.4.72)** इत्यस्मात् 'सिच्' **''असंयोगाल्लिट् कित्'' (1.2.5)** इत्यस्मात् 'कित्' **''लिङ्गसिचावात्मनेपदेषु'' (1.2.11)** इत्यस्मात् 'आत्मनेपदे' इत्यनुवर्तते। **''अलोऽन्त्यस्य''** इति परिभाषाऽपि उपतिष्ठते।

**75. दधस्तथोश्च 8 | 2 | 38 ||**

द्विरुक्तस्य झषन्तस्य धात्रो बशो भष् स्यात्तथोः स्ध्वोश्च परतः। धत्तः। दधति। दधासि। धत्थः। धत्थ। धत्ते। दधाते। दधते। धत्से। धद्ध्वे। घ्वसोरेद्धावभ्यासलोपश्च। धेहि। अदधात्, अधत्त। दध्यात्, दधीत। धेयात्। धासीष्ट। अधात्, अधित। अधास्यत्, अधास्यत॥ **णिजिर् शौचपोषणयोः॥ 11॥** (वार्तिकम्)॥ (इरः इत्संज्ञा वाच्या)

**76. णिजां त्रयाणां गुणः श्लौ 7 | 4 | 75 ||**

णिज्विज्विषामभ्यासस्य गुणः स्यात् श्लौ। नेनेक्ति। नेनिक्तः नेनिजति। नेनिक्ते। निनिजे। नेक्ता। नेक्ष्यते। नेनक्तु। नेनिग्धि॥

**77. नाभ्यस्तस्याचि पिति सार्वधातुके 7 | 3 | 87 ||**

लघूपधगुणो न स्यात्। नेनिजानि नेनिक्ताम्। अनेनेक्। अनेनिक्ताम्। अनेनिजुः। अनेनिजम्। अनेनिक्त। नेनिज्यात्। नेनिजीत। निज्यात्, निक्षीष्ट॥

---

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - स्थाधातोः तथा घुसंज्ञकानां धातूनाम् अन्त्यस्य अलः स्थाने इकारः आदेशः भवति तथा आत्मनेपदे प्रत्यये परे सति सिजादेशः किद्वद् भवति।

**विशेषार्थः** - उपसर्गयोगे - **आदत्ते-गृह्णाति, प्रदत्ते प्रददाति**-यच्छति, **व्याददाति**-उद्घाटयति, **सम्प्रदत्ते**-सम्यक् ददाति॥

**रूपसिद्धिः** - **अदित** - 'दा' धातो आत्मनेपदे प्रथमपुरुषैकवचने लङिस्तादेशे, अडागमे, अनुबन्धलोपे, च्लौ, च्लेः सिचि, इकारचकारयोरनुबन्धलोपे ''**दाधाघ्वदाप्**'' इति घुसंज्ञायां '**स्थाघ्वोरिच्च**' इति इदन्तादेशे, सिचः कित्त्वे च कृते, कित्त्वाद् गुणाभावे ''**ह्रस्वादङ्गात्**'' इति सिचः सस्य लोपे 'अदित' इति रूपं सिद्धम्।

**75. पदपरिचयः** - 'दधः' (ष.ए.व.), 'तथोः' (स.द्वि.व.), 'च' (अव्य.)।

**समासः** - त् च थ् च तथौ, तयोः तथोः (इतरे. द्वन्द्वः) तकारवर्ती अकारः उच्चारणार्थः।

**अनुवृत्तिः** - ''**एकाचो बशो भष् झषन्तस्य स्ध्वोः**'' **(8.2.37)** इत्यस्मात् 'झषन्तस्य' 'बशः' 'भष्' तथा 'स्ध्वोः' इत्यनुवर्तन्ते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - तकारे थकारे सकारे ध्वशब्दे च परे द्विरुक्तस्य झषन्तस्य धाञ्-धातोः बशःस्थाने भष् भवति।

**विशेषार्थः** - अस्य सूत्रस्य प्रवृत्तौ त्रयः ध्यातव्याः अंशाः - (1) द्वित्वभूतः धाञ् धातुः। (2) तस्य झषन्तता। (3) ततः परः तकारः थकारः सकारः अथवा ध्वशब्दो भवेत्। सूत्रप्रवृत्तौ एते त्रयः समुदिताः अंशाः अनिवार्याः। उपसर्गयोगे धातूनामर्थाः स्वयमेव ज्ञातव्याः।

**रूपसिद्धिः** - **धत्तः**-धाधातोः लटि, तत्स्थाने तसादेशे 'धा + तस्' इति जाते, सार्वधातुकसंज्ञायां, शपि, तस्य श्लुकार्ये, द्वित्वे, 'धा + धा + तस्' इति जाते, अभ्याससंज्ञायाम्, अभ्यासस्य ह्रस्वे 'ध + धा + तस्' इति जाते, ''**अभ्यासे चर्च**'' इत्यभ्यासस्य धस्य दकारादेशे - 'दधा + तस्' इति जाते, ''**श्नाभ्यस्तयोरातः**'' इत्याकारलोपे 'द ध् + तस्' इति जाते, ''दधस्तथोश्च'' इति अभ्यासदकारस्य स्थाने धकारादेशे 'ध + ध् + तस्' इति जाते, द्वितीयधकारस्य जश्त्वे, 'ध + द् + तस्' इति जाते ''खरि च'' इति दस्य तकारादेशे, सस्य रुत्वे विसर्गे 'धत्तः' इति रूपम्।

**76. पदपरिचयः** - 'णिजाम्' (ष.ब.व.), 'त्रयाणाम्' (ष.ब.व.)। गुणः। (प्र.ए.व.)

**अनुवृत्तिः** - ''**अत्र लोपोऽभ्यासस्य**'' **(7.4.58)** इत्यस्मात् 'अभ्यासस्य' इत्यनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - णिज्, विज् तथा विष् इत्येषां त्रयाणां धातूनाम् अभ्यासस्य स्थाने गुणो भवति, श्लौ परे।

**विशेषार्थः** - ''**इको गुणवृद्धी**'' इति परिभाषासूत्रनिर्देशेन गुणः अभ्यासस्य इकः स्थाने भवति।

**रूपसिद्धिः** - **नेनेक्ति** 'णिजर् शौच-पोषणयोः' इत्यस्माद् धातोः लटि, ''**इर इत्संज्ञा वाच्या**'' इति इत्संज्ञायां ''**तस्य लोपः**'' ''णो नः'' इति नत्वे, लटस्तिपि, शपि, शपः श्लौ, द्वित्वे, अभ्यासादिकार्ये ''**णिजां त्रयाणां गुणः श्लौ**'' इति अभ्यासस्य गुणे ''**चोः कुः**'' इति जस्य गत्वे ''**खरि च**'' इति गस्य कुत्वे, अनभ्यासस्य लघूपधगुणे **नेनेक्ति** इति रूपं सिद्धम्।

**77. पदपरिचयः** - 'न' (अव्य.), 'अभ्यस्तस्य' (ष.ए.व), 'अचि' (स.ए.व),पिति (स.ए.व.) 'सार्वधातुके' (स.ए.व.)।

**78. इरितो वा 3 | 1 | 57 ||**

इरितो धातोश्च्लेरङ् वा परस्मैपदेषु। अनिजत्, अनैक्षीत् अनिक्त। अनेक्ष्यत्, अनेक्ष्यत॥

---

**अनुवृत्तिः** - ''**पुगन्तलघूपधस्य च**'' **(7.3.86)** इत्यस्मात् 'लघूपधस्य', इत्यनुवर्तते। ''**मिदेर्गुणः**'' **(7.2.114)** इत्यस्मात् 'गुणः' इत्यनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अजादौ पिति सार्वधातुके परे अभ्यस्तस्य स्थाने लघूपधगुणो न भवति।

**विशेषार्थः** - इदं सूत्रं ''**पुगन्तलघूपधस्य च**'' इत्यस्य अपवादकम्॥

**रूपसिद्धिः** - **नेनिजानि** 'णिजर् शौच-पोषणयोः' इत्यस्माद्धातोर्लोटि ''इर इत्संज्ञा वाच्या'' इति इर इत्संज्ञायां लोपे च कृते ''**णो नः**'' इति धातोर्णस्य नत्वे, लोटः स्थाने मिपि ''**मेर्निः**'' इति मेर्न्यादेशे, सार्वधातुकसंज्ञायां, शपि, शपः श्लौ ''**श्लौ**'' इति द्वित्वे, अभ्याससंज्ञायां ''**हलादिः शेषः**'' इति अभ्याससम्बन्धिजकारस्य लोपे ''**आडुत्तमस्य पिच्च**'' इत्याटि, अनुबन्धलोपे, ''**णिजां त्रयाणां गुणः श्लौ**'' इत्यभ्यासस्य गुणे, आटः पित्त्वात् ''**पुगन्तलघूपधस्य च**'' इति गुणे प्राप्ते ''**नाभ्यस्तस्याचि पिति सार्वधातुके**'' इति निषेधे नेनिजानि इति रूपं सिद्धम्।

**78. पदपरिचयः** - 'इरितः' (प.ए.व.), 'वा' (अव्य.)।

**समासः** - इर् इत् यस्य स इरित्, तस्मात् 'इरितः' (बहु.)।

**अनुवृत्तिः** - ''**धातोरेकाचे हलादेः क्रियासमभिहारे यङ्**'' **(3.1.22)** इत्यस्मात् 'धातोः', ''**च्लेः सिच्**'' **(3.1.44)** इत्यस्मात् 'च्लेः' ''**अस्यतिवक्तिख्यातिभ्योऽङ्**'' **(3.1.22)** इत्यस्मात् 'अङ्' । ''**पुषादिद्युताद्यलृदितः परस्मैपदेषु**'' इत्यतः 'परस्मैपदेषु' इत्यनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - इरितः धातोः परे च्लेः स्थाने विकल्पेन अङ् आदेशो भवति, परस्मैपदे प्रत्यये परे।

**विशेषार्थः** - यस्य धातोः 'इर्' इत्यस्य इत् संज्ञा भवति सः धातुः इरित् कथ्यते यथा-णिजिर् धातुः॥

**रूपसिद्धिः** - **अनिजत्, अनैक्षीत्** - इरित्संज्ञक 'णिज्' धातोर्लुङि ''**णो नः**'' इति धातोः णस्य नत्वे, लुङः स्थाने तिप्यनुबन्धलोपे, ''**इतश्च**'' इति तिप इकारलोपे, ''**लुङ्लङ्..**'' इत्यटि अनुबन्धलोपे ''**च्लि लुङि**'' इति च्लौ ''**इरितो वा**'' इति विभाषया च्लेरङादेशे, अनुबन्धलोपे, ङित्वात् गुणाऽभावे, 'अनिजत्' इति रूपं सिद्धम्। अङभावे च्लेः सिच्यनुबन्धलोपे ''**अस्तिसिचोऽपृक्ते**'' इत्यपृक्तसंज्ञकस्य तिपस्तकारस्य ईटि वदव्रजे ति वृद्धौ जस्य कुत्वे सस्य षत्वे 'अनेक्षीत्' इति रूपं सिद्धं भवति।

**स्वाध्यायः**

**1. योग्यविकल्पं चित्वा उत्तरं लिखत।**

(1) 'आदत्ते' इत्यस्य कः अर्थः ?

(क) ददाति (ख) पृच्छति (ग) गृह्णाति (घ) ब्रूते

(2) 'अदाप्' इत्यनेन कस्य निषेधः नास्ति ?

(क) दाप्-लवने (ख) दैप्-शोधने (ग) दाण्-दाने (घ) एषु एकः अपि न

(3) अत्र 'ड्वित्' धातुः कः नास्ति ?

(क) दधाति (ख) दधाते (ग) बिभर्ति (घ) जहाति

(4) 'घु' संज्ञकाः कति धातवः ?

(क) पञ्च (ख) षड् (ग) सप्त (घ) अष्ट

(5) 'ओहाक्-त्यागे' इत्यस्य लोटि म.पु. ए.वचने किं भवति ?

(क) जहाहि (ख) जिहिहि (ग) जहीहि (घ) एतानि त्रीणि

(6) दशगणेषु जुहोत्यादिः कस्मिन् क्रमे वर्तते ?

(क) चतुर्थे (ख) पञ्चमे (ग) षष्ठे (घ) सप्तमे

(7) ''दाधा घ्वदाप्'' इति सूत्रघटके 'दाधा' इति पदे कः समासः ?

(क) एकशेषद्वन्द्वः (ख) इतरेतरद्वन्द्वः (ग) उभौ (घ) एषु एकः अपि न

(8) ''इक्श्तिपौ धातुनिर्देशे'' इति वार्तिकस्य कस्मिन् सूत्रघटकपदे प्रयोगः दृश्यते ?

(क) 'जुहोत्यादिभ्यः श्लुः' (ख) 'अर्तिपिपर्त्योश्च' (ग) 'जहातेश्च' (घ) एषु त्रिषु अपि

**2. एकैकवाक्येन उत्तराणि लिखत।**

(1) 'हु' धातोः लोटि म.पु. एकवचने के आदेशाः भवन्ति ?

(2) 'पिपूर्तः' इत्यत्र खरि परे सत्यपि रेफस्य विसर्गादेशः किमर्थं न भवति ?

(3) 'पिपरिथ' अत्र ''वृतो वा'' इत्यनेन दीर्घः किमर्थं न भवति ?

(4) ''जुसि च'' इत्यस्य सूत्रार्थे 'इकः' इति षष्ठ्यन्तं पदं केन सूत्रेण किमर्थञ्च उपतिष्ठते ?

(5) 'वृतः' इति पदेन केषां धातूनां ग्रहणं भवति ?

(6) 'भृञाम्' इति निर्देशेन केषां धातूनां ग्रहणं भवति ?

(7) 'दा' 'धा' रूपाः के धातवः ?

(8) 'णिजाम्' इति पदेन के धातवः गृह्यन्ते ?

(10) अवोचत् इति रूपं कस्य लकारस्य ?

**3. सविस्तरम् उत्तरं लिखत।**

(1) ''दधस्तथोश्च'' इतीदं सूत्रं सवृत्त्युदाहरणं विवृणुत

(2) 'घु' संज्ञककार्याणि ससूत्रं निरूपयत।

(3) 'हु' धातौ जुहोत्यादिगणवर्तिसूत्रैः प्रतिपादितकार्याणि दर्शयत।

**4. निम्नलिखितानि रूपाणि साधयत।**

(1) जुहोति (2) जुहुवाञ्चकार (3) पिपूर्तः (4) बिभीतः

(5) जहाहि (6) अदित (7) नेनेक्ति (8) अनिजत्

**5. अधोलिखितानि सूत्राणि व्याख्यात ।**

(1) भी-ह्री-भृ-हुवां श्लुवच्च।

(2) उदोष्ठ्यपूर्वस्य।

(3) दधस्तथोश्च।

(4) णिजां त्रयाणां गुणः श्लौ।

•

| 6 | दिवादिप्रकरणम् |
|---|---|

**79. सूत्रम् :- ''दिवादिभ्यः श्यन्'' (3.1.68)** शपोऽपवादः हलि चेति दीर्घः । दीव्यति । दिदेव देविता । देविष्यति दीव्यतु । अदीव्यत् । दीव्येत् दीव्यात् । अदेवीत् । अदेविष्यत् एवं **षिवु तन्तुसन्ताने** ॥ 2। **नृती गात्रविक्षेपे** ॥ 3॥ नृत्यति । ननर्त । नर्तिता

**80. सूत्रम् - सेऽसिचि कृत - चृत - च्छृद - तृद - नृतः । ( 71-2-57 )**

एभ्यः परस्य सिज्भिन्नस्य सादेः आर्धधातुकस्य इड् वा । नर्तिष्यति - नर्त्स्यति । नृत्यतु अनृत्यत् । नृत्येत् । नृत्यात् । अनर्तीत् । अनर्तिष्यत् - अनर्त्स्यत् । **त्रसी उद्वेगे ॥ वा भ्राशेति श्यन्वा ।** त्रस्यति, त्रसति । तत्रास

---

**79. पदपरिचयः** - दिवादिभ्यः (पं. ब. व.), श्यन् (प्र. ए. व.)

**समासः** - दिव् आदिः येषां ते दिवादयः, तेभ्यः दिवादिभ्यः इति तद्गुणसंविज्ञानबहुव्रीहिः ।

**अनुवृत्तिः - कर्तरि शप्** (3.1.68) इत्यस्मात् 'कर्तरि' इति

शप् इति च अनुवर्तते । सार्वधातुके यक् (13.1.67) ''सार्वधातुके यक्'' इत्यस्मात् 'सार्वधातुके' इत्यनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम् ।

सरलार्थः - दिवादिगणे पठितेभ्यः धातुभ्यः श्यन् प्रत्ययः जायते, कर्तृवाचिनि सार्वधातुके प्रत्यये परे।

**विशेषार्थ :** अस्मिन् सूत्रे श्यन् इत्यत्र श् तदर्थं संयोजितः, येन **तिङ्शित्सार्वधातुकम्** इत्यनेन सार्वधातुकसंज्ञा भवेत्। श्यन् इत्यत्र नकारः **ञ्नित्यादिर्नित्यम्** सूत्रेणानेन आद्युदात्तस्वरार्थं संयोजितः । अत्र श्यन्प्रत्ययस्य शस्य **लशक्वतद्धिते** इत्यनेन सूत्रेण इत्संज्ञा, **तस्य लोपः** इत्यनेन शलोपे, नस्य इत्संज्ञा **हलन्त्यम्** इत्यनेन, **तस्य लोपः** इत्यनेन च नलोपः विधेयः।

**80. पदपरिचयः** से (स. ए.व.), समासः असिचि (स.ए.व.) कृत-यृत - (प.ए.व.) न सिच् - असिच् - तस्मिन् असिचि-नञ्-तत्पुरुषः। कृतश्च, चृतश्च, च्छृदश्च, तृदश्च, नृत् च - कृतचृतच्छृदतृदनृत्, तस्मात् कृतचृतच्छृदतृदनृतः - समाहारद्वन्द्वः।

**अनुवृत्तिः : आर्धधातुकस्येड् वलादेः** (७-३-३५) सूत्रात् वा इति अनुवर्तते ।

**सूत्रप्रकार :** विधिसूत्रम् ।

**सरलार्थः** कृत् - चृत् - च्छृद् - तृद् - नृत् - एतेभ्यः धातुभ्यः परस्य सिज्भिन्नस्य सकारादेः आर्धधातुकप्रत्ययस्य विकल्पेन इड् भवति ।

**विशेषार्थः** - 'से' इत्यस्य 'स' इति मूलरूपम्। तत्र विद्यमानः अकारः उच्चरणार्थः। अत्र षष्ठ्यर्थे सप्तमी ज्ञेया। 'स' इति विशेषणत्वात् तदादिवधौ कृते - सकारादेः आर्धधातुकस्य इत्यर्थो लभ्यते। कृतेत्यादयः धातवः सेटः सन्ति। तेभ्यः नित्यम् इडागमः प्राप्यते। किन्तु सिज्भिन्नस्य सकारादेः आर्धधातुकस्य विकल्पेन इडागमं सूत्रमिदं शास्ति। सुषुविवहे इत्यादिरूपाणि सिध्यन्ति।

**रूपसिद्धिः - नर्तिष्यति-नर्त्स्यति 'नृती गात्रविक्षेपे'** इत्यस्मात् धातोः लृट्लकारे तस्य तिबादेशेऽनुबन्धलोपे, सार्वधातुकत्वात् शपि प्राप्ते, तं प्रबाध्य **''स्यतासी लृलुटोः''** इत्यनेन स्यप्रत्यये, तस्य आर्धधातुकसंज्ञायां **''सेऽसिचि कृतचृतच्छृदतृदनृतः''** इत्यनेन विकल्पेन इडागमे 'नृत् + इ + स्य + ति' इति जाते, **''पुगन्तलघूपधस्य च''** इत्यनेन गुणे रपरत्वे च, 'नर्त् + इस्य + ति' इति जाते, **''आदेशप्रत्यययोः''** इत्यनेन सस्य षकारे - 'नर्तिष्यति' इति रूपं सिद्ध्यति। इडभावे - 'नर्त्स्यति' इति रूपं जायते।

81. **सूत्रम्ः - वा जॄभ्रमुत्रसाम् ( 6-4-124 )**

एषां किति लिटि सेटि थलि च एत्वाभ्यासलोपौ वा । त्रेसतुः तत्रसतुः त्रेसिथ, तत्रसिथ । त्रसिता । **शो तनूकरणे** ॥ 5 ॥

**82. सूत्रम् - ओतः श्यनि (7-3-71)**

लोपः स्यात्।

श्यति । श्यतः । श्यन्ति । शशौ । शशतुः । शाता । शास्यति

---

**81. पदपरिचय :** वा - (अव्ययपदम्) जॄभ्रमुत्रसाम् (ष. ब. व.)

**समासः** - जॄश्च भ्रमुश्च त्रस् च जॄभ्रमुत्रसः, तेषां जॄभ्रमुत्रसाम् इति इतरेतरद्वन्द्वः ।

**अनुवृत्तिः** - ''**अत एकहल्मध्येऽनादेशादेर्लिटि**'' (6-4-120) इत्यस्मात् सूत्रात् 'अतः' 'लिटि' इति पदद्वयम् अनुवर्तते । **घ्वसोरेद्धावभ्यासलोपश्च** (6-4-119) इत्यस्मात् एत् इति अनुवर्तते । **गमहनजनखनघसां लोपः क्ङित्यनङि** इत्यस्मात् किति इति अनुवर्तते । ''**थलि च सेटि**'' इति सम्पूर्णं सूत्रम् अनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्

**सरलार्थः** - कित्संज्ञके लिटि परे तथा इडागमसहिते थलि परे (जॄ, भ्रमु, त्रस्) एतेषां त्रयाणां धातूनाम् एत्वम्, अभ्यासलोपश्च विकल्पेन भवतः ।

**विशेषार्थ :** जॄधातोः द्वित्वम् अपि च ''**ऋच्छत्यॄताम्**'' (7-4-11) इत्यनेन गुणे, रपरत्वे च जर् + अतुस् इत्यवस्थायां गुणशब्दत्वात् **न शसददवादिगुणानाम्** (6-4-126) इत्यनेन एत्वाभ्यासलोपौ न प्राप्तौ स्तः । 'भ्रमु अनवस्थाने' इत्यस्मिन् धातौ असंयुक्तहल्मध्ये न स्थितत्वात्, अपि च आदौ ''लिण्णिमित्तक'' आदेशत्वात् न प्राप्तः, इत्थम् सर्वेषु धातुषु अप्राप्तत्वात्, अनेन सूत्रेण वैकल्पिकविधानं कृतम् अतः इयम् ''अप्राप्तविभाषा'' वर्तते । यथा - **जॄष वयोहानौ** - जेरतुः, जजरतुः। भ्रमु अनवस्थाने भ्रेमतुः, बभ्रमतुः । त्रसी उद्वेगे - त्रेसतुः - तत्रसतुः । त्रेसुः - तत्रसुः। सेटि इत्यस्मात् सूत्रात् (6-4-121)

**रूपसिद्धिः** - त्रेसतुः ''त्रसी उद्वेगे'' इत्यस्माद्धातोः ''**परोक्षे लिट्**'' इत्यनेन लिट् लकारे त्रस् + लिट् इति जाते, ''**तिप्तस्झि**'' इत्यादिसूत्रेण, तसादेशे, 'त्रस् + तस्' इति जाते, ''**परस्मैपदानां णलतुसुस्थलथुसणल्वमाः**'' इति तसः अतुसादेशे, ''वा-जॄभ्रमुत्रसाम्'' इत्यनेन विकल्पेन एत्वाभ्यासलोपयोः कृतयोः सस्य रुत्वे विसर्गे च - 'त्रेसतुः' इति रूपं सिद्ध्यति। एत्वाऽभ्यासलोपाऽभावे 'तत्रसतुः' इति रूपम्।

**82. पदपरिचयः** - ओतः (ष. ए. व) श्यनि (स. ए. व.)

**अनुवृत्ति** - ''**घोर्लोपो लेटि वा**'' (7-3-70) सूत्रात् ''लोपः'' इति अनुवर्तते ।

**सूत्रप्रकारः** - विधिसूत्रम् ।

**सरलार्थः** - श्यन् प्रत्यये परे ओकारस्य लोपः स्यात्

**विशेषार्थः** - लिटः आर्धधातुकत्वात् अत्र 'श्यन्' प्रत्ययो न विधीयते। अतः शित्प्रत्ययपरकत्वाऽभावात् ''**आदेच उपदेशेऽशिति**'' इत्यनेन 'शो' इत्यस्य ओकारस्य स्थाने आकारादेशे 'शा' इत्ययं धातुः आकारान्तः सञ्जायते। इतः परं 'पा-पाने' इति धातोः इव प्रक्रियाः सर्वाः एतस्य धातोः भवन्ति।

**रूपसिद्धिः** - **'श्यति' 'शो तनूकरणे'** इत्यस्मात् धातोः लिट् लकारे तिपि कृते ''**दिवादिभ्यः श्यन्**'' इत्येनन श्यनप्रत्ययेनितः अनुबन्धलोपे च शो + य + ति इति जाते ''**ओतः श्यनि**'' इत्यनेन ओकारस्य लोपे वर्णसम्मेलने श्यति इति सिद्धम्।

**83. सूत्रम् : विभाषा घ्राधेट्शाच्छासः (2-4-70)**

एभ्यः सिचो लुग् वा स्यात् परस्मैपदे परे ।

अशात् । अशाताम्, अशुः । इट्सकौ अशासीत् । अशासिष्टाम् ।

**छो छेदने** ॥ 6 ॥ छ्यति । **षोऽन्तकर्मणि** ॥ 7 ॥ स्यति । ससौ । **दोऽवखण्डने** ॥ 8 ॥

द्यति । ददौ । देयात् । अदात् । **व्यध ताडने** ॥ 9 ॥

**84. सूत्रम् - ग्रहि - ज्या वयि - व्यधि - वष्टि - विचति - वृश्चति - पृच्छति - भृज्जतीनां ङिति च (6-1-16)**

**एषां** सम्प्रसारणं स्यात् किति ङिति च । विध्यति । विव्याध । विविधतुः । विविधुः । विव्यधिथ, विव्यद्ध। व्यद्धा । व्यत्स्यति । विध्येत् । विध्यात् । अव्यात्सीत् । **पुष पुष्टौ ॥ 10 ॥** पुष्यति । पुपोष । पुपोषिथ । पोष्टा । पोक्ष्यति। पुषादीत्यङ् । अपुषत् । **शुष शोषणे ॥ 11 ॥** शुष्यति । शुशोष । अशुषत् । **णश अदर्शने ॥ 12 ॥** नश्यति । ननाश । नेशतुः ।

---

**83. पदपरिचयः** - विभाषा (प्र. ए. व), ध्राधेट्शाच्छासः (पं.ए.व.)

**समासः** - घ्राश्च घ्राट् च शास् च छाश्च साश्च तेषां समाहारः घ्राधेट्शाच्छास्, तस्मात् घ्राधेट्शाच्छासः इति समाहारद्वन्द्वः।

**अनुवृत्तिः** - ''**गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु**'' (2-4-77) इति सूत्रात् सिचः एवम् परस्मैपदेषु इति अनुवर्तते। ''**ण्यक्षत्रियार्षञितो यूनि लुगणिञोः**'' इत्यस्मात् 'लुक्'इत्यनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम् ।

**सरलार्थः** - परस्मैपदे प्रत्यये परे घ्रा, धेट्, शो, छो, षो एभ्यो धातुभ्यः परस्य सिचः विकल्पेन लोपः भवति ।

**विशेषार्थः** - 'च्छ' इत्यत्र सन्धिजन्येन तुगागमकारणेन मध्ये चकारः श्रूयते। 'धा' इत्यनेन डुधाञ्धातोः ग्रहणं न स्यात् इत्येतदर्थं धेट्धातोः आत्वं न कृत्वा साक्षात् 'धेट्' इति निर्देशः कृतः। 'शो' इति धातोः उपसर्गयोगे 'निश्यति' इति रूपम्भवति। भट्टिकाव्ये यथा - ''**न्यश्यन् शस्त्राणि**'' भट्टिस्तु 'छो' धातुरपि 'शो' धातुवत् परस्मैपदी अनिट् चाऽस्ति इति वदति।

**रूपसिद्धिः - अशात्** - 'शो तनूकरणे' इत्यस्माद्धातोः लुङ् लकारे, तिपागमे अडागमे ''**च्लि लुङि**'' इत्यनेन शपं बाधित्वा च्लिप्रत्यये ''**च्लेः सिच्**'' च्लिस्थाने सिजादेशे, आत्वे कृते अ + शा + स् + त् ''**विभाषा घ्राधेट्शाच्छासः**'' इत्यनेन 'सिच' इत्यस्य वैकल्पिकलोपे 'अशात्' इति सद्धिम्

**84. पदपरिचय :** - ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां (ष, ब, व), ङिति - (स. ए. व.), च - (अव्यय.)

**समास :** ग्रहिश्च ज्याश्च वयिश्च व्यधिश्च वष्टिश्च विचतिश्च वृश्चतिश्च पृच्छतिश्च भृज्जतिश्च इति ग्रहिज्यावयिव्यधिवष्टि-विचतिवृश्चतिपृच्छति-भृज्जतयः, तेषां ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छति भृज्जतीनाम् इतेरतरद्वन्द्वः ।

**अनुवृत्तिः** - ''**वचिस्वपियजादीनां किति**'' 6-1-15 सूत्रात् किति पदम् अनुवर्तते। ''**ष्यङः सम्प्रसारणम् पुत्रप्रत्योः तत्पुरुषे**'' (6-1-13) इत्यस्मात् 'सम्प्रसारणम्' इत्यनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम् ।

**सरलार्थः** - ग्रह्, ज्या, वय्, व्यध्, वश्, व्यच्, व्रश्च्, प्रच्छ्, भ्रस्ज् इत्येषां धातूनां सम्प्रसारणं भवति, किति ङिति च प्रत्यये परे।

**विशेषार्थः** - सम्प्रसारणं नाम किम् ? ''**इको यणचि**'' इत्यस्य सूत्रस्य विरुद्धादेशकार्यं नाम सम्प्रसारणम्। अतः ''**इग्यणः सम्प्रसारणम्**'' इत्यनेन सूत्रेण ''यण्'' स्थाने आदिष्टः इग्वर्णः सम्प्रसारणसंज्ञकः भवति। अपि च ''**सम्प्रसारणाच्च**'' (6-1-108) इत्यनेन सूत्रेण पूर्वरूपैकादेशः जायते। विध्यति रूपं सिद्ध्यति। परं ध्यानं दातव्यम्

**85. सूत्रम् : रधादिभ्यश्च (7-2-45)**

रध्, नश्, तृप्, दृप्, दुह्, मुह्, ष्णुह्, ष्णिह् एभ्यो वलाद्यार्धधातुकस्य वेट् स्यात्। नेशिथ।

**86.** सूत्रम् : **मस्जिनशोर्झलि (7-1-60)**

नुम स्यात् । ननंष्ठ । नेशिव, नेश्व । नेशिम, नेश्म। नशिता, नष्टा। नशिष्यति, नङ्क्ष्यति। नश्यतु। अनश्यत्, नश्येत्। नश्यात्। अनशत। **षूङ् प्राणिप्रसवे ॥ 13॥** सूयते। सुषुवे। क्रादिनियमादित्। सुषुविषे। सुषुविवहे। सुषुविमहे। सविता, सोता। **दूङ् परितापे ॥ 14॥ दूयते दीङ् क्षये ॥ 15॥** दीयते।

---

**''न सम्प्रसारणे सम्प्रसारणम्''** (6-1-37) इति सूत्रानुसारं वकारस्य सम्प्रसारणं न भवेत् ।

**रूपसिद्धिः - विध्यति** ''व्यध ताडने'' इत्यस्मात् धातोः लट्लकारे **''तिप्तस्झि...''** इत्यादिसूत्रेण तिबादेशे, **''दिवादिभ्यः श्यन्''** इति श्यनि - 'व्यध् + य + ति' इति स्थिते, **''ग्रहिज्यावयिव्यधिवष्टिविचति-वृश्चति-पृच्छति-भृज्जतीनां ङिति च''** इत्यनेन यकारस्य सम्प्रसारणे, 'व् + इ अध् + य + ति' इति जाते, **''सम्प्रसारणाच्च''** इति पूर्वरूपैकादेशे - 'विध् + य + ति' इति जाते, वर्णसंयोगे 'विध्यति' इति रूपं सिद्ध्यति।

**85. पदपरिचयः** - रधादिभ्यः (पं. ब. व.) च (अव्य.)

**समासः** - रध् आदिः येषां ते रधादयः, तेभ्यः रधादिभ्यः तद्गुणसंविज्ञानबहुव्रीहिः।

**अनुवृत्तिः - ''आर्धधातुकस्येड् वलादेः''** (7-2-35) इति सम्पूर्णसूत्रम् अनुवर्तते। **''स्वरतिसूतिसूयतिधूञूदितो वा''** इत्यस्मात्सूत्रात् 'वा' इत्यनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम् ।

**सरलार्थः** - रध्, नश्, तृप्, दृप्, द्रुह्, मुह्, ष्णुह्, ष्णिह् इति अष्टभ्यः धातुभ्यः परस्य वलाद्यार्धधातुकस्य विकल्पेन इडागमो भवति।

**विशेषार्थः** - अत्र अष्टाभ्यः धातुभ्यः तृप्, दृप् इमौ द्वौ धातू अनिटौ वर्तेते । एभ्यः वलादिधातुभ्यः इट्निषेधः प्राप्तः। शेषधातवः, सेट्धातवः सन्ति। तेभ्यः नित्यम् इट् प्राप्तः आसीत्। परम् अनेन सूत्रेण सर्वेभ्यः धातुभ्यः परे विकल्पेन इडागमः कृतः।

**रूपसिद्धिः - नेशिथ** - ''णश अदर्शने'' इत्यस्मात् धातोः लिटि, सिपि तत्स्थाने थलादेशेऽनुबन्धलोपे धातोः द्वित्वे, अभ्यासत्वे, हलादिशेषे 'न + नश् + थ' इति जाते, **''आर्धधातुकस्येड्वलादेः''** इति नित्यमिडागमे प्राप्ते, तं प्रबाध्य **''रधादिभ्यश्च''** इति विकल्पेन इडागमे, **''थलि च सेटि''** इति एत्वाभ्यासलोपयोः 'नेशिथ' इति रूपं जायते।

**86. पदपरिचयः** - मस्जिनशोः (ष. द्वि. व.), झलि (स. ए. व.)

**समासः** - मस्जिश्च नश् च इति मस्जिनशौ, तयोर्मस्जिनशोः इति इतरेतरद्वन्द्वसमासः

**अनुवृतिः - ''इदितो नुम् धातोः''** (7-1-58) इति सूत्रात् नुम् अनुवर्तते ।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - मस्ज् - नश् (णश) इति धातुद्वयस्य नुमागमो भवति झल्प्रत्याहारे परे।

**विशेषार्थः** - 'नंष् + ता' इत्यत्र पदान्ताऽभावात् **''नशेर्वा''** इति कुत्वं न भवति। दिवादिगणीयात्मनेपदिधातुषु ''षूङ् प्राणिप्रसवे'' इत्ययं धातुः प्रथमः धातुः वर्तते। अस्य धातोः विषये तत्वबोधिनीकर्ता श्रीज्ञानेन्द्रस्वामी कथयति लोके - ''मृत्पिण्डो घटं सूयते'' इत्यादिधातुप्रयोगाभावात् धातोः अर्थनिर्देशे ''प्राणि'' शब्दः गृह्यते। परम् अन्ये वैयाकरणाः प्राणिशब्दग्रहणं गौणं मन्यन्ते। अत एव गीतायां - **मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम्**। अपि च हलायुधकोशस्य **''धर्ममर्थः प्रसूयते''** इति वचनम् उपपद्यते।

**87.** सूत्रम् :- **दीङो युडचि क्ङिति॥ (6-4-63)**

दीङः परस्याजादेः क्ङितः आर्धधातुकस्य युट् । वार्तिकम्-**वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ।** दिदीये।

**88.** सूत्रम् : **मीनातिमिनोतिदीङां ल्यपि च** (6-1-50)

एषामात्त्वं ल्यपि चकारात् अशित्येज्निमित्ते। दाता। दास्यति।

**वार्तिकम् - स्थाघ्वोरित्त्वे दीङः प्रतिषेधः।** अदास्त। **डीङ् विहायसा गतौ ॥16॥**

डीयते। डिड्ये। डयिता। **पीङ् पाने** ॥17॥

पीयते। पेता। अपेष्ट। **माङ् माने** ॥18॥

मायते। ममे। **जनी प्रादुर्भावे** ॥19॥

---

**रूपसिद्धिः - 'ननंष्ठ'** ''णश अदर्शने'' इत्यस्मात् धातोः लिटि, सिपि, तत्स्थाने थलादेशे, अभ्यासत्वे, हलादिशेषे, 'न + नश् + थ' इति जाते, ''रधादिभ्यश्च'' इति विकल्पेन इडागमाभावपक्षे, **''व्रश्चभ्रस्जसृज-मृज-यजराजभ्राजच्छशां षः''** इति शस्य षकारे, **''नश्चाऽपदान्तस्य झलि''** इति अपदान्तनकारस्य अनुस्वारे, ष्टुत्वे च कृते - 'ननंष्ठ' इति रूपं जायते।

**87. पदपरिचयः** - दीङः (पं., ए.व.) युट् (प्र. ए. व.) अचि (स, ए. व) क्ङिति (स, ए, व)

**समासः** - क्ङिति-क् च ङ् च - क्ङौ, क्ङौ इतौ यस्य तत् 'क्ङित्', तस्मिन् 'क्ङिति' इति द्वन्द्वगर्भितबहुव्रीहिः।

**अनुवृत्तिः** - **'आर्धधातुके'** इति सूत्रमत्राऽधिक्रियते।

**सूत्रप्रकारः** विधिसूत्रम्।

**सरलार्थः** - दीङ् धातोः परे कितः ङितः अजादेः आर्धधातुकस्य युडागमः भवति। (वार्तिकार्यः) यत्र उवङ्यणौ कर्तव्यौ, तत्र वुग्युटौ सिद्धौ भवतः।

**विशेषार्थः** - 'युट्' इत्यत्र टकारस्य इत्संज्ञात्वात् सः आगमः 'टित्' अस्ति। तस्मात् ''आद्यन्तौ टकितौ'' इति आद्यवयवत्वं जायते युडागमस्य। किन्तु युडागमः कस्य आद्यवयवः ? दीङः अथवा अजादिप्रत्ययस्य ? इति प्रश्नः उत्पद्यतेऽत्र। तत्समाधातुं परिभाषाऽश्रियते **''उभयनिर्देशे पञ्चमीनिर्देशः बलीयान्''** इति। पञ्चमीनिर्देशस्य प्राधान्यात् युडागमः अजादिप्रत्ययस्यैव आद्यवयवः वर्तते, न तु दीङः। अन्याऽपि काचित् शंका विद्यते यत् युडागमस्य नित्यवात्, तस्य पूर्वं विधानेऽपि 'दिदी + ये' इति दशायाम् **''असिद्धवदत्राऽभात्''** इति सूत्रसहकारेण युटः असिद्धत्वात् 'दिदी + ए' इत्येव भवति। परत्र अजादिप्रत्ययत्वात् च **''एरनेकाचोऽसंयोगपूर्वस्य''** इत्यनेन किमर्थं यणादेशः न स्यात् ? इति शङ्कामिमां समाधातुम् अधोनिर्दिष्टं वार्तिकमत्रोपस्थाप्यते।

**वार्तिकम् - 'वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ॥'**

**सरलार्थः** - उवङादेशे कर्तव्ये वुगागमः सिद्धः भवति। तथा यणादेशे कर्तव्ये युडागमः सिद्धः भवति।

**विशेषार्थः** - वार्तिकमिदम् **''असिद्धवदत्राऽभात्''** इति सूत्रे भाष्ये पठितमस्ति। अत्र यथासंख्यपरिभाषायाः आश्रयः क्रियते। उवङादेशे कर्तव्ये वुगागमः सिद्धः भवति। यथा - 'बभूव् + अतुस्' इत्यत्र **'असिद्धवदत्राभात्'** इत्यनेन वुगागमम् असिद्धं मत्त्वा **''अचिश्नु.''** इत्यनेन सूत्रेण वुगागमस्य सिद्धे जाते, अजादिप्रत्ययपरकत्वाऽभावात् उवङादेशः न भवति।

**रूपसिद्धिः - दिदीये** - ''दीङ् क्षये'' इत्यस्मात् धातोः लिट् लकारे तिपि, तत्स्थाने शादेशेऽनुबन्धलोपे, धातोः द्वित्वे, अभ्यासत्वे, ह्रस्वे - 'दिदी + ए' इति जाते **''दीङो युडचि क्ङिति''** इत्यनेन युडागमेऽनुबन्धलोपे दिदी + य् + ए इति जाते **'असिद्धवदत्राभात्'** इति नियमेन **'एरनेकाचोऽसंयोगपूर्वस्य'** **''असिद्धवदत्राभात्''** इति नियमेन

**89. सूत्रम् : ज्ञाजनोर्जा (7-3-79)**

अनयोर्जादेशः स्यात् शिति। जायते। जज्ञे। जनिता। जनिष्यते।

**90. सूत्रम् :- दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम् (3-1-61)**

एभ्यश्चच्लेश्चिण् वा स्यादेकवचने त-शब्दे परे।

---

युडागमस्याऽसिद्धौ ''**एरनेकाचोऽसंयोगपूर्वस्य**'' इत्यनेन यणादेशे प्राप्ते, ''**वुग्युटौ उवङ्यणोः सिद्धौ वक्तव्यौ**'' इति वार्तिकेन युडागमस्य सिद्धे 'दीदीये' इति रूपं सिद्ध्यति।

**88. पदपरिचयः** - मीनातिमिनोतिदीङां (ष. ब. व.)

ल्यपि (स. ए. व.), च (अव्ययपदम्)

**समासः** - मीनातिश्च मिनोतिश्च दीङ् च मीनातिमिनोतिदीङः, तेषां मीनातिमिनोतिदीङाम् इति इतरेतरद्वन्द्वसमासः

**अनुवृत्तिः- आदेच उपदेशेऽशिति** (6-1-44) इति सम्पूर्णं सूत्रमनुवर्तते

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - ल्यप्प्रत्ययविषये अथवा एच्प्रत्याहारवर्णोद्भावकशिद्भिन्नप्रत्ययविषये, मीञ्, मिञ्, दीङ् इत्येषां त्रयाणां धातूनाम् अन्त्यस्य अलः स्थाने आकारादेशः भवति।

**विशेषार्थः** - सूत्रेऽस्मिन् 'उपदेशे' इत्यनुवर्तनेन प्रकृतसूत्रेण क्रियमाणमात्त्वम् उपदेशदशायामेव सम्भवति किन्तु यदि आत्त्वमिदम् उपदेशे स्यात्तर्हि ल्यबादिप्रत्ययपरकत्वं कथं स्यात् ? अतः 'ल्यपि' इत्यत्र विषयसप्तमी स्वीक्रियते। एचः इति पदं मीनातीत्यादिनां विशेषणं न स्वीकर्तुं शक्यते। यतः सूत्रोपात्तधातुषु न कश्चिद् एजन्तधातुरस्ति। अतः 'एचः' इति पदस्यार्थः अपि एज्विषये इत्यर्थः। तन्नाम एच्प्रत्याहारवर्णोद्भावकप्रत्ययविषये इति।

**वार्तिकम् - स्थाघ्वोरित्त्वे दीङः प्रतिषेधः।**

**अर्थः** - ''**स्थाघ्वोरिच्च**'' इत्यनेन घुसंज्ञकधातोः क्रियमाणः इकारादेशः अनेन वार्तिकेन निषिध्यते। एतन्निषेध कारणादेव 'अदा + स् + त' इत्यत्र इत्त्वाऽभावे 'अदास्त' इति रूपं सिद्ध्यति।

**रूपसिद्धिः - दाता** - 'दीङ् क्षये' इति धातोः लुटि, तत्स्थाने तप्रत्यये, शपं बाधित्वा तासि कृते, तप्रत्ययस्य स्थाने डाऽदेशेऽनुबन्धलोपे च - 'दी + तास् + आ' इति जाते, ''**मीनातिमिनोतिदीङां ल्यपि च**'' इत्यनेन धातोः ईकारस्य आत्त्वे, टिभागलोपे च - 'दाता' इति रूपं जायते।

**89. पदपरिचयः** - ज्ञाजनोः (ष. द्वि. व.), जा (प्र. ए. व.)

**समास** - ज्ञाश्च जन् च इति ज्ञाजनौ, तयोः ज्ञाजनोः इति इतरेतरद्वन्द्वसमासः।

**अनुवृत्तिः - ष्ठिवुक्लमुचमां शिति** (7-3-75) इति सूत्रात् शिति अनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्

**सरलार्थः** - ज्ञा, जन् इति धातुद्वयस्य स्थाने 'जा' इत्यादेशः भवति, शिति प्रत्यये परे।'

**विशेषार्थः** - अत्र अनेकालत्वात् 'जा' आदेशः सम्पूर्णस्य जन्धातोः ज्ञाधातोश्च स्थाने भवति इत्यवधेयम्। जन् धातुः वेदे-लोके च अत्यन्तं प्रसद्धिोऽस्ति। जनः, जननी, जनकः, जातिः, जाया, इत्यादिशब्दाः अस्माद्धातोः निष्पद्यन्ते। 'जनीँ' इत्यस्मिन् ईकारः अनुनासिकः एवमनुदात्तः वर्तते। ईदित्कर्तृकप्रयोजनं '**श्वीदितो निष्ठायाम्**' इत्यनेन इट् निषेधः। अतः जातः, जातवान् रूपे सिद्ध्यतः। अत्र 'जनसनखनां सञ्झलोः' इत्यनेन आत्वम्। जन इति अनुदात्तधातुः वर्तते।

**रूपसिद्धिः - जायते** - 'जनी प्रादुर्भावे' इत्यस्मात् धातोः लटि, तप्रत्यये, श्यन्प्रत्यये च कृते, ''**ज्ञाजनोर्जा**'' इत्यनेन जन्धातोः स्थाने जादेशे, एत्वे च कृते 'जायते' इति रूपं सिद्ध्यति।

**91. चिणो लुक् (6-4-104)**

चिणः परस्य लुक् स्यात्।

**92. सूत्रम्: - जनिवध्योश्च (7-3-35)**

अनयोरुपधाया वृद्धिर्न स्यात् चिणि ञ्णिति कृति च। अजनि, अजनिष्ट। **दीपी-दीप्तौ ॥ 20॥**

दीप्यते। दिदीपे। अदीपि, अदीपिष्ट। **पद गतौ ॥ 21॥** पद्यते। पेदे। पत्ता। पत्सीष्ट।

---

**90. पदपरिचय :-** दीपजनबुधपूरितायिप्यायिभ्यः (पं. ब. व.) अन्यतरस्याम् (स. ए. व.)

**समास** - 'दीपश्च जनश्च बुधश्च पूरिश्च तायिश्च प्यायिश्च दीपजनबुधपूरितायिप्यायय: तेभ्य: इति इतरेतरद्वन्द्वः।

**अनुवृत्तिः** - '**चिण् ते पदः**' (3-1-60) इति सूत्रात् 'चिण्', 'ते' इति पदेऽनुवर्तेते।

'**च्लेः**' इति पदमनुवर्तते ।

**सूत्रप्रकारः** - विधिसूत्रम्

**सरलार्थः** - दीप - जन - बुध - पूरि - तायि - प्यायि एतेभ्यः धातुभ्यः परे विकल्पेन च्लेः स्थाने चिण् आदेशः स्यात्, एकवचने तप्रत्यये परे सति।

**विशेषार्थः** - सूत्रोपात्ताः सर्वे धातवः आत्मनेपदिनः सन्ति। एतेभ्यः परत्र 'त' प्रत्ययः एकवचने एव प्रयुज्यते। अतः 'त' इत्यनेन एकत्ववाचकः 'त' प्रत्ययः एव गृह्यते।

**91. पदपरिचयः** - चिणः (पं.ए.व.), लुक् (प्र.ए.व.)

**अनुवृत्तिः** - '**अङ्गस्य**' (3-1-60) इत्यधिक्रियते, '**प्रत्ययस्य**' इति पदम् इत्यध्याह्रियते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - चिणः परस्य तकारस्य लोपः भवति।

**विशेषार्थः** - अत्र चिणः परे लुक् स्यात्, परं कस्य इति ? न दर्शितम्। इदं सूत्रम् अङ्गाधिकारे पठितं वर्तते। अङ्गसंज्ञां विना प्रत्ययः न जायते। अतः 'प्रत्ययस्य' इत्यस्य अध्याहारः क्रियते। सः 'त' प्रत्ययः एव स्यात्, नान्यः। कारणं 'त' प्रत्यये परे सति एव च्लेः स्थाने चिण् भवति ।'**प्रत्ययस्य लुक्श्लुलुपः**' इत्यनेन लुक्संज्ञात्वात् सम्पूर्णस्य 'त' कारस्यैव लोपः भवेत, न केवलम् अन्त्यवर्णस्य इति विशेषार्थः। 'अजनि' इत्यत्र 'चिण्' इत्यस्य णित्वात् '**अत उपधायाः**' इत्यनेन उपधावृद्धिः प्राप्यते, परं सा वृद्धिः अनिष्टा वर्तते। अस्याः निवारणार्थम् अग्रिमसूत्रे ध्यानं दातव्यम् ।

**रूपाणि** - दिदीये दिदीयाते दिदीयिरे

दिदीयिषे दिदीयाथे दिदीयिध्वे

दिदीये दिदीयेवहे दिदीयेमहे

**92. पदपरिचयः** - जनिवध्योः (ष. द्वि. व.), च (अव्ययप.)

**समासः** - जनिश्च वधिश्च जनिवधी, तयोः जनिवध्योः इति इतरेतरद्वन्द्वसमासः।

**अनुवृत्तिः** - '**अत उपधायाः**' (7-2-116) इति सूत्रात् 'उपधायाः' इत्यनुवर्तते। ''मृजेर्वृद्धिः'' (7-2-114) इत्यस्मात् 'वृद्धिः' ''**नोदात्तोपदेश.**'' (7-3-34) इत्यस्मात् 'न' इति।

''**आतो युक् चिण्कृतोः**'' (7-3-33) इत्यस्मात् 'चिण्कृतोः' इति, ''**अचोऽञ्णिति**'' (7-2-115) इत्यस्माच्च 'ञ्णिति' इति पदानि अनुवर्तन्ते।

**93. सूत्रम् : चिण् ते पदः (3-1-60)**

पदेश्च्लेश्चिण् स्यात्तशब्दे परे। अपादि। अपत्साताम्। अपत्सत। **विद सत्तायाम्**॥ 22॥ विद्यते। वेत्ता।अवित्त। **बुध अवगमने** ॥ 23॥ बुध्यते। बोद्धा। भोत्स्यते। भुत्सीष्ट।

अबोधि, अबुद्ध। अभुत्साताम्। युध सम्प्रहारे॥ युध्येते। युयुधे। योद्धा। अयुद्ध।

**सृज विसर्गे** ॥ 25॥ सृज्यते। ससृजे। ससृजिषे ।

**94. सूत्रम् :- सृजिदृशोर्झल्यमकिति (6-1-58)**

अनयोरमागमः स्याज्झलादावकिति। स्रष्टा। स्रक्ष्यते। सृक्षीष्ट। असृष्ट। असृक्षाताम्। **मृष तितिक्षायाम्**॥26॥ मृष्यति मृष्यते। ममर्ष। ममर्षिथ। ममृषिषे। मर्षितासि। मर्षिष्यति, मर्षिष्यते। **णह बन्धने**॥27॥ नह्यति, नह्यते। ननाह। नेहिथ, ननद्ध। नेहे। नद्धा। नत्स्यति। अनात्सीत्, अनद्ध।

---

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - जन, वध इत्येतयोः उपधायाः वृद्धिः न भवति, चिणि परे अथवा कृत्संज्ञके ञित्प्रत्यये वा णित्प्रत्यये परे सति।

**विशेषार्थः** - चिण्परक्तस्योदाहरणं प्रकृते एवाऽस्ति। कृत्संज्ञकस्य ञितः उदाहरणम् - जनः (जन् + घञ्) तथा कृत्संज्ञकस्य णितः उदाहरणं - जनकः (जन् + ण्वुल्) इत्यस्ति। 'अजन् + इ' इत्यत्र चिण् परत्राऽस्ति। अतः प्रकृतसूत्रेण उपधावृद्धिनिषेधे 'अजनि' इतीदं रूपं जायते। यत्र पक्षे चिण् न भवति, तत्र **'च्लेः सिच्'** इति च्लेः स्थाने सिजादेशे इडागमे च 'अजनिष्ट' इत्ययं प्रयोगः सिद्ध्यति। कानिचित् उदाहरणानि एतस्य धातोः - **'बलं सञ्जायते राज्ञः'** (मनु. 8-172), **'तमजोऽनुजातः'** (रघुः 6-7) **'कामात्क्रोधोऽभिजायते'** (गीता. 2-62)।

**रूपसिद्धिः** - अजनिहे 'जनी' प्रादुर्भावे' इत्यस्मात् धातोः लुङि तप्रत्यये, अडागमे, च्लिप्रत्यये, च्लेः स्थाने ''दीपजनबुधपूरितायिप्यायिभ्यः अन्यतरस्याम्'' इति चिणः परस्य 'त' शब्दस्य लोपे 'अजनि' इति रूपं जायते।

**93. पदपरिचयः** - चिण् (प्र. ए. व.), ते (स. ए. व), पदः (पं.ए.व.)

**अनुवृत्तिः** - **'च्लेः सिच्'** (3-1-44) इति सूत्रात् च्लेः अनुवर्तते ।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - तशब्दे परे पद्धातोः परस्य च्लेः चिणादेशः स्यात्।

**विशेषार्थः** - उपसर्गयोगे - सम् + पद **'सम्पत्स्यते वः कामोऽयं कालः कश्चित् प्रतीक्ष्यताम्'** (कुमार. 2.54) **'सम्पत्स्यते ते मनसः प्रसादः'** (रघु. 14-76) **'सम्पत्स्यन्ते नभसि भवतो राजहंसाः सहायाः।'** (मेघ. 11)

वि + पद् उदा. **'नाथवन्तस्त्वया लोकास्त्वमनाथो विपत्स्यसे'** ( उत्तर राम. च. 1-43)

निस् + पद् - उदा. **'निष्पद्यन्ते च सस्यानि'** (मनु 9-247) इति

**रूपसिद्धिः - अपादि** - 'पद गतौ' इत्यस्माद्धातोः लुङि तप्रत्यये, शपं बाधित्वा च्लिप्रत्यये अडागमे - 'अपद् + च्लि + त' इति जाते, ''चिण् ते पदः'' इति च्लेः चिणादेशे, ''अत उपधायाः'' इति उपधावृद्धौ, ''चिणो लुक्'' इति तशब्दलोपे - 'अपादि' इति रूपं सिद्ध्यति।

**94. पदपरिचयः** - सृजिदृशोः (ष. द्वि. व.), झलि (स.ए.व.) अकिति (स.ए.व.) अम् (प्र.ए.व.)

**समासः** - सृजिश्च दृश् च सृजिदृशौ, तयोः सृजिदृशोः इति इतरेतरद्वन्द्वः समासः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - किद्भिन्ने झलादिप्रत्यये परे सृज्धातोः दृश्धातोः च अमागमो भवति।

**विशेषार्थः** – अत्र '**धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानम्**' अस्याः परिभाषायाः बलेनात्र 'प्रत्यये' इत्यस्य अध्याहारं कृत्वा तस्य झलि इति विशेषणं विहितम्। तदा विशेषणेन तदादिविधिः भूत्वा 'झलादौ प्रत्यये' इति उपलभ्यते।

इदं सूत्रं लधूपधगुणस्य अपवादरूपमस्ति। अतः 'इको यणचि' इत्यनेन सृज् इत्यस्य स्रज्, दृश् इत्यस्य द्रक्ष् इति जायते। तेन 'द्रष्टा', 'द्रक्ष्यति' इति रूपे भवतः। वैदिकसाहित्ये तु तौदादिक 'सृज' धातोः परस्मैपदात्मनेपदयोः प्रयोगः उपलभ्यते – '**यथोर्णनाभिः सृजते गृह्णते च**' (मुण्डकोप. 1-7)

**'अभि त्वा पूर्वपीतये सृजामि सोम्यं मधु' ( ऋग्वेद 1-19-7 )**

पुनश्च अत्र 'सृ + अम् + ज + तास् इत्यत्र न लधूपधगुणः किन्तु यणादेशे कृते जस्य षत्वे ष्टुत्वे च स्रष्टा भवेत् इति विशेषार्थः।

**रूपसिद्धिः** – **स्रष्टा** 'सृज विसर्गे' इत्यस्मात् धातोः लुटि, तप्रत्यये, तासि च कृते, तप्रत्ययस्य स्थाने डादेशे टिलोपे च 'सृज् + ता' इति जाते, ''सृजिदृशोर्झल्यम् अकिति'' इत्यनेन सृज्धातोः अमागमेऽनुबन्धलोपे यणादेशे च – 'स्रज् + ता' इति जाते, ''व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छषां षः'' इत्यनेन जस्य षत्वे, ष्टुत्वे च 'स्रष्टा' इति रूपं सिद्ध्यति।

## स्वाध्याय

**1. योग्यं विकल्पं चित्वा उत्तरं लिखतु ।**

(1) 'दिवु – क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु .........' इत्यत्र 'विजिगीषा' इत्यस्य कः अर्थः वर्तते।

(क) गर्वः　(ख) प्रकाशः　(ग) जयेच्छा　(घ) शयनम्

(2) अजनि – इत्यत्र चिण् केन भवति ?

(क) चिणो लुक्　(ख) जनिवध्योश्च

(ग) दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्　(घ) चिण् ते पदः

(3) श्यन्प्रत्यये परे कस्य लोपः स्यात् ?

(क) अकारस्य　(ख) इकारस्य　(ग) ऋकारस्य　(घ) ओकारस्य

(4) ज्ञा, जन् इति धातुद्वयस्य स्थाने 'जा' इत्यादेशः कस्मिन् प्रत्यये परे भवति ?

(क) किति　(ख) चिणि　(ग) शिति　(घ) मिति

(5) त्रस्यति, त्रसति इत्यत्र श्यन् केन भवति ?

(क) दिवादिभ्यः श्यन्　(ख) कर्तरि शप्

(ग) वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः।　(घ) ओतः श्यनि

(6) 'दीङ् क्षये इति धातोः लङ्लकारस्य प्रथमपुरुषएकवचनम् लिखत।'

(क) अदविष्ट　(ख) अदीयत　(ग) अदविषत　(घ) दूयताम्

(7) 'नशिथ' इत्यस्य वैकल्पिकं रूपं लिखत।

(क) नेशिव　(ख) ननंष्ठ　(ग) नेशिम　(घ) अनशत्

**2. एकैकवाक्येन उत्तराणि लिखत।**

(1) 'रधादिभ्यश्च' इत्यत्र कः समासः वर्तते ?

(2) 'मस्जिनशोर्झलि' इतीदं सूत्रं किम्प्रकारकमस्ति ?

(3) 'से' अस्य पदपरिचयं लिखत।

(4) 'ओतः श्यनि' सूत्रस्य सरलार्थं लिखत।

(5) 'वा जॄभ्रमुत्रसाम्' इत्यत्र कः समासः वर्तते ?

(6) 'चिण् ते पदः' इतीदं किम्प्रकारकं सूत्रमस्ति ?

(7) 'विद सत्तायाम्' धातोः लट्लकाररूपाणि लिखत।

(8) 'अजनि' रूपे णिन्निमित्तिकोपधावृद्धिः कथं न भवति?

**3. सविस्तरम् उत्तरम् लिखत।**

(1) 'दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु।' इत्यर्थान् व्याख्यात।

(2) 'वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ' इति वार्तिकं स्पष्टयत।

(3) 'स्थाघ्वोरित्त्वे दीङः प्रतिषेधः' इत्यस्य व्याख्यां कुरुत।

(4) 'षोऽन्तकर्मणि' इतीमं धातुं व्याख्यात।

**4. निम्नलिखितानि रूपाणि साधयत ।**

| | | | | |
|---|---|---|---|---|
| (1) अदीव्यत् | (2) नर्तिता | (3) नृत्यतु | (4) त्रेसिथ | (5) शाता |
| (6) ससौ | (7) विध्यति | (8) नेशिथ | (9) पीयते | (10) स्रष्टा |

**5. अधोलिखितानि सूत्राणि सविस्तरं व्याख्यात।**

(1) विभाषा घ्राधेट्शाच्छासः।

(2) ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च।

(3) वा जॄभ्रमुत्रसाम्।

(4) जनिवध्योश्च।

•

# 7 स्वादिप्रकरणम्

**95. स्वादिभ्यः श्नुः 3 | 1 | 73 ||**

शपोऽपवादः। सुनोति, सुनुतः, ''**हुश्नुवोः सार्वधातुके**'' इति यण्-सुन्वन्ति। सुन्वः - सुनुवः। सुनुते, सुन्वाते, सुन्वते। सुन्वहे - सुनुवहे। सुषाव, सुषुवे। सोता। सुनु। सुनवानि, सुनवै। सुनुयात्। सूयात्॥

**96. स्तुसुधूञ्भ्यः परस्मैपदेषु 7 | 2 | 72 ||**

एभ्यस्सिचः इट् स्यात् परस्मैपदेषु। असावीत्। पूर्वोत्तराभ्यां ञिद्भ्यां साहचर्यात्सुनोतेरेव ग्रहणमिति पक्षे असौषीत्।

---

**95. पदपरिचयः** - स्वादिभ्यः (पं.ब.व.), श्नुः (प्र.ए.व.)।

**समासः** - सु (षुञ्) आदिर्येषां ते स्वादयः, तेभ्यः स्वादिभ्यः - बहुव्रीहिः।

**अनुवृत्तिः** - ''**कर्तरि शप्**'' **(3.1.68)** इत्यस्मात् कर्तरि इति अनुवर्तते। ''**सार्वधातुके यक्**'' **(3.1.67)** इत्यस्मात् ''सार्वधातुके'' इति अनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - कर्तृवाचिनि सार्वधातुकप्रत्यये परे सति स्वादिगणधातुभ्यः श्नुप्रत्ययः भवति।

**विशेषार्थः** - अत्र शपोऽपवादत्वात् स्वादिगणीयधातुभ्यः लट्-लोट्-लङ् विधिलिङ् इति एतेभ्यः चतुर्भ्यः धातुभ्यः श्नु-प्रत्ययः जायते। ''**तिङ्शित्सार्वधातुकम्**'' इति सूत्रानुगुणं ''श्नु'' प्रत्ययः सार्वधातुकः विद्यते, श्नुप्रत्ययस्य पिद्भिन्नत्वात्, अत एव ङिद्वद्भावात् गुणकार्यं न भवति। आत्मनेपदिधातुष्वपि ङिद्वद्भावात् गुणो न जायते-यथा-सुनुते, सुन्वाते, सुन्वते इति।

लुट्लकारः आर्धधातुकः। अतः गुणः भवति। यथा-सोता (परस्मै.) सोता (आत्मने.) लृट्लकारः अपि आर्धधातुकः वर्तते। - सोष्यति (परस्मै.) सोष्यते (आत्मने.)

**रूपसिद्धिः - सुनोति**

''षुञ् अभिषवे'' इत्यस्मात् धातोः ''हलन्त्यम्'' इत्यनेन सूत्रेण ञकारस्य इत्संज्ञायां ''तस्य लोपः'' इत्यनेन ञ् लोपे ''धात्वादे षः सः'' इत्यनेन षस्य सकारे कृते ''वर्तमाने लट्'' इत्यनेन लट्लकारे सु + लट इति जाते ''तिप्तस्झिसिप्थस्थमिप्वस् मस्तातांझथास् आथाम्ध्वम् इड्वहिमहिङ्'' इति सूत्रेण तिप् प्रत्यये सु+ तिप् ''तिङशित्सार्वधातुकम्'' इत्यनेन सार्वधातुकसंज्ञायाम् कृतायां शपि प्राप्ते, परं ''स्वादिभ्यः श्नुः'' इत्यनेन सूत्रेण श्नु प्रत्यये कृते सु + श्नु + ति ''लशक्वद्धिते'' इत्यनेन शूस्य इत्संज्ञायां लोपे च कृते सु+ नु + ति इति जाते ''सार्वधातुकार्धधातुकयोः'' इत्यनेन धातोः गुणे प्राप्ते ''क्ङिति च'' इत्यनेन गुणनिषेधे ''सार्वधातुकमपित्'' इत्यनेन ''नु'' इत्यस्य ङिद्वद्भावे तिपं सार्वधातुकं मत्त्वा नु इत्यस्य गुणे कृते सुनोति इति सिद्धम्॥

**96. पदपरिचयः** - स्तुसुधूञ्भ्यः (पं.ब.व.), परस्मैपदेषु (स.ब.व.)।

**समास** - स्तुश्च, सुश्च धूञ् च तेषाम् इतरेतरद्वन्द्वः - स्तुसुधूञः, तेभ्यः स्तुसुधूञ्भ्यः - इतरेतरद्वन्द्वः।

**अनुवृत्तिः** - ''**अञ्जेः सिचि**'' **(7.2.71)** इत्यस्मात् - ''सिचि'' इति अनुवर्तते। ''**इडत्त्यर्तिव्ययतीनाम्**'' **(7.2.66)** इत्यस्मात् ''इट्'' इति अनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - स्तु, सु, धूञ् एभ्यः धातुभ्यः परे सिचः स्थाने इडागमः स्यात्, परस्मैपदप्रत्यये परे।

**विशेषार्थः** - अस्मिन् सूत्रे ''परस्मैपदेषु इत्युक्तम् अतः आत्मनेपदेषु इडागमो न स्यात्। ''स्तु'' सु इमावनिटौ स्तः अतः आभ्यां धातुभ्यां सिचः स्थाने इडागमः निषिद्धः। परं ''धूञ्'' इत्यस्मात् धातोः परे ''स्वरतिसूतिसूयतिधूञूदितो वा'' इत्यनेन सूत्रेण सिचः स्थाने विकल्पेन इडागमः। किन्तु पूर्वोक्तसूत्रेण नित्यम् इडागमः विहितः।

उदा. असावीत् - अधावीत्

**97. विभाषा चेः 7 | 3 | 58 ||**

अभ्यासात्परस्य कुत्वं वा स्यात् सनि लिटि च। चिकाय-चिचाय। चिक्ये - चिच्ये। अचैषीत्; अचेष्ट।

**98. शर्पूर्वाः खयः। 7 | 4 | 61 ||**

अभ्यासस्य शर्पूर्वाः खयः शिष्यन्ते, अन्ये हलो लुप्यन्ते। तस्तार। तस्तरतुः। तस्तरुः। गुणोऽर्ति इति गुणः - स्तर्यात्॥

---

उपसर्गयोगे - अभिषुणोति - आसुनोति ''उपसर्गात् सुनोति. इत्यनेन षत्वमिति।

**रूपसिद्धिः - असावीत्** 'षुञ् अभिषवे' इत्यस्मात् धातोः अनुबन्धलोपे, ''धात्वादेः षः सः'' इत्यनेन षस्य सकारे कृते ''लुङ्'' इति सूत्रेण लुङ्लकारे सु + लुङ् इति जाते ''तिप्तस्झिसिप्थस्थमिप्वस्मस्ताताम्झथासाथाम्-ध्वमिड्वहिमहिङ्'' इत्यनेन सूत्रेण लुङः स्थाने तिप्प्रत्यये सु + तिप् इति जाते ''लुङ्लङ्लृङ्क्ष्वडुदात्तः'' इत्यनेन-अडागमेऽनुबन्धलोपे ''च्लि लुङि'' इत्यनेन ''च्लिप्रत्यये'' ''च्लेःसिच्'' इत्यनेन सिजादेशे 'इतश्च' इति इलोपे असु + स् + त् इति जाते 'स्तुसुधूञ्भ्यः परस्मैपदेषु' इति सिचः इडागमे ''सिचि वृद्धिः परस्मैपदेषु'' इति धातोः उकारस्य स्थाने औकारे ''असौ + इ + स् + त्'' इति जाते आवादेशे कृते अस् + आव् + इ + स् + त् इति जाते ''अस्तिसिचोऽपृक्ते'' इति सूत्रेण ईडागमे, ''इट ईटि'' इत्यनेन ''स्'' लोपे ''सिज्लोपे एकादेशे सिद्धो वाच्यः'' इति वार्तिकेन एकदेशकार्यस्य सिद्धत्वात् सवर्णे दीर्घे कृते असावीत् सिद्धम्

**97. पदपरिचयः** - विभाषा (प्र.ए.व.), चेः (ष.ए.व.)।

**अनुवृत्तिः** - ''**चजोः कु घिण्यतोः**'' **(7.3.52)** इत्यस्मात् ''कु'' इत्यनुवर्तते ''**अभ्यासाच्च**'' **(7.3.55)** इत्यस्मात् ''अभ्यासात्''इत्यनुवर्तते ''**सर्ल्लिटोर्जेः**'' **(7.3.57)** इत्यस्मात् 'सर्ल्लिटोः'' इति अनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अभ्यासात् परे चिञ् धातोः विकल्पेन कुत्वं भवति, सनि परे वा लिटि परे।

**विशेषार्थः** - अत्र ''चजोः'' अधिकारत्वात् ''चि'' धातोः चकारस्यैव स्थाने ककारादेशः, न तु अन्त्यस्य अलः स्थाने। उदा. चिकाय-चिचाय। एवमात्मनेपदेऽपि कुत्वे कृते चिक्ये-चिच्ये। उपसर्गेण सह उदा. सम् + आ + चि ''**यदा तु वाससां राशिः सभामध्ये समाचितः**'' (महा.) अस्य धातोः कर्मकर्तरि प्रयोगोदाहरणं यथा - **राजहंस! तव सैव शुभ्रता चीयते न च न चापचीयते** (काव्यप्रकाशः 10)

**रूपसिद्धिः - चिकाय-चिचाय** ''चिञ् चयने'' इत्यस्माद् धातोः चि + लिट् इति जाते तत्स्थाने तिबादेशे, तिपःस्थाने णलादेशेऽनुबन्धलोपे च चि + अ इति जाते द्वित्वे, अभ्याससंज्ञायां चि + चि + अ इति जाते ''अचोऽञ्णिति'' इत्यनेन वृद्धौ, आयादेशे ''चिचाय'' इति जाते, 'विभाषा चेः' इति धातोः चकारस्य विकल्पेन कुत्वे चिकाय इति सिद्धम्। पक्षे चिचाय इति॥ विकल्पाभावे - ''विभाषा चेः'' इत्यनेन कुत्वं नैव भविष्यति। अतः चिचाय। इत्थं - चिचाय चिच्यतुः चिच्युः रूपाणि ज्ञेयानि।

**98. पदपरिचयः** - शपूर्वाः (प्र.ब.व.), खयः (प्र.ब.व.)।

**समासः** - शर् पूर्वः येषां ते शर्पूर्वाः इति अतद्गुणसंविज्ञानबहुव्रीहिः।

**अनुवृत्तिः** - ''**हलादिः शेषः**'' **(7.4.60)** सूत्रात् ''शेषः'' इति अनुवर्तते। ''**अत्र लोपोऽभ्यासस्य**'' **(7.4.58)** इत्यस्मात् ''अभ्यासस्य'' इति अनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अभ्यासात् पूर्वं (शर्) शषसवर्णाः सन्ति, यस्य खयः, त एव खयः शिष्यन्ते, अन्ये हलो लुप्यन्ते इत्यर्थः।

**विशेषार्थः** - अत्र ''**हलादिः शेषः**'' इत्यस्मात् 'आदिः' इति पदमप्यनुवर्तनीयम्। येषां खय्वर्णानाम् आदौ शर्वर्णाः पूर्वं स्थिताः सन्ति, तादृशभागः, अभ्यासस्य आदौ स्यात्। अर्थात् यदि शर्वर्णान् अतिरिच्य अभ्यासादौ कश्चित्स्यात्, तर्हि सः खय्वर्णः एव भवेत्। तेन व्रश्च् + व्रश्च् + अ = वव्रश्च अत्र अभ्यासस्य चकारः शर्पूर्वः सन् अपि शेषः नावतिष्ठते, कारणं सः आदौ न स्थितः

**99. ऋतश्च संयोगादेः। 7 | 2 | 43 ||**

ऋदन्तात्संयोगादेः परयोर्लिङ्सिचोरिड् वा स्यात्तङि। स्तरिषीष्ट - स्तृषीष्ट। अस्तरिष्ट - अस्तृत॥

**100. श्र्युकः किति। 7 | 2 | 11 ||**

श्रिञः एकाचः उगन्ताच्च गित्कितोरिण् न॥ परमपि स्वरत्यादिविकल्पं बाधित्वा पुरस्तात् प्रतिषेध - काण्डाऽऽरम्भसामर्थ्यादनेन निषेधे प्राप्ते क्रादिनियमान्नित्यमिट् - दुधुविव। दुधुवे। अधावीत्। अधविष्ट, अधोष्ट। अधविष्यत् - अधोष्यत् अधविष्यताम् - अधोष्यताम्। अधविष्यत - अधोष्यत॥

---

उदा. **तस्तार** - स्तर् + स्तृ + अ अत्र अभ्यासतकारः खय् अस्ति, तस्मात् पूर्वं सकारः शर्वर्णः विद्यते अतः खय्वर्णः तकारोऽवशिष्टः, अन्ये अभ्यासगताः हलः लुप्यन्ते इत्यर्थः।

**रूपसिद्धिः - तस्तार** ''स्तृञ् आच्छादने'' इत्यस्माद् धातोः, लिट् लकारे, तत्स्थाने तिबादेशे, तिपः स्थाने णलादेशेऽनुबन्धलोपे च, ''लिटि धातोरनभ्यासस्य'' इत्यनेन द्वित्वे स्तृ + स्तृ + अ इति जाते ''उरत्'' इत्यनेन सूत्रेण अत्वे, रपरत्वे स्तर् + स्तृ + अ इति जाते ''हलादिः शेषः'' इति प्राप्ते ''शर्पूर्वाः खयः'' इत्यनेन-निषेधे तकारशेषे त + स्तृ + अ इति जाते ''ऋतश्च संयोगादेर्गुणः'' इत्यनेन ऋकारस्य गुणे ''अत उपधायाः'' इत्यनेन वृद्धौ ''तस्तार'' इति सिद्धम्।

**99. पदपरिचयः** - ऋतः (प.ए.व.) च (अव्ययपदं) संयोगादेः (प.ए.व.)।

**समासः** - संयोगः आदिर्यस्य स संयोगादिः, तस्मात् संयोगादेः बहुव्रीहिः।

**अनुवृत्तिः** - ''**लिङ्सिचावात्मनेपदेषु**'' **(7.2.42)** सूत्रात् सर्वेषाम् पदानाम् अनुवर्तनम्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - संयोगादेः ऋदन्तात् धातोः परमोः लिङ्सिचोः विकल्पेन इडागमः स्यात्, आत्मनेपदप्रत्ययविषयोऽस्ति चेत्।

**विशेषार्थः** - ''**ऋतश्च संयोगादेर्गुणः**'' तथा ''**ऋतश्च संयोगादेः**'' इत्यनयोः सूत्रयोः प्रवर्तनविषयः भिन्नोऽस्ति। ''**इट् सनि वा**'' इत्यतः वा इत्यनुवर्तते। '**अङ्गस्य**' इत्यधिकारः प्रचलति। धातोः इत्यध्याह्रियते। 'ऋतः', 'संयोगादेः' इति पदद्वयं 'धातोः' इत्यस्य विशेषणम्भवति। तस्मात् 'ऋतः' इत्यस्य तदन्तविधिना 'ऋदन्तात् धातोः' इत्यर्थो लभ्यते। धूञ् धातुः स्वादि-तुदादि-क्र्यादि-चुरादिगणेषु विद्यते। किन्तु स्वादिगणे केचिद् वैयाकरणाः धातुमिमं ह्रस्वान्तं पठन्ति।

**रूपसिद्धिः** - स्तरिषीष्ट, स्तृषीष्ट ''स्तृञ् आच्छादने'' इत्यस्माद् धातोः, ''**आशिषि लिङ्लोटौ**'' इत्यनेन आशिष्यर्थे लिङ्लकारे स्तृ + त इति जाते ''**लिङः सीयुट्**'' इत्यनेन सीयुडागमे अनुबन्धलोपे स्तृ + सीय् + त इति जाते ''ऋतश्च संयोगादेः'' इत्यनेन विकल्पेन इडागमे, स्तृ + इ + सीय् + त इति जाते ''**गुर्णोतिसंयोगाद्योः**'' इत्यनेन सुडागमे, षत्वे, ष्टुत्वे स्तरिषीष्ट इति सिद्धम्। इडभावे स्तृषीष्ट॥

**100. पदपरिचयः** - श्र्युकः (ष.ए.व.), क्किति (स.ए.व.)।

**समासः** - श्रिश्च, उक् च तयोः समाहारद्वन्द्वः श्र्युक्, तस्मात् श्र्युकः। ग् च क् च क्कौ, तौ इतौ यस्य तत् कत्, तस्मिन् कति बहुव्रीहिः।

**अनुवृत्तिः** - '**एकाच उपदेशेऽनुदात्तात्**' **(7.2.10)** सूत्रात् ''एकाच'' इति अनुवर्तते। ''**नेड् वशि कृति**'' **(7.2.8)** सूत्रात् ''न'' ''इट्'' इति अनुवर्तेते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - श्रिञः धातोः परे एवञ्च एकाचः उगन्तधातोः परे गित्कित्प्रत्यययोः इडागमः न भवति।

**विशेषार्थः** - अत्र श्रिञ्धातोः लिंट्लकारे अनेन सूत्रेण निषेधः, पुनः ''क्रादिनियमेन'' नित्यविधानत्त्वात् इडागमे कृते - शिश्रियिव, शिश्रियिम इति रूपे भवतः। एवमेव उगन्तधातावपि ज्ञेयं यथा-बभूविव बभूविम इति।

'धू + व', 'धू + म' इत्यत्र एकाच् उगन्तम् अङ्गं 'धू' इत्यस्ति। ततः परत्र वमौ प्रत्ययौ ''**असंयोगाल्लिट् कित्**'' इत्यनेन कितौ स्तः। अतः प्रकृतसूत्रेण इट् निषिध्यते।

शंकामिमां समाधातुम् अग्रिमफक्किकाऽत्र प्रस्तूयते – ''**परमपि स्वरत्यादिविकल्पम्.**'' इत्यादि। फक्किकाया: अयमर्थ: यत् ''स्वरतिसूति.'' इत्यादिसूत्रेण विधीयमान: वैकल्पिक: इडागम: यद्यपि निषेधात् पर: अस्ति, तथाऽपि विधिकाण्डात् पूर्वं निषेधकाण्डस्य आरम्भात् इदमत्र आचार्येण ज्ञाप्यते यत् निषेध: एव बलवानस्ति। इत्थमत्र निषेधस्य प्रवृत्तौ सत्यां क्रादिनियमेन पुन: नित्यमिडागम: जायते।

**रूपसिद्धि:** – दुधुविव ''धूञ् कम्पने'' इत्यस्मात् धातो:, लिट्लकारे, ''तिप्तस्झिसिप्थस्थमिप्वस्मस्ता-ताम्झथासाथाम्ध्वमिड्वहिमहिङ्'' इत्यनेन लिट:स्थाने वसादेशे, तत्स्थाने वादेशे च, आर्धधातुकत्वात् ''स्वरतिसूतिसूयतिधूञूदितो वा'' इत्यनेन विकल्पेन इडागमे प्राप्ते ''श्र्युक: किति'' इति – तन्निषेधे प्राप्ते, क्रादिनियमाद् नित्यमिडागमे, ''लिटि धातोरनभ्यासस्य'' इत्यनेन द्वित्वे, ''**पूर्वोऽभ्यास:**'' इत्यनेन अभ्यासकार्ये उवङ् आदेशे दुधुविव इति सिद्धम्।

## स्वाध्याय:

**1. योग्यविकल्पं चित्वा उत्तरं ददत।**

(1) 'सुनोति' इत्यत्र क: धातु: वर्तते ?

(क) चिञ् चयने (ख) स्तृञ् आच्छादने (ग) षुञ् अभिषवे (घ) धूञ् कम्पने

(2) 'धुनोति' इत्यत्र श्नु: विकरण: केन भवति ?

(क) कर्तरि शप् (ख) श्र्युक: किति (ग) स्वादिभ्य: श्नु: (घ) दिवादिभ्य: श्यन्

(3) 'चिञ् चयने' धातो: लुङ् लकारस्य प्र. पु. एकवचनरूपं किमस्ति ?

(क) चीयात् (ख) अचिनोत् (ग) अचैषीत् (घ) अचेष्यत्

(4) 'स्तर्यात्' इत्यत्र केन गुण: भवति ?

(क) आद्गुण: (ख) सार्वधातुकार्धधातुकयो:

(ग) गुणोऽर्तिसंयोगाद्यो: (घ) आर्धधातुकस्येड् वलादे:

(5) ''ऋतश्च संयोगादे:'' इति सूत्रकार्यं लिखत।

(क) द्वित्वम् (ख) कुत्वम् (ग) इडागम: (घ) लोप:

(6) ''स्तरिष्ट'' इत्यत्र विकल्पेन इट् केन भवति ?

(क) स्तुसुधूञ्भ्य: परस्मैपदेषु (ख) ऋतश्च संयोगादे:

(ग) आर्धधातुकस्येड् वलादे: (घ) सेऽसिचि कृतचृतछृततृदनृत:

(7) ''विभाषा चे:'' इत्यस्य सूत्रप्रकारं लिखत।

(क) नियमसूत्रम्। (ख) अतिदेशसूत्रम्। (ग) संज्ञासूत्रम्। (घ) विधिसूत्रम्।

**2. एकैकवाक्येन उत्तराणि लिखत।**

(1) 'ऋतश्च संयोगादे:' अत्र क: समास वर्तते ?

(2) 'श्र्युक: क्किति' अस्य सूत्रस्य पदपरिचयं लिखत।

(3) 'शर्पूर्वा: खय:' इति सूत्रस्य प्रकारं लिखत।

(4) ''श्नु'' इत्यस्य शित्करणस्य किं प्रयोजनम् ?

(5) ''स्तुसुधूञ्भ्यः परस्मैपदेषु'' इत्यस्मिन् सूत्रे कस्मात् सूत्रात् किम् अनुवर्तते ?

(6) 'स्वादिभ्यः श्नुः' सूत्रस्य सरलार्थं लिखत।

(7) 'विभाषा चेः' इति अस्य सूत्रस्य पदपरिचयं लिखत।

(8) 'इण्निषेधकं' किं सूत्रं वर्तते ?

(9) 'सुन्वन्ति' इत्यत्र ''शक्नुवन्ति'' इतिवत् किमर्थम् उवङादेशः न भवति ?

**3. सविस्तरम् उत्तरं लिखत।**

(1) 'हुश्नुवोरिति' यण् (वा.) सविस्तरं स्पष्टयत।

(2) 'ऋतश्च संयोगेदेः' इति सूत्रस्य विशेषार्थं लिखत।

(3) ''परमपि स्वरत्यादिनिषेधं बाधित्वा पुरस्तात् प्रतिषेधकाण्डारम्भसामार्थ्यादनेन निषेधे प्राप्ते क्रादिनियमान्नित्यमिट्'' इतीमां पंक्तिं व्याख्यात।

**4.**

(1) सुनवानि (2) असावीत् (3) चिनोति (4) चिचाय

(5) स्तृणोति (6) तस्तार (7) दुधुवे

**5. अधोलिखितानि सूत्राणि सविस्तरं व्याख्यात।**

(1) शर्पूर्वाः खयः।

(2) श्र्युकः क्किति।

(3) स्तुसुधूञ्भ्यः परस्मैपदेषु।

(4) विभाषा चेः।

•

# 8 तुदादिप्रकरणम्

**तुदव्यथने (1)**

**101. तुदादिभ्यः शः 3 | 7 | 77 ||**

शपोऽपवादः। ''तुद-व्यथने'' ॥ 1॥ तुदति, तुदते। तुतादे। तुतोदिथ। तुतुदे। तोत्ता। अतौत्सीत्, अतुत्त। **णुद प्रेरणे** ॥ 2॥ नुदति, नुदते। नुनोद। नोत्ता। भ्रस्ज पाके ॥ 3॥ ग्रहिज्येति सम्प्रसारणम्। सस्य श्चुत्वेन शः। शस्य जश्त्वेन भृज्जति। भृज्जते।

**102. भ्रस्जो रोपधयो रमन्यतरस्याम्। 6 | 4 | 47 ||**

भ्रस्जः रेफस्योपधायाश्च स्थाने रमागमो वा स्यादार्धधातुके। मित्त्वादन्त्यादचः परः। स्थानषष्ठीनिर्देशाद्रोपधयोर्निवृत्तिः। बभर्ज। बभर्जतुः। बभर्जिथ। बभर्ष्ठ। बभ्रज्ज। बभ्रज्जतुः। बभ्रज्जिथ। स्कोरिति सलोपः। व्रश्चेति षः। बभ्रष्ठ। बभर्जे, बभ्रज्जे। भर्ष्टा, भ्रष्टा। भर्क्ष्यति, भ्रक्षति। वार्तिकम् - **क्ङिति रमागमं बाधित्वा सम्प्रसारणं पूर्वविप्रतिषेधेन।** भृज्यात्। भृज्ज्यास्ताम्। भृज्ज्यासुः। भर्क्षीष्ट, भ्रक्षीष्ट। अभार्क्षीत्, अभ्राक्षीत्। अभर्ष्ट, अभ्रष्ट। कृष विलेखने ॥ 4॥ कृषति, कृषते। चकर्ष। चकृषे।

---

**101. पदपरिचयः** - तुदादिभ्यः (प.ब.व.), शः (प्र.ए.व.)।

**समास** - तुद् आदिः येषां ते, तुदादयः, तेभ्यः बहुव्रीहिः।

**अनुवृत्तिः** - ''**कर्तरि शप्**'' **(3.1.68)** इत्यस्माद् ''कर्तरि'' इति अनुवर्तते।

''**सार्वधातुके यक्**'' **(3.1.67)** इत्यस्माद् ''सार्वधातुके'' इति अनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - तुदादिगणपठितधातुभ्यः शः प्रत्ययो भवति, कर्त्रर्थे सार्वधातुके परे।

**विशेषार्थः** - अत्रापि ''**तुदादिभ्यः शः**'' इत्यनेन ''श'' प्रत्ययः भवति, ''**लशक्वतद्धिते**'' इत्यनेन शस्य इत्संज्ञा ''**तस्य लोपः**'' इत्यनेन श्लोपे कृते अवशिष्टः अकारः शित्संज्ञकः भवति। अतः ''**तिङ्शित्सार्वधातुकम्**'' इत्यनेन सार्वधातुकसंज्ञा, परं सार्वधातुकत्वात् अपि अपित् वर्तते अकारः। तेन कारणेन ''**सार्वधातुकम् अपित्**'' इत्यनेन ''ङिद्वद्भावः'' भवति, ततश्च ''तुद्'' इत्यस्मिन् धातौ इक्प्रत्याहारस्य उकारः वर्तते, तस्य उकारस्य ''**क्ङिति च**'' इत्यनेन गुणवृद्ध्योः निषेधः क्रियते इति ।

**रूपसिद्धिः** - '**तुदति**' - ''तुद् व्यथने'' इत्यस्मात् धातोः 'वर्तमाने लट्' इत्यनेन लट् लकारे कृते 'तुद् + लट्' इति जाते ''तिप्तस्झि सिप् थस् थ मिप् वस् मस्, त आताम् झ, थास् आथाम् ध्वम्, इट् वहि महिङ्'' इत्यनेन तिप् प्रत्यये सार्वधातुकसंज्ञायाम् कृतायां शपि प्राप्ते परं ''तुदादिभ्यः शः'' इत्यनेन सूत्रेण शप्रत्यये कृते 'तुद् + अ + ति' इति जाते 'लशक्वतद्धिते' इत्यनेन शस्य इत्संज्ञायां लोपे च कृते 'तुदति' इति जाते, ''पुगन्तलघूपधस्य च'' इति गुण प्राप्ते, इत्यनेन 'सार्वधातुकमपित्', इत्यनेन 'तुद्' इत्यत्र तकारोत्तरवर्तिनःउकारस्य स्थाने 'पुगन्तलघूपधस्य च' इत्यनेन 'लघूपधगुणे प्राप्ते' 'क्ङिति च' इत्यनेन गुणनिषेधे 'तुदति' इति सिद्धम्।

**102. पदपरिचयः** - भ्रस्जः (ष.ए.व.), रोपधयोः (ष.द्वि.व.)। रम् (प्र.ए.व.), अन्यतस्याम् (स.ए.व.)।

**समास** - रेफश्च उपधा च रोपधे, तयोः इतरेतरद्वन्द्वः।

**अनुवृत्तिः** - ''**आर्धधातुके**'' **(6.4.46)** इति सूत्रमधिक्रियते।

**सूत्रप्रकारः** - ''विधिसूत्रम्।''

**सरलार्थः** - आर्धधातुके परे भ्रस्जधातोः रेफस्य उपधायाश्च रमागमः वा स्यात्।

**विशेषार्थः** - अत्रैका शङ्का समुदेति यत् 'रम्' इति मित् अस्तीत्यतः आगमोऽयमस्ति। तथा 'रोपधयोः' इति पदे स्थानषष्ठ्याः निर्देशः वर्तते तस्मात् 'रम्' इत्यादेशः अपि अस्ति। यदि 'रम्' इत्यादेशः, तर्हि मित्करणस्य प्रयोजनं नास्ति किमपि। यतः मित् तु अन्त्यात् अचः परत्र विधानाय भवति। यदि 'रम्' इत्यागमोऽस्ति, तर्हि 'रेफस्य उपधायाश्च स्थाने रम् भवति' इति सूत्रकथनम् अनुचितं स्यात्।

**103. सूत्रम् - अनुदात्तस्य चर्दुपधास्यान्यतरस्याम्। (6 | 4 | 47 ||)**

उपदेशेऽनुदात्तो च ऋदुपधस्याम् वा स्याज्झलादावकिति। क्रष्टा, कर्ष्टा। कृक्षीष्ट।

**वार्तिकम् - स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्यः।** अक्राक्षीत्। अकार्क्षीत्। अकृक्षत। अकृष्ट। अकृक्षाताम्। अकृक्षत। क्सपक्षे-अकृक्षत अकृक्षाताम्। अकृक्षन्त। **मिल सङ्गमे ॥ 5॥** मिलति, मिलते। मिमेल। मेलिता। अमेलित्। **मोच्लृ मोचने ॥ 6॥**

---

अत्र - प्रश्नो भवति- अत्र 'रम्' विधानम् आगमं मत्त्वा अन्त्यात् अचः परत्र करणीयम् उत आदेशं मत्त्वा रेफस्य वा उपधायाः स्थाने विधानं स्यात् ?

**समाधानम्** - आचार्यपाणिनेः व्यवहारं दृष्ट्वा इदं ज्ञायतेऽत्र 'रम्' इत्यस्य उभयथा नाम आगमादेशरूपेण विधानं ज्ञातव्यम्।

**वार्तिकम् - क्ङिति रमागमं बाधित्वा सम्प्रसारणं पूर्वविप्रतिषेधेन।**

**सरलार्थः** - किति ङिति आर्धधातुके परे रम् आगमं प्रबाध्य पूर्व-विप्रतिषेधेन सम्प्रसारणं जायते।

**विशेषार्थः** - यत्र-यत्र वैयाकरणाः विप्रतिषेधेन परकार्यम् अभीष्टं न मन्यन्ते, तत्र-तत्र ''**विप्रतषेधे परं कार्यम्**'' इति सूत्रस्य ''पर'' शब्दः इष्टवाचकः (अभीष्टः) इति मत्वा पूर्वकार्यं कुर्वन्ति। अत्रापि रमागमः परे भवति, परम् अनिष्टत्वात् न क्रियते परं पूर्व कार्यं सम्प्रसारणम् एव जायते। उदा. भृज्यात्, भृज्यास्ताम्, भृज्यासुः। आत्मनेपदे लिङ् लकारे ''भ्रस्ज्'' इत्यस्मात् परे कुत्रापि कित् ङित् नागच्छति। अतः सम्प्रसारणप्रसङ्गः न भवेत् परं रमागमः भवति। भर्क्षीष्ट - रमाभावे - भ्रक्षीष्ट इति॥

**रूपसिद्धिः - 'भृज्जति'** - 'भ्रस्ज पाके' इत्यस्मात् धातोः लट् लकारे, तत्स्थाने तिपि, सार्वधातुकसंज्ञायां, शपि, अनुबंधलोपे भ्रस्ज् + अति इति जाते 'सार्वधातुकमपित्' इत्यनेन ङिद्वद्भावे ''ग्रहिज्यावयिव्यधिवष्टि-विचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च'' इत्यनेन सूत्रेण 'भ्रस्ज्' इत्यस्य रेफस्य स्थाने सम्प्रसारणे 'भ् + ऋ + अस्ज्' इति स्थिते ''सम्प्रसारणाच्च'' इति सूत्रेण पूर्वरूपैकादेशे कृते, 'स्तोः श्चुना श्चुः' इत्यनेन श्चुत्वे एवम् 'झलां जश् झशि' इत्यनेन जश्त्वे, 'भृज्ज् + अति' इति जाते, वर्णसंयोगे 'भृज्जति' इति रूपं सिद्ध्यति।

**103. पदपरिचयः** - अनुदात्तस्य (ष.ए.व.), च (अव्ययम्) ऋदुपधस्य (ष.ए.व.) अन्यतरस्याम् (स.ए.व.)।

**समास** - ऋकारः उपधा यस्य सः ऋदुपधः, तस्य ऋदुपधस्य बहुव्रीहिः।

**अनुवृत्तिः - 'आदेच उपदेशेऽशिति' (6.1.45)** इत्यस्माद् 'उपदेशे' अनुवर्तते।

''**सृजिदृशोर्झल्यमकिति**'' **(6.1.58)** इत्यस्माद् झलि, अम्, अकिति इति पदानि अनुवर्तन्ते।

**सूत्रप्रकारः** - ''विधिसूत्रम्।''

**सरलार्थः** - किद्भिन्ने झलादौ परे उपदेशे यः अनुदात्तः, ऋकारोपधः धातुः, तस्य 'अम्' इत्यागमः विकल्पेन क्रियते।

**विशेषार्थः** - अत्र ''**धातोः कार्यम् उच्यमानं तत्प्रत्यये भवति**'' इत्यनया परिभाषया ''प्रत्यये'' पदम् उपलभ्यते, तदैव ''झलि'' एव तस्य विशेषणं भूत्वा, तदादिविधिं कृत्वा ''झलादौ अकिति-प्रत्यये'' इति इत्यर्थः लभ्यते अपि च अस्मिन् सूत्रे ''उपदेशे'' तदर्थ ''स्रप्तुम्'' सृप + तुमुन् प्रत्यये परे सति ''ञ्नित्यादिर्नित्यम्'' इत्यनेन धातुः उदात्तः भवति तथापि निर्बाधरूपेण अमागमः जायते। कारणां यत् उपदेशशायां धातुः अनुदात्तः आसीत् इति।

**वार्तिकम् - स्पृश-मृश-कृष-तृप-दृपां-च्लेः सिज्वा वाच्यः। सरलार्थः**-स्पृश्-मृश्, कृष्, तृप्, दृप्, एतेभ्यः पञ्चधातुभ्यः परे ''च्लि'' स्थाने विकल्पेन ''सिच्'' आदेशः भवति।

**विशेषार्थः** - स्पृश्, मृश कृष् इत्येतेभ्यः धातुभ्यः परत्र च्लेः स्थाने ''**शल इगुपधादनिटः क्सः**'' इति क्सादेशे तथा तृप्दृप्धात्वोः पुषादित्वात् ''**पुषादिद्युताद्यॢदितः परस्मैपदेषु**'' इति च्लेः स्थाने अङः प्राप्तिरासीत्, तां प्रबाध्य अनेन वार्तिकेन सिच् आदिश्यते विकल्पेन। सिजभावे यथायथं क्सादेशः अङादेशश्च भवति।

**रूपसिद्धिः - 'क्रष्टा'** - 'कृष् विलेखने' इत्यस्माद् धातोः लुटि तत्स्थाने तिपि, सार्वधातुकत्वात् शपि, अनुबन्धलोपे, अमागमे च कृते, 'कृ + अष् + ता' इति जाते 'ष्टुना ष्टुः' इति सूत्रेण ष्टुत्वे यणादेशे 'क्रष्टा' इति सिद्धम्।

**104. सूत्रम् - शे मुचादीनाम्। 7 | 1 | 59 |**

मुच्लिप्विद्लुप्सिच्कृत्खिद्पिशां नुम् स्यात् शे परे। मुञ्चति, मुञ्चते। मोक्ता। मुच्यात्। मुक्षीष्ट। अमुचत्। अमुक्त। अमुक्षाताम्। **लुप्लृ छेदने ॥ 7॥** लुम्पति। लुम्पते। लोप्ता। अलुपत्। अलुप्त। **विद्लृ लाभे ॥ 8॥** विन्दति, विन्दते। विवेद, विविदे। **व्याघ्रभूतिमते सेट्।** वेदिता। भाष्यमतेऽनिट्। परिवेत्ता। **षिच क्षरणे ॥ 9॥** सिञ्चति, सिञ्चते।

**105. सूत्रम् - लिपिसिचिह्वश्च। 3 | 1 | 53 |**

एभ्यश्च्लेरङ् स्यात्। असिचत्।

---

**104. पदपरिचयः** - शे (स.ए.व.), मुचादीनाम् (ष.ब.व.)।

**समास** - मुच् आदिर्येषां ते मुचादयः, तेषाम् मुचादीनाम् बहुव्रीहिः।

**अनुवृत्तिः** - **'इदितो नुम् धातोः' (7.1.58)** इत्यस्माद् 'नुम्' इति अनुवर्तते।

**सूत्रप्रकारः** - ''विधिसूत्रम्।''

**सरलार्थः** - शकारे परे मुचादीनां धातूनां नुमागमः भवति।

**विशेषार्थः** - मुचादयः अष्टधातवः सन्ति। ते यथा-श्लोकबद्धधातवः

**मुच्-सिचौ लुप्-लिपौ चेति विद्-खिदौ कृत्पिशौ तथा।**

**नुम्भाजः शे भवन्त्यष्टौ मुञ्चतीति निदर्शनम्॥** अत्र ''नुम्'' मध्ये स्थितः मकारः इत्संज्ञकः तथा च उकारः उच्चारणार्थः, मित्त्वात् नुमागमः अन्त्यात् अचः परे भवति। अपि च ''श'' विकरणप्रत्ययः लट्, लोट्, लङ्, विधिलिङ्लकारेषु एवञ्च शतृशानजादिप्रत्ययेषु भवति। तस्मात् नुमागमः पूर्वोक्तलकारप्रत्ययेषु एव भवति इति अवधेयम्। तेन ''सिञ्चनम्, कृन्तनम्, सिञ्चितः इमानि अशुद्धानि रूपाणि भवन्ति। एषु स्थानेषु-सेचनम्, कर्तनम्, सिक्तेति शुद्धप्रयोगाः भवितव्याः। एवञ्च मुञ्चति इत्यत्र ''**सार्वधातुकमपित्**'' इत्यनेन ''श'' ङित् तथापि ''**अनिदितां हल उपधाया क्ङिति च**'' इत्यनेन नलोपः न जायते। कारणं तेन नुम्विधानं व्यर्थं भविष्यति इति चिन्तनीयमिति।

**रूपसिद्धिः** - **'मुञ्चति'** - 'मृच्लृ मोचने' इत्यस्माद् धातोः लटि, तिपि, शे कृते, 'मुच् + अ + ति' इति स्थिते, 'शे मुचादीनाम्' इत्यनेन नुमागमः अनुबन्धलोपे च 'मिदचोऽन्त्यात्परः' इत्यनेन मकारोत्तरवर्तिनः उकारस्य पश्चात् नुमागमः भवति। 'मुन्च् + अ + ति' इति जाते ''**नश्चापदान्तस्य झलि**'' इत्यनेन नस्यानुस्वारे एवम् ''**अनुस्वारस्य ययि परसवर्णः**'' इत्यनेन परसर्वणे 'मुञ्च् + अ + ति' वर्णसम्मेलने 'मुञ्चति' इति सिद्धम्।

**105. पदपरिचयः** - लिपिसिचिह्वः (प.ब.व.), च (अव्य.)।

**समास** - लिपिश्च, सिचिश्च, ह्वाश्च तेषां समाहार-द्वन्द्वो लिपिसिचिह्वाः (पुंस्त्वं सौत्रम्) तस्माद् लिपिसिचिह्वः

**अनुवृत्तिः** - **'च्लेः सिच्' (3.1.44)** इत्यस्माद् 'च्लेः' इति अनुवर्तते।

**णिश्रिद्रुस्रुभ्यः कर्तरि चङ् (3.1.48)** इत्यस्माद् 'कर्तरि' इति अनुवर्तते।

**सूत्रप्रकारः** - ''विधिसूत्रम्।''

**सरलार्थः** - लिप्, सिच्, ह्वेञ् इत्येभ्यः धातुभ्यः परस्य च्लेः स्थानेः अङ् आदेशः भवति।

**विशेषार्थः** - 'लिपि' इत्यत्र तथा 'सिचि' इत्यत्र अन्त्येकारः केवलम् उच्चारणार्थकोऽस्ति। ''ह्वेञ्'' धातोः वर्णनं लघुकौमुद्यां नास्ति, अस्य ह्वेञ् धातोः ''आह्वत् इत्यादि उदाहरणानि सिद्धान्तकौमुद्याम् अवलोकनीयानि।

असिचत् इत्यत्र च्लेः स्थाने अङ्आदेशे कृते, ङित्वात् लघूपधगुणस्य निषेधः ततश्च इदं रूपं सिद्ध्यति। सूत्रस्थे 'लिपिसिचिह्वः' इति पदे यः समासः प्रदर्शितः, तत्रैका समस्या समुदेति यत् यदि ''समाहाराद्वन्द्वसमासः'' मन्यते चेत् नपुंसकत्वात् ह्रस्वः भूत्वा ''लिपिसिचिह्वात्'' इति भवितव्यम्, यदि इतरेतरद्वन्द्वसमासः स्वीक्रियते चेत् - ''लिपिसिचिह्वाभ्यः'' इति बहुवचनं युक्तं स्यात्, परं पदमञ्जरीकारेण तु ''लिपिसिचिसहितो ह्वाः- लिपिसिचिह्वाः तस्मात् - लिपिसिचिह्वः इत्यनया रीत्या समासः प्रदर्शितः। अत्र ''कर्तरि'' इत्यस्य अनुवर्तनम् आवश्यकम् अन्यथा कर्मवाच्येऽपि अङ् आदेशः भविष्यति-यथा -'' असिक्षातां क्षेत्रे देवदत्तेन, अलिप्सातां देहल्यौ कन्यया। इति।

**106. सूत्रम् - आत्मनेपदेष्वन्यतरस्याम्। 3 | 1 | 54 |**

लिपिसिचिह्वः परस्य च्लेरङ् वा। असिचत। असिक्त। **लिप उपदेहे ॥ 10॥** उपदेहो वृद्धिः। लिम्पति, लिम्पते। लेप्ता। अलिपत्। अलिपत, अलिप्त। **कृती छेदने ॥ 11॥** कृन्तति। चकर्त। कर्तिता। कर्तिष्यति कर्त्स्यति। अकर्तीत्। **खिद परिघाते ॥ 12॥** खिन्दति। चिखेद। खेत्ता। **पिश अवयवे ॥ 13॥** पिंशति। पेशिता। **ओव्रश्चू छेदने ॥ 14॥।** वृश्चति। वव्रश्च। वव्रश्चिथ। वव्रष्ठ। व्रश्चिता। व्रष्टा। व्रश्चिष्यति व्रक्ष्यति। वृश्च्यात्। अव्रश्चीत्। अव्राक्षीत्। **व्यच व्याजीकरणे ॥ 15॥** विचति। विव्याच। विविचतुः व्यचिता। व्यचिष्यति। विच्यात्। अव्याचीत् अव्यचीत्। **व्यचेः कुटादित्वमनसीति तु नेह प्रवर्तते। अनसीति पर्युदासेन कृन्मात्रविषयत्वात्॥ उछि उञ्छे ॥ 16॥** उञ्छति। **उञ्छः कणश आदानां कणिशाद्यर्जनं शिलम्।** इति यादवः॥ **ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु ॥ 17॥** ऋच्छत्यृतामिति गुणः। द्विहल्ग्रहणस्यानेक-हलुपलक्षणत्वान्नुट्। आनर्च्छ। आनर्च्छतुः ऋच्छिता। **उज्झ उत्सर्ग ॥ 18॥** उज्झति। **लुभ विमोहने ॥ 19॥** लुभति।

**107. सूत्रम् - तीषसहलुभरुषरिषः। 7 | 2 | 48 |**

इच्छत्यादेः परस्य तादेरार्धधातुकस्येड् वा स्यात्। लोभिता, लोब्धा। लोभिष्यति। **तृप ॥ 20॥, तृम्फ ॥ 21॥ - तृप्तौ।** तृपति। ततर्प, तर्पिता। अतर्पीत्। तृम्फति। वार्तिकम् - **शे तृम्फादीनां नुम् वाच्यः।** आदिशब्दः प्रकारे, तेन येऽत्र नकारानुबन्धास्ते तृम्फादयः। ततृम्फ। तृफ्यात्। **मृड ॥ 22॥, पृड ॥ 23॥, सुखने।** मृडति। पृडति। **शुन गतौ ॥ 24॥।** शुनति। **इषु इच्छायाम् ॥ 25॥।** इच्छति। एषिता। एष्टा। एषिष्यति। इष्यात्। ऐषीत्। **कुट कौटिल्ये ॥ 26॥। गाङ्कुटादीति ङित्वम्।** चुकुटिथ। चुकोट, चुकुट। कुटिता। **पुट ॥ 27॥ संश्लेषणे।** पुटति। पुटिता। **स्फुट ॥ 28॥ विकसने।** स्फुटति। स्फुटिता। **स्फुर ॥ 29॥, स्फुल ॥ 30॥ संचलने।** स्फुरति। स्फुलति।

---

**रूपसिद्धिः - 'असिचत्'** - 'षिच् क्षरणे' इत्यस्माद् धातोः लङि तत्स्थाने तिबादेशे, अडागमे, च्लिप्रत्यये च कृते 'लिपिसिचिह्वश्च' इत्यनेन सूत्रेण अङादेशे कृते 'असिचत्' इति सिद्धम्।

**106. पदपरिचयः** - आत्मनेपदेषु (स.ब.व.), अन्यतरस्याम् (स.ए.व.)।

**समासः** - इतरेतरद्वन्द्वसमासः।

**अनुवृत्तिः** - **'च्लेः सिच्' (3.1.44)** इत्यस्माद् 'च्लेः' इति अनुवर्तते।

**अस्यतिवक्तिख्यातिभ्योऽङ्। (3.1.52)** इत्यस्माद् 'अङ्' इत्यनुवर्तते।

**'लिपिसिचिह्वश्च' (3.1.53)** इत्यस्माद् ''लिपिसिचिह्वश्च'' इत्यनुवर्तते।

**सूत्रप्रकारः** - 'विधिसूत्रम्'

**सरलार्थः** - तङि (आत्मनेपदे) परे लिप्, सिच्, ह्वेञ् च एतेभ्यः धातुभ्यः परत्र विकल्पेन च्लेः स्थाने अङ् आदेशः भवति।

**विशेषार्थः** - उपसर्गयोगेऽत्र **''उपसर्गात् सुनोति.'' (8.4.65)** इत्यनेन सूत्रेण सस्य षत्वे कृते अभिषिञ्चति, निषिञ्चति, विषिञ्चति इत्यादीनि रूपाणि भवन्ति।

अयं षत्वविधिः अड्व्यवधानेऽपि भवति, तदा तु-अभ्यषिञ्चत्, न्यषिञ्चत्, व्यषिञ्चत् इत्यादिरूपाणि सिध्यन्ति। यथोक्तं सूत्रेऽपि'' **प्राक्सितादड्व्यवायेऽपि (8.4.63)।**

लिप्धातोः लिम्पति इत्यर्थे - ''**लिप्तेषु भासा गृहदेहलीनाम् ( माघ 8|48 )**

आच्छादितार्थे - ''**लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः'' ( मृच्छकटिकम् - 1|34 )**

कर्म - पापार्थे - **लिप्यते न स पापेन पद्मपत्त्रमिवाम्भसा'' ( गीता. 5|10 )**

**रूपसिद्धिः - असिचत, असिक्त** - 'षिच् क्षरणे' इत्यस्माद् धातोः लुङि, तप्रत्यये, शप्रत्ययं बाधित्वा, च्लिप्रत्यये तस्य स्थाने 'आत्मनेपदेष्वन्यतरस्याम् इत्यनेन लोपे असिचत इति सिद्धम्। पक्षे 'झलो झलि' इत्यनेन सकार लोपे, ''चो कुः'' इति सूत्रेण चकारस्य स्थाने ककारादेशे 'असिक्त' इति साधु।

**108. सूत्रम् - स्फुरतिस्फुलत्योर्निर्निविभ्यः। 8 | 3 | 76 |**

षत्वं वा स्यात्। निः ष्फुरति, निः स्फुरति। **णू स्तवने ॥ 31॥** परिणूतगुणोदयः नुवति। नुनाव नुविता। **टुमस्जो शुद्धौ ॥ 32॥** मज्जति। ममज्ज। ममज्जिथ। **मस्जिनशोरिति नुम्। वार्तिकम् मस्जेरन्त्यात्पूर्वा-नुम् वाच्यः।** संयोगादिलोपः। ममङ्क्थ। मङ्कता। मङ्क्ष्यति। अमाङ्क्षीत्। अमाङ्कताम्। अमाङ्क्षुः। **रुजो भङ्गे ॥ 33॥ रुजति रोक्ता। रोक्ष्यति। अरौक्षात्। भुजो कोटिल्ये ॥ 34॥ रुजिवत्। विश प्रवेशने ॥ 35॥ आमर्शनं स्पर्शः। अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्। अम्राक्षीत्। अमार्क्षीत्। अमृक्षत्। षद्लृ विशरणगत्यवसादनेषु ॥ 36॥ सीदतीत्यादि। शद्लृ शातने ॥ 37॥**

---

**107. पदपरिचयः** - ति (स.ए.व.), इषसहलुभरुषरिषः (प.ए.व.)।

**समास** - इषश्च सहश्च लुभश्च रुषश्च रिषश्च तेषां समाहारः इषसहलुभरुषरिट्, तस्मात् इषसहलुभरुषरिषः इति समाहारद्वन्द्वः।

**अनुवृत्तिः** - **'आर्धधातुकस्येड् वलादेः' (7.2.35)** इत्यस्माद् 'आर्धधातुकस्य इट्' इत्यनुवर्तते।

**'स्वरतिसूतिसूयतिधूञूदितो वा' (7.2.44)** इत्यस्माद् 'वा' इत्यनुवर्तते।

**सूत्रप्रकारः** - 'विधिसूत्रम्'

**सरलार्थः** - इच्छत्यादयः इष्, सह्, लुभ्, रुष्, रिष् इति धातवः सन्ति, तेभ्यः परे तादेः आर्धधातुकस्य विकल्पेन इडागमो भवति।

**विशेषार्थः** - अत्र ''इष्'' धातुना तौदादिकस्य एवं क्रैयादिकस्य इष्धातोरेव ग्रहणम्, दैवादिकधातूनां न यथोक्तं महाभाष्ये - **''इषेस्तकारे श्यन्प्रत्ययात् प्रतिषेधः''** इष् सह् इत्यादिधातवः सेटः सन्ति। अतः तेभ्यः धातुभ्यः परे तकाराद्यार्धधातुकप्रत्ययानां नित्यम् इट् प्रोक्तः परम् अनेन सूत्रेण विकल्पेन इडागमः विहितः।

**वार्तिकम् - ''शे तृम्फादीनां नुम् वाच्यः''**

**अर्थः** - शविकरणे परे सति तृम्फादिधातूनां नुमागमो भवति।

'तृम्फादि' इत्यत्र आदिशब्दः प्रकारवाचकोऽस्ति। अर्थात् तृम्फसदृशाः धातवः गृह्यन्ते। यथा 'तृम्फ' इत्ययं नकारोपधः (मकारोपधः) अस्ति। तथैव तुदादौ नोपधाः धातवः तृम्फादित्वेन परिगण्यन्ते। अतः एव शुम्भ-उम्भादिधातूनाम् अनेन वार्तिकेन नुमागमः भवति। अत्रैका शंका समुदेति यत् - 'तृम्फ' इत्यत्र तु स्वतः मकारः श्रूयते तथा सति वार्तिकेन नुमागमः किमर्थः ? तत्रेदमुत्तरं दीयते - **''तुदादिभ्यः शः''** इत्यनेन विकरणे शप्रत्यये कृते, शप्रत्ययम् अपितं सार्वधातुकञ्च मत्त्वा **''अनिदितां हल उपधायाः क्ङिति''** इत्यनेन नलोपे 'तृफ' इति भवति। तस्मात्तत्र नुमागमः आवश्यकः।

**रूपसिद्धिः - लोभिता, लोब्धा - 'लुभ विमोहने'** इत्यस्माद् धातोः लुटि, तत्स्थाने तिपि, तत्स्थाने डादेशे तासि प्रत्यये पक्षे इडागमः न भवति तदा 'लोभ ता' इति जाते, ''झषस्तथोर्धोऽधः'' इत्यनेन, तकारस्य स्थाने धकारे एवम् भकारे ''झलां जश् झशि'' इत्यनेन जश्त्वे कृते 'लोब्धा' इति सिद्धम्।

**108. पदपरिचयः** - स्फरतिस्फुलत्योः (ष.द्वि.व.), निर्निविभ्यः (प.ब.व.)।

**समास** - स्फुरतिश्च स्फुलतिश्च, स्फुरतिस्फुलती, तयोः स्फुरतिस्फुलत्योः इतरेतरद्वन्द्वः। निर् च निश्च विश्च - निर्निवयः तेभ्यः निर्निविभ्यः - इतरेतरद्वन्द्वः।

**अनुवृत्तिः** - **'सहेः साडः सः' (8.3.56)** इत्यस्माद् 'स' इत्यनुवर्तते।

**'अपदान्तस्य मूर्धन्यः (8.3.55)** इत्यस्माद् 'मूर्धन्यः' इति अनुवर्तते। **''सिवादीनां वाड्व्यवायेऽपि''** (8.3.71) इत्यस्माद् वा इत्यनुवर्तते।

**सूत्रप्रकारः** - 'विधिसूत्रम्'

**सरलार्थः** - निर्, नि, वि इत्युपसर्गेभ्यः परे स्फुर्धातोः स्फुल्धातोश्च सकारस्य विकल्पेन षत्वं भवति।

**109. सूत्रम् - शदेः शितः। 1 | 3 | 60 |**

शिद्भाविनोऽस्मात्तङानौ स्तः। शीयते। शीयताम्। अशीयत। शीयेत। शशाद। शत्ता। शत्स्यति। अशदत्। अशत्स्यत्। कृ विक्षेपे ॥ **38** ॥

**110. सूत्रम् - ॠत इद् धातोः । 7 | 1 | 100 |**

ॠदन्तस्य धातोरङ्गस्य इत् स्यात्। किरति। चकार। चकरतुः। चकरुः। करीता, करिता। कीर्यात्।

---

**वार्तिकम् - ''मस्जेरन्त्यात्पूर्वो नुम् वाच्यः''**

**सरलार्थः** - मस्ज्धातोः अन्त्यवर्णात् जकारात् पूर्वं नुमागमः वाच्यः।

**विशेषार्थः** - अनेन वार्तिकेन नुमागमः स्यात्, मस्ज् इत्यस्य अकारात् परे न भूत्वा अन्त्यजकारात् पूर्वं सकारात् परे भवति इति विशेषार्थः।

**रूपसिद्धिः - निः ष्फुरति, निः स्फुरति।** - अत्र 'निर्' इत्युपसर्गस्य रेफस्य विसर्गादेशे, ''**शर्परे खरि वा विसर्गलोपो वक्तव्यः**'' इति वार्तिकेन विकल्पेन विसर्गलोपे, सस्य षत्वे - निष्फुरति इति रूपम्। एवं विसर्गलोपाऽभावपक्षे ''**वा शरि**'' इत्यनेन विसर्गस्य स्थाने विसर्गे एव आदेशे 'निःष्फुरति' इति रूपं सिद्धम्। विसर्गस्य विसर्गादेशाऽभावपक्षेऽपि ''**विसर्जनीयस्य सः**'' इत्यनेन विसर्गस्य स्थाने सकारादेशे, ''ष्टुना ष्टुः'' इति ष्टुत्वे कृते - 'निष्ष्फुरति' इत्येवं त्रीणि रूपाणि सिद्ध्यन्ति। षत्वाऽभावपक्षे - 'निःस्फुरति' इत्यपि सिद्ध्यति।

**109. पदपरिचयः** - शदेः (ष.ए.व.), शितः (ष.ए.व.)।

**समास** - श इत् यस्य स शित्, तस्य शितः बहुव्रीहिः।

**अनुवृत्तिः** - '**अनुदात्तङित आत्मनेपदम्**' **(1.3.12)** इत्यस्माद् 'आत्मनेपदम्' इत्यनुवर्तते।

**सूत्रप्रकारः** - 'विधिसूत्रम्'

**सरलार्थः** - यदि शित्संज्ञकप्रत्ययः भाविनि काले भवति, तर्हि शद् धातोः आत्मनेपदविधानं स्यात्।

**विशेषार्थः** - अत्र तुदादिगणे शपः स्थाने 'श' इति विकरणप्रत्ययः विधीयते। यत्र धातोः शित्संज्ञकप्रत्ययः ते लकाराः सन्ति - लट्, लोट्, लङ्, तथा विधिलिङ्। अतः एषु लकारेषु आत्मनेपदविधानं भवति। अवशिष्टलकारेषु परस्मैपदविधानं स्यात्।

**रूपसिद्धिः - शीयते** - 'शद्लृ शातने' इत्यस्माद् धातोः 'वतमाने लट्' इति लट्लकारे कृते, 'शद् + लट्' इति जाते 'शदेः शितः' इत्यनेन आत्मनेपदविधाने तप्रत्यये च 'शद् + त' इति जाते ''पाघ्राध्मास्थाम्नादाण्-दृश्यर्तिसर्तिशदसदां पिबजिघ्र-धमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः'' इत्यनेन 'शीयरू' आदेशे कृते शीय् + अत इति जाते, 'टित आत्मनेपदानां इत्यनेन' एत्वे कृते, 'शीयते' इति सिद्धम्।

**110. पदपरिचयः** - ॠतः (ष.ए.व.), इत् (प्र.ए.व.) धातोः (ष.ए.व.)

**समास** -

**अनुवृत्तिः** - '**अङ्गस्य**' अधिक्रियते।

**सूत्रप्रकारः** - 'विधिसूत्रम्'

**सरलार्थः** - दीर्घस्य ॠकारान्तस्य धातोः अङ्गस्य स्थाने इत् (इ) भवति। (रपरत्वम्)

**विशेषार्थः** - अत्र ॠतः इदम् पदम् धातोः विशेषणम् अस्ति तस्मात् तदन्तविधौ कृते ॠदन्तस्य धातोः इति भवेत्। **तत्र अलोऽन्त्यस्य** इति परिभाषासूत्रेण उपर्युक्तः इकारादेशः ॠदन्तधातोः अन्त्यस्य अलः ॠकारस्य स्थाने एव स्यात्।

**रूपसिद्धिः - किरति** - 'कृ विक्षेपे' इत्यस्माद् धातोः लट्लकारे, तिपि, सार्वधातुकसंज्ञायां, शप्रत्यये अनुबन्धलोपे कृते 'कृ + अति' इति जाते 'ॠत इद्धातोः' इत्यनेन ॠकारस्य स्थाने इकारादेशे, रपरत्वे च 'क् + इर् + अ + ति' = 'किरति' इति रूपं सिद्ध्यति।

**111. सूत्रम् - किरतौ लवने। 6 | 1 | 140 |**

उपात्किरतेः सुट् छेदने। उपस्किरति। वार्तिकम् - **अडभ्यासव्यवायेऽपि सुट् कात् पूर्व इति वक्तव्यम्। उपास्किरत्। उपचस्कार।**

**112. सूत्रम् - हिंसायां प्रतेश्च। 6 | 1 | 141 |**

उपात्प्रतेश्च किरतेः सुट् स्यात् हिंसायाम्। उपस्किरति। प्रतिस्किरति। गॄ निगरणे **॥ 39॥**

**113. सूत्रम् - अचि विभाषा। 8 | 2 | 21 |**

गिरतेः रेफस्य लो वाऽजादौ प्रत्यये। गिरति, गिलति। जगार, जगाल। जगरिथ, जगलिथ। गरीता, गरिता, गलीता गलिता। **प्रच्छ ज्ञीप्सायायाम् ॥ 40॥ ग्रहिज्येति सम्प्रसारणम्।** पृच्छति पप्रच्छ पप्रच्छतुः। पप्रच्छुः। प्रष्टा। प्रक्ष्यति। अप्राक्षीत्। **मृङ् प्राणत्यागे ॥ 41॥**

---

**111. पदपरिचयः** - किरतौ (स.ए.व.), लवने (स.ए.व.)।

**अनुवृत्तिः** - **'उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु' (6.1.139)** इत्यस्माद् 'उपात्' इत्यनुवर्तते।

**'सुट् कात्पूर्वः (3.4.107)** इति सम्पूर्णं सूत्रम् इत्यनुवर्तते।

**सूत्रप्रकारः** - 'विधिसूत्रम्'

**सरलार्थः** - छेदनार्थे 'उप' इति उपसर्गात्परस्य कृ धातोः सुडागमः स्यात्।

**विशेषार्थः** - अस्मिन् सूत्रे उपस्किरति नाम छिनत्ति इत्यर्थः अथवा लुनाति इत्यर्थः। किन्तु वस्तुतः ससुट्कस्य किरतेः लवनम् इत्यर्थः नास्ति परम् लवने विषये सुडागमः विधीयते।

**वार्तिकम् - ''अडभ्यासव्यवायेऽपि सुट् कात् पूर्व इति - वक्तव्यम्''॥**

**सरलार्थः** - अटः अथवा अभ्यासस्य व्यवधानेऽपि ककारात् पूर्वं यथाविहितं सुट् भवति इति वक्तव्यम् ॥

**विशेषार्थः** - इदं वार्तिकं ''सुट् कात्पूर्वः'' इत्यत्र पठितमस्ति। 'अट्' इत्यनेन ''लुङ्लङ्लृङ्क्ष्वडुदात्तः' .. इति सूत्रस्यैव अटः ग्रहणम्, न तु अट्प्रत्याहारस्य। उदा. अड्व्यवधानोदाहरणम् - उपास्किरत्। अभ्यासव्यवधाने - उपचस्कार।

**रूपसिद्धिः -उपचस्कार** - 'उप' इत्युपसर्गपूर्वात् 'कृ-विक्षेपे' इत्यस्माद्धातोः लिटि तत्स्थाने तिबादेशे, तत्स्थाने णलादेशेऽनुबन्धलोपे, धातोः द्वित्वे, 'उप + कृ + कृ + अ' इति जाते, चुत्वे, अनभ्यासस्य धातोः ''ऋच्छत्यृताम्'' इत्यनेन गुणे, उपधावृद्धौ च - 'उप चकार' इति जाते, प्रकृतवार्तिकेन सुडागमेऽनुबन्धलोपे - 'उपचस्कार' इति रूपं सिद्ध्यति।

**112. पदपरिचयः** - हिंसायां (स.ए.व.), प्रतेः (पं.ए.व.)च (अव्ययम्)

**अनुवृत्तिः** - **'उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु' (6.1.139)** इत्यस्माद् 'उपात्' इत्यनुवर्तते।

**'किरतौ लवने' (6.1.140)** इत्यस्माद् 'लवने' इति अनुवर्तते।

**'सुट् कात्पूर्वः' (3.4.107)** इति सम्पूर्णं सूत्रम् अनुवर्तते।

**सूत्रप्रकारः** - 'विधिसूत्रम्'

**सरलार्थः** - हिंसार्थे उपात् प्रतेश्च परस्य कृ धातोः सुडागमः भवति।

**विशेषार्थः** - इदं सूत्रमपि पूर्ववार्तिकसहायेन अटः व्यवधाने अथवा अभ्यासव्यवधाने अपि प्रवर्तते। यथा - उपास्किरत्, प्रत्यस्किरत्, उपचस्कार, प्रतिचस्कार। तत्रोदाहरणानि यथा. **उरोविदारं प्रतिचकरे नखैः** - माघ **1.47**। हतः, कर्मणि लिट्। **विधानमानुश्राविकं ग्रहेषु नः प्रतिस्किरन्ती किमियं प्रतीक्ष्यते। अनर्घ 2|56**। प्रतिस्किरन्ती = नाशयन्ती।

**रूपसिद्धिः -'उपस्किरति'** - ''कृ विक्षेपे'' इत्यस्माद् धातोः लटि, तत्स्थाने तिबादेश, 'उप + कृ + ति' इति जाते, ''हिंसायां प्रतेश्च'' इति सुटि, धातोः ऋकारस्य इत्वे , रपरत्वे च - 'उपस्किरति' इति रूपं सिद्ध्यति।

**114. सूत्रम् - म्रियतेर्लुङ्लिङोश्च। 1 | 3 | 61 |**

लुङ्लिङोः शितश्च प्रकृतिभूतान्मृङस्तङ् नान्यत्र। रिङ्। इयङ्। म्रियते। ममार।मर्ता। मरिष्यति। मृषीष्ट। अमृत। **पृङ् व्यायामे ॥ 42॥** प्रायेणायं व्याङ्पूर्वः। व्याप्रियते। व्यापप्रे। व्यापप्राते। व्यापरिष्यते। व्यापृत। व्यापृषाताम्। **जुषी प्रीतिसेवनयोः** जुषते **॥ 43॥** जुजुषे। **ओविजी भयचनलयोः ॥ 44॥** प्रायेणायम् उत्पूर्वः। उद्विजते।

**115. सूत्रम् - विज इट्। 1 | 2 | 2 |**

विजेः पर इडादिप्रत्ययो ङिद्वत्। उद्विजिता।

---

**113. पदपरिचयः** - अचि (स.ए.व.), विभाषा (प्र.ए.व.)च (अव्ययम्)

**अनुवृत्तिः** - **'ग्रो यङि' (8.2.20)** इत्यस्माद् 'ग्रः' इत्यनुवर्तते।

**'कृपो रो लः' (8.2.18)** इत्यस्माद् 'लः' इत्यनुवर्तते।

**सूत्रप्रकारः** - 'विधिसूत्रम्'

**सरलार्थः** - अजादौ प्रत्यये परे गृधातोः रेफस्य विकल्पेन लत्वं भवति।

**विशेषार्थः** -

**रूपसिद्धिः -गिलति, गिरति।** - 'गॄ निगरणे' इत्यस्माद्धातोः लटि तत्स्थाने तिबादेशे, सार्वधातुकसंज्ञायां, शप्रत्यये, 'गॄ + अ + ति' इति जाते, ''ॠत इद्धातोः'' इत्यनेन ॠकारस्य इत्वे रपरत्वे च 'गिर् + अ + ति' इति जाते, ''अचि विभाषा'' इत्यनेन विकल्पेन रेफस्य स्थाने लादेशे - 'गिलति' इति रूपम्। तदभावे - 'गिरति' इति।

**114. पदपरिचयः** - म्रियतेः (प.ए.व.), लुङ्लिङोः (ष.द्वि.व.)च (अव्ययम्)।

**समास** - लुङ् च लिङ् च लुङ्लिङौ, तयोः लुङ्लिङोः इतरेतरयोग-द्वन्द्वः।

**अनुवृत्तिः** - **'शदेःशितः' (7.3.60)** इत्यस्माद् 'शितः' इत्यनुवर्तते।

**'अनुदात्तङित आत्मनेपदम्' (1.3.12)** इत्यस्माद् 'आत्मनेपदम्' इत्यनुवर्तते।

**सूत्रप्रकारः** - 'नियमसूत्रम्'

**सरलार्थः** - 'मृङ्' धातोः लुङः स्थाने, लिङः स्थाने तथा शित्प्रत्ययप्रकृतिभूत-लकारस्य स्थाने आत्मनेपदम्भवति, न तु अन्यलकारेषु।

**विशेषार्थः** - 'मृङ्' इत्ययं धातुः ङित् अस्ति। तस्मात् ''**अनुदात्तङित आत्मनेपदम्**'' इत्यनेन आत्मनेपदं स्वतः सिद्धम् अस्ति। तथा सति प्रकृतसूत्रेण मृङः आत्मनेपदविधानं व्यर्थमस्ति। व्यर्थं सत् इदं ज्ञापयति ''**सिद्धे सत्यारभ्यमाणो विधिः नियमाय भवति**'' इति। अर्थात् 'मृङ्' इत्यस्माद्धातोः आत्मनेपदं यदि भवति, तर्हि केवलं लुङि, लिङि तथा शित्प्रत्ययप्रकृतिभूतलकारेष्वेव, अन्यलकारेषु परस्मैपदम् एव भवेत् इत्ययं नियमः क्रियते।

**रूपसिद्धिः -म्रियते** - ''मृङ् प्राणत्यागे'' इत्यस्मात् धातोः लट् लकारे, तत्स्थाने तप्रत्यये, सार्वधातुकसंज्ञायां, शप्रत्ययेऽनुबन्धलोपे 'मृ + अ + त' इति जाते ''रिङ्शयग्लिङ्क्षु'' इत्यनेन ऋकारस्य स्थाने रिङादेशे म्रि + अत इति जाते ''अचि श्नुधातुभ्रुवां य्वोरियङुवङौ'' इत्यनेन इकारस्य स्थाने इयङादेशे म्रिय् + अत इति जाते ''टित आत्मनेपदानां टेरे'' इत्यनेन एत्वे वर्णसम्मेलने ''म्रियते'' इति सिद्धम्॥

**115. पदपरिचयः** - विजः (पं.ए.व.), इट् (प्र.ए.व.)

**अनुवृत्तिः** - **'गाङ्कुटादिभ्योऽञ्णिन्ङित्' (7.2.1)** इत्यस्माद् 'ङित्' इत्यनुवर्तते।

**सूत्रप्रकारः** - 'अतिदेशसूत्रम्'

**सरलार्थः** - विज्धातोः परत्र विद्यमानः इडादिप्रत्ययः ङिद्वद् भवति।

**विशेषार्थः** - अत्र ङिद्वद्भावकरणप्रयोजनं गुणनिषेधः वर्तते। तस्मात् ''विज् + इता'' इत्यत्र ''विज इट्'' इत्यनेन इडादिप्रत्ययस्य 'इता' इत्यस्य ङिद्वद्भावे ''पुगन्तलघूपधस्य च'' इति लघूपधगुणे प्राप्ते, ''क्ङिति च'' इत्यनेन गुणनिषेधे, विजिता, उद्विजिता, इत्यादिरूपाणि सिद्ध्यन्ति''

(1) उदा. **''यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः।'' ( गीता 12/15 )**

(2) उदा. **''उद्वेजिता वृष्टिभिराश्रयन्ते''** इत्यत्र णिजन्तप्रयोगोऽस्ति। णिच् इडादिप्रत्ययः नास्ति, अतः तस्मिन परे विना बाधं गुणः जातः।

(3) उदा. **''सम्मानाद् ब्राह्मणो नित्यमुद्विजेत विषादिव''** (मनु. 2/162)

**रूपसिद्धिः -उद्विजिता** - ''ओविजी भयचलनयोः'' इत्यस्माद् धातोः लुट् लकारे तस्थाने तप्रत्यये, तत्स्थाने डादेशेऽनुबन्धलोपे च, इडागमे च उद्विज् + इता ''पुगन्तलघूपधस्य च'' इत्यनेन गुणे प्राप्ते विज इट् इति ङिद्वद्भावे ''क्ङिति च'' इत्यनेन गुणनिषेधे उद्विजिता इति सिद्धम्॥

**स्वाध्यायः**

**1. योग्यविकल्पं चित्वा उत्तरं ददत।**

(1) तुदादिप्रकरणे को विकरणः प्रत्ययो भवति ?

(क) श्यन् (ख) शप् (ग) शः (घ) श्लुः

(2) केन सूत्रेण रमागमो भवति ?

(क) विज इट् (ख) भ्रस्जो रोपधयोः रमन्यतरस्याम्

(ग) वृतो वा (D) किरतौ लवने

(3) क्षिप् धातुः कस्मिन्नर्थे अस्ति ?

(क) हिंसायाम् (ख) विलेखने (ग) प्रेरणे (घ) वसने

(4) ''शे तृम्फादीनां नुम्वाच्यः'' इत्यनेन सूत्रेण कः आगमः भवति ?

(क) इडागमः (ख) नुमागमः (ग) सुडागमः (घ) एतेषु किमपि न

(5) ''तृम्फितारः'' इति कस्मिन् लकारे रूपम् ?

(क) लटि प्र. ब. (ख) लुटि म. ए. (ग) लुटि, प्र. ब. (घ) लुङि, उ. द्वि.

(6) ''उपस्किरति'' - इत्यत्र सुडागमः केन सूत्रेण भवति ?

(क) अचि विभाषा (ख) हिंसायां प्रतेश्च (ग) तस्मादित्युत्तरस्य (घ) शे मुचादीनाम्

(7) षदलृ (सद्) धातुः एतेषु कस्मिन्नर्थे न भवति ?

(क) विशरणे (ख) व्यवहारे (ग) गतौ (घ) अवसादने

**2. एकैकवाक्येन उत्तराणि लिखत।**

(1) ''स्फुरतिस्फुलत्योर्निर्निविभ्यः'' इत्यस्मिन् सूत्रे केषां सूत्राणाम् अनुवृत्तिः भवति ?

(2) ''भ्रस्जो रोप...'' इति सूत्रं पूरयत।

(3) म्रियतेर्लुङ्लिङोश्च अस्य सूत्रस्य सरलार्थो लेख्यः।

(4) किरतौ लवने इत्यत्र ''लवने'' इत्यस्य कोऽर्थः ?

(5) म्रियते - इत्यस्याम् साधनिकायाम् मुख्यसूत्रं किम् ?

(6) 'सृज् विसर्गे' इति धातोः लिट्लकारं लिखत।

(7) भ्रस्जो रोपधयो... इत्यस्मिन् सूत्रे ''रोपधयो'' इत्यत्र कः समासः ?

(8) उद्विजिता - कुटिता इत्यत्र लघूपधगुणः कथं न भवति ?

(9) ''स्फूर्याद्वत् स्फूल्यात्'' कथं न जायते ?

(10) शप् - श अनयोः विकरणप्रत्यययोः किम् अन्तरम् ?

**3. सविस्तरम् उत्तरम् लिखत।**

(1) ''तुदादिभ्यः शः'' इति सूत्रस्य व्याख्यां कुरुत।

(2) ''विज इट्'' इति सूत्रस्य पदपरिचयं कृत्वा विशेषार्थः लेख्यः।

(3) 'किति रमागमं बाधित्वा सम्प्रसारणपूर्वविप्रतिषेधेन'' इति वार्तिकं स्पष्टयत।

(4) स्थानषष्ठीनिर्देशाद् रोपधयोः निवृत्तिः।

(5) व्याघ्रभूतिमते सेट् भाष्यमतेऽनिट्।

**4. अधोलिखितानि रूपाणि साधयत।**

(1) तोत्ता (2) बभर्ज (3) वृश्चति (4) लोब्धा

(5) मम्रुः (6) उपस्किरति (7) आदर्ता

**5. अधोलिखितानां सूत्राणां सविस्तरं व्याख्या कार्या।**

(1) अचि विभाषा

(2) शे मुचादीनाम्

(3) तुदादिभ्यः शः

(4) हिंसायां प्रतेश्च

●

| 9 | # रुधादिप्रकरणम् |
|---|---|

**'रुधिर-आवरणे'** ॥ **1** ॥

**116. रुधादिभ्यः श्नम् 3 | 1 | 78**

**117. तृणह इम्। 7 | 3 | 92**

तृहः श्नमि कृते इमागमो हलादौ पिति सार्वधातुके। तृणेढि, तृण्ढः। ततर्ह। तर्हिता। अतृणेट्॥

---

शपोऽपवादः। रुणद्धि। **श्नसोरल्लोपः**, रुन्धः रुन्धन्ति। रुणत्सि, रुन्धः, रुन्ध। रुणद्मि, रुन्ध्वः रुन्ध्मः। रुन्धे, रुन्धाते, रुन्धते। रुन्त्से, रुन्धाथे, रुन्ध्वे। रुन्धे, रुन्ध्वहे, रुन्ध्महे। रुरोध, रुरुधे। रोद्धासि, रोद्धासे। रोत्स्यति, रोत्स्यते। रुणद्धु-रुन्धात्, रुन्धाम्, रुन्धन्तु। रुन्धि। रुणधानि, रुणधाव, रुणधाम। रुन्धाम्, रुन्धाताम्, रुन्धताम्। रुन्त्स्व। रुणधै, रुणधावहै, रुणधामहै। अरुणत्-अरुणद्, अरुन्धाम्, अरुन्धन्। अरुणः - अरुणत् - अरुणद्। अरुन्ध, अरुन्धाताम्,अरुन्धत। अरुन्धाः। अरुन्ध्यात् रुन्धीत। रुध्यात् रुत्सीष्ट। अरुधत् - अरौत्सीत्। अरुद्ध, अरुत्साताम्, अरुत्सत। अरोत्स्यत्-अरोत्स्यत॥ 'तृहि-हिसायाम्' **2** रुन्ध्महे। रुरोधे, रुरुधे। रोद्धासि, रोद्धासे। रोत्स्यसि, रेत्स्यसे। रोत्स्यति, रेत्स्यते। रुणद्धु, रुन्धात्। रुन्धाम्। रुन्धन्तु। रुन्धि। रुणधानि। रुणधाव। रुणधाम। रुन्धाम्। रुन्धाताम्। रुन्धताम्। रुन्त्स्व। रुणधै। रुणधावहै। रुणधामहै। अरुणत्, अरुणद्। अरुन्धताम्। अरुन्धन् अरुणः, अरुणत्, अरुणद्। अरुन्ध। रुध्यात्, रुत्सीष्ट। अरुधत्, अरौत्सीत्। अरुद्ध। अरुत्साताम्। अरुत्सत। अरोत्स्यत्, अरौत्सीत्। अरुद्ध। अरुत्साताम्। अरुत्सत। अरोत्स्यत्, अरोत्स्यत॥ भिदिर् विगारणे ॥ **2** ॥ छिदिर् द्वैधीकरणे ॥ **3** ॥ युजिर् योगे ॥ **4** ॥ रिचिर् विरेचने ॥ **5** ॥ रिणक्ति, रिङ्क्ते। रिरेच। रेक्ता रेक्ष्यति अरिणक्। अरिचत्, अरैक्षीत्, अरिक्ता ॥ विचिर् पृथग्भावे ॥ **6** ॥ विनक्ति विङ्क्ते ॥ क्षुदिर् संपेषमे ॥ **7** ॥ क्षणित्ति, क्षुन्ते। क्षोत्ता ॥ अक्षुदत्, अक्षोत्सीत्, अक्षुत्त। उच्छृदिर् दीप्तिदेवयोः ॥ **8** ॥ छृणात्ति छृन्ते। चच्छर्द। सेऽसिचीति वेट्। चच्छृदिषे, चच्छृत्से। छर्दिता। छर्दिष्यति, छर्त्स्यति। अच्छृदिषे, चच्छृत्से। छर्दिता। छर्दिष्यति, छर्त्स्यति। अच्छृदत्, अच्छर्दीत्, अच्छर्दिष्ट॥ उतृदिर् हिंसानादरयोः ॥ **9** ॥ तृणत्ति, तृन्ते॥ कृती वेष्टने ॥ **10** ॥ कृणत्ति ॥ तृह हिसि हिंसायाम् ॥ **11-12** ॥

**116. पदपरिचयः** - रुधादिभ्यः (पञ्चमी.ब.व.), श्नम् (प्र.ए.व.)।

**समासः** - रुध् आदिर्येषान्ते रुधादयः, तेभ्यः (तद्गुणसंविज्ञानबहु.)

**अनुवृत्तिः** - ''**कर्तरि शप्**'' इत्यस्मात् सूत्रात् 'शप्' तथा ''**सार्वधातुके यक्**'' इत्यस्मात् सूत्रात् सार्वधातुके इति पदम् अनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - सार्वधातुके प्रत्यये परे सति रुधादिभ्यः धातुभ्यः श्नम् प्रत्ययः भवति। अत्र शपः अपवादः।

**विशेषार्थः** - रुधादिगणे ये धातवः समायान्ति, तेभ्यः धातुभ्य 'श्नम्' प्रत्ययः भवति। अत्र शप्प्रत्ययस्य अपवादः वर्तते। अर्थात् शप् प्रत्ययः न भवति। शपः स्थाने श्नम् भवति।

**रूपसिद्धिः** - **रुणद्धि** रुधिर् धातोः इरः इत्संज्ञायां लोपे, लटि, तिपि, रुध् + तिप् इति जाते **रुधादिभ्यः श्नम्** इत्यनेन सूत्रेण श्नम् प्रत्यये '**मिदचोऽन्त्यात् परः**' इत्यनेन सूत्रेण अन्त्यात् अचः परत्र श्नम्प्रत्यये कृते रु + श्नम् + ध् + ति इति जाते अनुबंधलोपे, रु + न + ध् + ति इति जाते, णत्वे, दत्वे, चर्त्वे, च वर्णसम्मेलने **रुणद्धि** इति **रूपं** सिद्धम्।

**117. पदपरिचयः** - तृणहः (ष.ए.व.) इम् (प्र.ए.व.)

**अनुवृत्तिः** - ''**नाऽभ्यस्तस्याऽचि पिति सार्वधातुके**'' इत्यस्मात् सूत्रात् 'पिति, सार्वधातुके' इति पदे अनुवर्तेते, ''**उतो वृद्धिर्लुकि हलि**'' इत्यस्मात् सूत्रात् हलि इति पदम् अनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - हलादौ पिति सार्वधातुके परे तृह् धातोः इम् आगमः भवति।

**विशेषार्थः** - प्रथमपुरुषे-एकवचने श्नमि प्राप्ते 'तृनह् + ति' इत्यवस्थायां सूत्रमिदं प्रवर्तते। अनेन सूत्रेण तृह् धातोः प्रक्रियायां श्नम्प्रत्ययानन्तरम् 'इम्' इति प्रत्ययस्य आगमः स्यात्।

**118. श्नान्नलोपः 6 | 4 | 23**

श्नमः परस्य नस्य लोपः स्यात्। हिनस्ति। जिहिंस। हिंसिता॥

**119. तिप्यनस्तेः 8 | 2 | 73**

पदान्तस्य सस्य दः स्यात् तिपि, न तु अस्तेः। **'ससजुषोः रुः'** इत्यस्याऽपवादः। अहिनत् - अहिनद्, अहिंस्ताम्, अहिंसन्॥

**120. सिपि धातो रुर्वा 8 | 2 | 74**

पदान्तस्य धातोः सस्य रुः स्यात् वा (सिपि)। पक्षे दः। अहिनः - अहिनत् - अहिनद्॥ पदान्तस्य धातोः सस्य रुः स्याद्वा, पक्षे दः। अहिनः, अहिनत् अहिनद्॥ उन्दी क्लेदने ॥ **13**॥ उनत्ति। उन्तः। उन्दन्ति। उन्दाञ्चकार। औनत्, औनद्। औन्ताम्। औन्दन्। औनः, औनत, औनद्। औनदम्॥ अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु ॥ **14**॥ अनक्ति। सङ्क्तः। अञ्जन्ति। आनञ्ज। आनञ्जिथ, आनडक्थ। उञ्जिता, अडक्ता। अडग्धि। अनजानि। आनक्॥

---

**रूपसिद्धिः** - **'तृणेदि'** 'तृनह् + ति' इति स्थिते **तृणह इम्** इत्यनेन सूत्रेण इमागमे तृन + इम् + ह + ति इति जाते अनुबन्धलोपे तृन + इ + ह् + ति इति जाते, गुणे 'तृणेह् + ति' इति जाते, ''हो ढः'' इति हस्य ढकारे, ''झषस्तथोर्धोऽधः'' इति तकारस्य धकारादेशे, ष्टुत्वेन धस्य ढकारे, ''ढो ढे लोपः'' इति प्रथमढस्य लोपे, ''ऋवर्णान्नस्य णत्वं वाच्यम्'' इति वार्तिकेन णत्वे 'तृणेढि' इति रूपं सिद्ध्यति।

**118. पदपरिचयः** - श्नात् (प.ए.व.), नलोपः (प्र.ए.व.)।

**समासः** - नस्य लोपः नलोपः षष्ठीतत्पुरुषः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - श्नम् प्रत्ययस्य अनुबन्धलोपे श्न इति अवशिष्टः। अस्मात् श्नात् परवर्तिनः नकारस्य लोपः स्यात्।

**विशेषार्थः** - हिनन् + स् + ति इत्यवस्थायां श्नात्परवर्तिनः नकारस्य लोपः विधीयते; सार्वधातुके लकारे श्नम्प्रत्ययस्य नकारस्य लोपः भवति।

**रूपसिद्धिः** - **हिनस्तिहिस् धातोः लटि, तत्स्थाने तिबादेशे, श्नम्प्रत्यये अनुबन्धलोपे च** हिनन् + स् + ति + इति स्थिते, **श्नान्नलोपः** इत्यनेन सूत्रेण् न् लोपे हिनस्ति इति रूपं सिद्धम्।

**119. पदपरिचयः** - तिपि (सप्तमी.ए.व.) अनस्तेः (षष्ठी.ए.व.)

**अनुवृत्तिः** - ''**ससजुषो रुः**'' इत्यस्मात् सूत्रात् सः तथा ''वसुस्रंसुध्वंस्वनडुहा दः'' इत्यस्मात् सूत्रात् दः इति पदम् अनुवर्तते।

**समासः** - न अस्तिः अनस्तिः, तस्य अनस्तेः (न.तत्पु.)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - तिप् प्रत्यये परे पदान्तस्य अकारस्य स्थाने दकारः भवति। कार्यमिदम् अस्धातुं विहाय भवतीति।

**रूपसिद्धिः** - हिंस्धातोः लङि; प्रथमपुरुषैकवचने नुमागमे, श्नम्प्रत्ये, ''**श्नान्नलोपः**'' इति श्नमः परस्य नस्य लोपे, 'अहिनस् + त्' इति जाते, अपृक्ततकारस्य हलङ्यादिलोपे 'अहिनस्' इति जाते, पदान्तसस्य ''ससजुषो रुः'' इति रुत्वे प्राप्ते, प्रकृतसूत्रेण सकारस्य दकारे कृते - अहिनत् - अहिनद् इति रूपे जायेते।

**120. पदपरिचयः** - सिपि (स.ए.व.) धातोः (ष.ए.व.) रुः (प्र. ए.व.) वा (अव्य.)।

**अनुवृत्तिः** - ''**ससजुषो रुः**'' इत्यस्मात् सूत्रात् सः इति पदमनुवर्त्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - सिपि परे धातोः पदान्तस्य सकारस्य स्थाने 'रु' आदेशः विकल्पेन स्यात्।

**121. अञ्जेः सिचि 7 | 2 | 71**

अञ्जेः सिचो नित्यमिट् स्यात्। आञ्जीत्॥ अञ्जेः सिचो नित्यमिट् स्यात्। आञ्जीत्॥ तञ्जू संकोचने ॥ **15**॥ तनक्ति। तञ्चिता, तङ्क्ता। ओविजी भयचलनयोः ॥ **16**॥ विनक्ति॥ विङ्क्तः। विज इडिति ङित्त्वम्। विविजिथ। विजिता। अविनक्। अविजीत्॥ सिष्लृ विशेषणे ॥ **17**॥ शिनष्टि। शिं शिंष्टः। शिंषन्ति। शिनक्षि। शिशेष। शिशेषिथ। शेष्टा। शेक्ष्यति। हेर्धिः। शिण्ड्ढि। शिनषाणि। अशिनट्। शिंष्यात्। शिष्यात्। अशिषत्॥ एवं पिष्लृ संडूर्णने ॥ **18**॥ भञ्जो आमर्दने ॥ **19**॥ श्नान्नलोपः। भनक्ति। बभञ्जिथ, बभङ्क्थ। भङ्क्ता। भङ्ग्धि। अभाङ्क्षीत्॥ भुज पालनाभ्यव्यहारयोः ॥ **20**॥ भुनक्ति। भोक्ता। भोक्ष्यति। अभुनक्॥

**122. भुजोऽनवने 1 | 3 | 66**

तङानौ स्तः। ओदनं भुङ्क्ते। अनवने किम् ? महिं भुनक्ति॥ तङानौ स्तः। ओदनं भुङ्क्ते। अनवने किम् ? महीं भुनक्ति॥ ञीन्धी दीप्तौ ॥ **21**॥ इन्द्धे। इन्धाते। इ्धाताम्। इनधै। ऐन्ध। ऐन्धताम्। ऐन्धाः। विद विचारमे ॥ **22**॥ विन्ते वेत्ता॥

---

**विशेषार्थः** – लङि म.पु.एकवचने सिपि अहिनस् + स् इति जाते ''**हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्**'' इत्यनेन स् लोपे अहिनस् स्थिते, अत्र पूर्वसूत्रं **तिप्यनस्तेः** कार्यं न करोति। अतः अग्रिमं सूत्रं प्रवृत्तं भवति। अधुना ''**सिपि धातोः रुर्वा**'' इत्यनेन रुत्वमेव प्राप्तं भवति। अतः एव पदसंज्ञकस्य सकारान्तधातोः स् स्थाने रुकारः। विकल्पपक्षे दकारः भवति।

**रूपसिद्धिः** – अहिनस् इत्यत्र **सिपि धातोः रुर्वा** इत्यनेन सूत्रेण सस्य रुत्वे विसर्गे सम्मेलने च अहिनः इति रूपं सिद्धम्। पक्षे दकारे चर्त्वे च अहिनत् – अहिनद् इति रूपे भवतः।

**121. पदपरिचयः** – अञ्जेः (प.मी.ए.व.) सिचि (स.ए.व.)

**अनुवृत्तिः** – ''**इडत्यर्तिव्ययतीनाम्**'' **(7-2-66)** इत्यस्मात् सूत्रात् 'इट्' इति पदस्य अनुवृत्तिः।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – अञ्जू धातोः परे सिचः नित्यम् इडागमः स्यात्।

**विशेषार्थः** – अञ्जूधातोः लुङि ''**स्वरतिसूति.**'' इत्यादिसूत्रेण विकल्पेन प्राप्यते स्म। किन्तु प्रकृतसूत्रेण नित्यमिडागमः विधीयते।

**रूपसिद्धिः** – आञ्जीत् लुङि लुङः स्थाने तिबादेशेऽनुबन्धलोपे, शपं प्रबाध्या तत्स्थाने च्लिप्रत्यये, च्लेः सिजादेशेऽनुबन्धलोपे ईडागमेऽनुबन्धलोपे अञ्ज् + स् + ईत् अनेन सूत्रेण नित्यमिटि प्राप्ते 'इट ईटि' द्वारा स् लोपे सिद्धत्वात् सवर्णदीर्घे आडागमे ''आटश्च'' इति वृद्धौ, वर्णसंयोगे च आञ्जीत् रूपमिदं सिद्धम्।

**122. पदपरिचयः** – भुजः (प.ए.व.) अनवने (स.ए.व.)

**अनुवृत्तिः** – ''**अनुदात्तङित्त आत्मनेपदम्**'' इत्यस्मात् सूत्रात् आत्मनेपदम् इति पदमनुवर्तते।

**समासः** – न अवनम् – अनवनम्, तस्मिन् अनवने (न.त.)

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – पालनभिन्नार्थे भुज्धातोः आत्मनेपदप्रत्ययाः स्युः।

**विशेषार्थः** – एतावत् रुधादिगणपठितपरस्मैपदधातूनां विवरणं प्राप्तम्। सम्प्रति आत्मनेपदधातूनां विवरणम्। भुज-पालनाऽभ्यवहारयोः। 'भुज' इति धातोः अर्थद्वयं भवति। 1. पालनम् 2. भक्षणम्। अतः सूत्रस्य कथनमस्ति-केवलं भक्षणस्य अर्थग्रहणे एव आत्मनेपदप्रत्ययाः स्युः। अनवने > अवनम् = पालनम्, न अवनम् इति अनवनम्, तस्मिन् अनवने।

**रूपसिद्धिः** – भुज् धातोः श्नम्प्रत्ययेऽनुबन्धलोपे, नस्य अनुस्वारे परसवर्णे च भुञ्ज् इति जाते, लटि, तत्स्थाने तप्रत्ययादेशे, चर्त्वे, ''**चोः कुः**'' इति कुत्वे, टेः एत्वे च 'भुङ्क्ते' इति रूपं सिद्धति।

## स्वाध्यायः

**1. योग्यविकल्पं चित्वा उत्तरं ददत।**

(1) 'रुधादिभ्यः' इत्यत्र कः समासः ?

(क) तत्पुरुषः (ख) बहुव्रीहिः (ग) कर्मधारयः (घ) द्वंन्द्वः

(2) 'भुजोऽनवने' इतीदं किम्प्रकारकं सूत्रम् ?

(क) विधिः (ख) अतिदेशः (ग) अधिकारः (घ) संज्ञा

(3) 'तिप्यनस्तेः' इत्यत्र कः धातुः ?

(क) भूधातुः (ख) तिप्धातुः (ग) अस्धातुः (घ) कास्धातुः

(4) 'अञ्जेः सिचि' इति सूत्रेण कस्यागमः भवति ?

(क) इट् (ख) शप् (ग) अञ् (घ) सिच्

(5) पदान्तधातोः स् स्थाने रुः केन भवति ?

(क) ससजुषो रुः (ख) सिपि धातो रुर्वा (ग) एरुः (घ) कर्तरि शप्

**2. एकैकवाक्येन उत्तराणि लिखत।**

(1) विद्-धातोः कति अर्थाः ?

(2) इमागमः केन भवति ?

(3) **'श्नान्नलोपः'** सूत्रस्य कः अर्थः ?

(4) 'अनवने' इत्यस्य कः अर्थः ?

**3. सविस्तरम् उत्तरं लिखत।**

(1) रुध् धातुः कीदृशः ?

(2) भुजोऽवने वा भुजोऽदने इत्यत्र किं योग्यम् ?

(3) 'तृणेढि' रूपसिद्धौ 'तृणह इम्' इत्यस्य का आवश्यक्ता ?

**4. रूपसिद्धिः।**

(1) अहिनद् (2) तृणेढि (3) रुणद्धि (4) हिनस्ति।

•

**10** # अथ तनादिप्रकरणम्

**तनु-विस्तारे | 1 |**

**123. तनादिकृभ्यः उः 3 | 1 | 79**

शपोऽपवादः। तनोति, तनुते। ततान, तेने। तनितासि, तनितासे। तनिष्यति, तनिष्यते। तनोतु, तनुताम्। अतनोत् अतनुत। तनुयात्, तन्वीत। तन्यात् तनिषीष्ट। अतानीत् - अतनीत्।

**124. तनादिभ्यस्तथासोः 2 | 4 | 79**

तनादेः सिचो वा लुक् स्यात् तथासोः। अतत-अतनिष्ट। अतथाः - अतनिष्ठाः। अतनिष्यत् अतनिष्यत॥ षणु-दाने सनोति-सनुते (2-4-58)।

**125. ये विभाषा 6 | 4 | 43**

जन-सन-खनाम् आत्त्वं वा यादौ क्ङिति। सायात् - सन्यात्।

---

**123. पदपरिचयः** - तनादिकृञ्भ्यः (प.बहु.वच.), श्नम् (प्र.ए.व.)।

**समासः** - तन् आदिर्येषान्ते तनादयः (तद्गुणसंविज्ञानबहु॰) तनादयश्च कृञ् च इति तनादिकृञः इति इतरेतरद्वन्द्वः तेभ्य तनादिकृञ्भ्यः।

**अनुवृत्तिः** - ''**कर्तरि शप्**'' **(3-1-68)** इत्यस्मात् शप् तथा ''**सार्वधातुके यक्**'' **(3-1-67)** इत्यस्मात् सूत्रात् सार्वधातुके इति पदम् अनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - कर्त्रर्थे सार्वधातुके परे तनादिगणधातुभ्यः तथा कृधातोः 'उ' प्रत्ययः भवति शपं प्रबाध्य।

**विशेषार्थः** - धातुप्रकरणे तनादिप्रकरणम् अष्टमं प्रकरणमस्ति। कर्त्रर्थे सार्वधातुके प्रत्यये परे तनादिगणपठितेभ्यः धातुभ्यः कृञ्धातोश्च शपं प्रबाध्य उप्रत्ययः भवति।

**रूपसिद्धिः - तनोति** - 'तनु विस्तारे' इति धातोः लटि तत्स्थाने तिप्प्रत्यये, 'तन् + ति' इति जाते, ''तनादिकृञ्भ्यः उः'' इत्यनेन उप्रत्यये, 'तन् + उ + ति' इति जाते, गुणे, वर्णसंयोगे च - 'तनोति' इति रूपं सिद्ध्यति।

**124. पदपरिचयः** - तनादिभ्यः (प.ब.व.) तथासोः (स.द्वि.व.)

**अनुवृत्तिः** - ''**गातिस्थाधुपाभूभ्यः सिचः परस्मैपदेषु**'' इत्यस्मात् सूत्रात् सिचः, ''**ण्यक्षत्रियार्षञितो यूनि लुगणिञोः**'' इत्यस्मात् सूत्रात् 'लुक्' इत्यनुवर्तते तथा ''**विभाषा घ्राधेट्शाच्छासः**'' इत्यस्मात् विभाषा इति पदमनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**समासः** - गातिश्च स्थाश्च घुश्च पाश्च इति गातिस्थाघुपाभुवः, तेभ्यः गातिस्थाघुपाभूभ्यः इति इतरेतरद्वन्द्वः।

**सरलार्थः** - तनादिगणधातुभ्यः परे सिचः विकल्पेन लोपः स्यात् तप्रत्यये वा थास्प्रत्यये परे।

**विशेषार्थः** - तथासोः अस्मिन् पदे थासः साहचर्यकारणत्वात् आत्मनेपदे एकवचने तप्रत्ययस्य एव ग्रहणं भवति परस्मैपदे मध्यमपुरुषबहुवचने थस्थाने आगमप्रत्यये तकारस्य ग्रहणं नास्ति। तनादिगणपठितेभ्यः धातुभ्यः तस्प्रत्यये वा थास्प्रत्यये परतः सिचः विकल्पेन लोपः भवति।

**रूपसिद्धिः - अतत - अतनिष्ट** - तन्धातोः लुङि आत्मनेपदे प्र.पु.एकवचने 'अतन् + स् + त' इति दशायाम्, इडागमात्पूर्वं ''**तनादिभ्यस्तथासोः**'' इति सूत्रेण तप्रत्यये परे सकारस्य वैकल्पिकलोपे, ''**सार्वधातुकमपित्**'' इति तप्रत्ययस्य झलादेः ङित्त्वाच्च ''**अनुदात्तोपदेशवनति॰**'' इत्यादिसूत्रेण धातोः नस्य लोपे 'अतत' इति सिद्धम्। लुगभावे सिचः इडागमे, सस्य षत्वे ष्टुत्वे च 'अतनिष्ट' इति रूपं सिद्ध्यति।

**125. पदपरिचयः** - ये (स.ए.व.), विभाषा (प्र.ए.व.)।

**अनुवृत्तिः** - ''**जन-सन-खनां सञ्झलोः**'' **(6-4-42)** इत्यस्मात् सूत्रात् जन-सन-खनाम् इति पदमनुवर्तते। ''**विड्वनोरनुनासिकस्यात्**'' **(6-4-41)** इत्यस्मात् सूत्रात् 'आत्' इति पदमनुवर्तते। ''**अनुदात्तोपदेशवनतितनो-त्यादीनामनुनासिकलोपो झलि क्ङिति**'' **(6-4-37)** इत्यस्मात्सूत्रात् 'क्ङिति' इति पदम् अनुवर्तते।

**126. जन-सन-खनां सञ्झलोः 6 | 4 | 42**

एषाम् आकारोऽन्तादेशः स्यात् सनि झलादौ क्ङिति च। असात-असनिष्ट। असायाः - असनिष्ठाः। एषामाकारेऽन्तादेशः स्यात् सनि झलादौ क्ङिति। आसात, असनिष्ट॥ क्षणु पिंसायाम् ॥ 3॥ क्षणोति, क्षणुते॥ ह्यन्तेति न वृद्धः। अक्षणीत्, अक्षत, अक्षणिष्ट। अक्षथाः, अक्षणिष्ठाः॥ क्षिणु च ॥ 4॥ अप्रत्यये लघूपधस्य गुणो वा। क्षेणोति, क्षिणोति। क्षेणिता। अक्षेणीत्, अक्षित, अक्षेणिष्ट॥ तृणु अदने ॥ 5॥ तृणोति, तर्णोति; तृणुते, तर्णुते॥ डुकृञ् करणे ॥ 6॥ करोति॥

**127. अत उत्सार्वधातुके 6 | 4 | 110**

उप्रत्ययान्तस्य कृञोऽकारस्य उः स्यात् सार्वधातुके क्ङिति। कुरुतः॥

**128. न भकुर्छुराम् 8 | 2 | 79**

भस्य कुर्छुरोरुपधाया न दीर्घः। कुर्वन्ति॥

---

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अकारादौ किति ङिति प्रत्यये परे जन्-सन्-खन्धातूनां नकारस्य स्थाने विकल्पेन आकारादेशः स्यात्।

**विशेषार्थः** - लिङि परस्मैपदे सन् + यास् + त् इत्यत्र **ये विभाषा** सूत्रं प्रस्तुतं भवति। अस्मिन् सूत्रे प्रतिपादितमस्ति यत् सूत्रस्थानाम् एतेषां धातूनां नस्य स्थाने विकल्पेन आत् आदेशः भवति। अलोऽन्त्यपरिभाषया अयमाकारादेशः अन्त्यस्य अलः नकारस्य स्थाने आकारादेशः भवति।

**रूपसिद्धिः** - **सायात्-सन्यात्** 'सन् + यास् + त्' इति दशायां सनः परत्र यासुडागमस्य ''**किदाशिषि**'' इत्यनेन कित्त्वात् यकारादेशस्य प्रकृतसूत्रेण नकारस्य स्थाने आकारादेशे, सवर्णदीर्घे, यासुटः सस्य संयोगादिलोपे 'सायात्' इति रूपं सिद्ध्यति। आकारादेशाऽभावे - 'सन्यात्' इति रूपं जायते।

**126. पदपरिचयः** - जनसनखनां (ष.ब.व.), सञ्झलोः (स.द्वि.व.)।

**अनुवृत्तिः** - **विड्वनोरनुनासिकस्यात् (6-4-41)** इत्यस्मात् सूत्रात् आत् इति पदमनुवर्तते। ''**अनुदात्तोपदेशस्य**'' **(6-4-37)** वनतितनो त्यादीनाम् अनुनासिकलोपो झति 'क्ङिति' इत्यस्मात्सूत्रात् क्ङिति इति पदम्।

**समासः** - जन् च सन् च खन् च इति जनसनखनः, तेषां जनसनखनाम् इति इतरेतरद्वन्द्वः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - सन्प्रत्यये वा झलादौ किति ङिति च प्रत्यये परतः, जनसनखनां धातूनां नस्य स्थाने आकारादेशः भवति।

**विशेषार्थः** - प्रथम-पुरुष-एकवचने असन् + स् + त अत्र **तनादिभ्यस्तथासोः** इत्यनेन सस्य विकल्पेन लोपः प्राप्तः भवति। असन् + त अत्र ''**अनुदात्तोपदेशवनति**'' इत्यादिसूत्रेण अनुनासिकनकारस्य लोपः भवति तदा सूत्रमिदं समायाति। सन् च झल् च सञ्झलौ, तयोः सञ्झलोः। 'सञ्झलोः' इत्यत्र झलिति पदं 'क्ङिति' इति पदस्य विशेषणम् अस्ति। अतः झलादौ क्ङिति इत्यर्थः भवति। अलोऽन्त्यपरिभाषया अयमाकारादेशः धातोः अन्त्यस्य अलः अर्थात् नस्य स्थाने प्रवृत्तः भवति। सूत्रेऽस्मिन् ''**अनुदात्तोपदेशवनति ॰**'' इत्यादिसूत्रेण झलि इत्यस्य अनुवृत्तिः समायाति। तस्य सम्बन्धः सनि इत्यनेन सह विद्यते। अतः झलादौ सनि अस्य सूत्रस्य प्रवृत्तिः भवति। जिजनिषति इत्यत्र सन् झलादिः न। अतः आत्वं न भवति।

**रूपसिद्धिः** - **असात-असनिष्ट, असन् + त सार्वधातुकमपित् तङ् इति जनसनखनां** ॰ इत्यनेन सूत्रेण आत् आदेशे सवर्णदीर्घे असात। पक्षे सिचः अलुकि इडागमे च असनिष्ट इति रूपं सिद्धम्।

**127. पदपरिचयः** - अतः (ष.ए.व.), उत् (प्र.ए.व.) सार्वधातुके (स.ए.व.)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - सार्वधातुके किति ङिति च प्रत्यये परे उप्रत्ययान्तकृञ्-धातोः अकारस्य स्थाने उकारादेशः भवति।

**विशेषार्थः** - करु + तस् इति अवस्थायां सूत्रमेतत् समायाति। पूर्ववर्तिप्रकरणे कृधातुसमन्वितरूपसिद्धौ प्रागेव प्रतिपादितमस्ति। परंतु सूत्रस्यार्थः सार्वधातुके किति ङिति च प्रत्यये उप्रत्ययान्तकृञ्धातोः अकारस्य स्थाने उकारादेशः स्यात्।

**रूपसिद्धिः** - 'करु + तस्' अस्यामवस्थायाम् ''**अत उत्सार्वधातुके**'' इत्यनेन सूत्रेण अकारस्य स्थाने उकारादेशे, सस्य रुत्वे विसर्गे, वर्णसंयोगे च - 'कुरुतः' रूपमिदं सिद्धम्।

**129. नित्यं करोतेः 6 | 4 | 108**

करोतेः प्रत्ययोकारस्य नित्यं लोपो म्वोः परयोः। कुर्वः, कुर्मः। कुरुते। चकार, चक्रे। कर्ता। करिष्यति, करिष्यते। करोतु, कुरुताम्। अकरोत्; अकुरुत।

**130. ये च 6 | 4 | 109**

कृञ उलोपो यादौ प्रत्यये परे। कुर्यात्, कुर्वीत। क्रियात्, कृषीष्ट। अकार्षीत्, अकृत। अकरिष्यत्, अकरिष्यत॥

---

**128. पदपरिचयः** - न (अव्ययपदम्) भकुर्छुराम् (ष.ब.व.)

**अनुवृत्तिः** - ''**र्वोरुपधायाः दीर्घ इकः**'' **(18-2-70)** इत्यस्मात् सूत्रात् उपधायाः, दीर्घः इति पदद्वयम् अनुवर्तते।

**समासः** - भं च कुर् च छुर् च भ-कुर्-छुरः, तेषां भकुर्छुराम् इति इतरेतरद्वन्द्वः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - भसंज्ञकयोः कुर् छुर् एतयोः उपधायाः दीर्घः न भवति।

**विशेषार्थः** - कुर् + व् + अन्ति इत्यत्र **हलि च** इत्यनेन सूत्रेण उपधादीर्घे प्राप्ते सूत्रमेतत् समायाति। अस्याम् अवस्थायाम् उपधायाः दीर्घत्वेन अयोग्यरूपं सिद्धं भवति। अतः एतेन सूत्रेण भसंज्ञकयोः कुर्-छुर् इत्यनयोः उपधायाः दीर्घत्वं न स्यात्। कुर् इति प्रयोगे कुर् शब्दे तुदादिगणपठितस्य धातोः ग्रहणं न कर्तव्यमस्ति, अपि तु केवलं कृधातोः कुर् इत्यस्य एव ग्रहणं कर्तव्यमस्ति।

**रूपसिद्धिः** - **कुर्वन्ति** कुर् + व् + अन्ति इत्यत्र **हलि च** इत्यनेन दीर्घत्वे प्राप्ते **न भकुर्छुराम्** इत्यनेन सूत्रेण तन्निषेधे वर्णसंयोगे कुर्वन्ति इति रूपं सिद्ध्यति।

**129. पदपरिचयः** - नित्यम् (क्रियाविशेषणम्) करोतेः (प.ए.व.)

**अनुवृत्तिः** - ''**उतश्च प्रत्ययादसंयोगात्**'' **(6-4-106)** इत्यस्मात् सूत्रात् विभक्तिं विपरिणमय्य 'प्रत्ययस्य' तथा 'उतः' इत्यनुवर्तते ''**लोपश्चास्यान्यतरस्याम् म्वोः**'' **(6-4-107)** इत्यस्मात् सूत्रात् लोपः इति पदस्य अनुवृत्तिः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - कृधातोः परवर्तिनः अकारस्य नित्यं लोपः स्यात् मकारवकारयोः परयोः।

**विशेषार्थः** - उत्तमपुरुषद्विवचने बहुवचने च अकारस्थाने उकारे कुरु + वस् , कुरु + मस् इति स्थिते **लोपश्चाऽस्यान्यतरस्यां म्वोः** इत्यनेन सूत्रेण उकारस्य वैकल्पिकलोपे प्राप्ते सूत्रमिदं समायाति। कृधातोः रूपसिद्धौ उकारस्य नित्यं लोपं कर्तुं सूत्रमिदं प्रयुक्तमस्ति। कृधातोः परे समागतस्य उकारस्य नित्यं लोपः स्यात् मकारवकारयोः परत्वे।

**रूपसिद्धिः** - **कुर्वः** - कुरु + वस् इत्यवस्थायां **नित्यं करोतेः** इत्यनेन सूत्रेण उलोपे, वसः सकारस्य रुत्वे विसर्गे वर्णसंयोगे च तथैव 'कुर्वः' इति।

**130. पदपरिचयः** - ये (स.ए.व.) च इति (अव्ययपदम्)।

**अनुवृत्तिः** - ''**नित्यं करोतेः**'' **(6-4-108)** इत्यस्मात् सूत्रात् करोतेः इत्यनुवर्तते ''**उतश्च प्रत्ययादसंयोगपूर्वात्**'' **(6-4-106)** ॰ इत्यस्मात् सूत्रात् प्रत्ययस्य, उतः इति अनयोः अनुवृत्तिः। ''**लोपश्चास्यान्यतरस्यां**'' **(6-4-107)** इत्यस्मात् सूत्रात् 'लोपः' इति पदस्य अनुवृत्तिः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - कृञ्धातोः परवर्तिनः उकारस्य लोपः स्यात् यकारादिप्रत्यये परे।

**विशेषार्थः** - विधिलिङि परस्मैपदे प्रथम-पुरुष-एकवचने उविकरणे, गुणे उकारे कुर् + उ + यास् + त् इत्यत्र सूत्रमिदं प्रवर्तते। कुर्यात् इत्यत्र कृञ्धातुस्थस्य अकारस्य स्थाने उकारस्य लोपः स्यात् यादौ प्रत्यये परे। तत्र यकारग्रहणेन यासुटः यकारग्रहणम्।

**रूपसिद्धिः** - कुर् + उ + यास् + त् इत्यत्र **ये च** इत्यनेन सूत्रेण उलोपे कुर् + यास् + त् इति जाते ''**लिङः सलोपोऽनन्त्यस्य**'' इत्यनेन सूत्रेण लोपे सम्मेलने **कुर्यात्** सिद्धम्।

**131. सम्परिभ्यां करोतौ भूषणे। 6 | 1 | 132**

**132. समवाये च। 6 | 1 | 133**

सम्परिपूर्वकस्य करोतेः सुट् स्यात् भूषणे संघाते चार्थे। सँस्स्करोति-अलङ्करोति इत्यर्थः। संस्स्कुर्वन्ति-सङ्घीभवन्तीत्यर्थः। सम्पूर्वकस्य क्वचिदभूषणेऽपि सुट् '**संस्कृतं भक्षाः**' इति ज्ञापकात्॥

आशीर्लिङि परस्मैपदे ''**रिङ् शयग्लिङ्क्षु**'' इत्यनेन सूत्रेण ऋकारस्य रिङ् आदेशः। ततः क्रियात्। एवम् आत्मनेपदे ''**उश्च**'' इत्यनेन सूत्रेण झलादेः लिङः किद्वद्भावे, ऋकारस्य गुणः न स्यात् कृषीष्ट इतीदं रूपं सिद्ध्यति।

**133. उपात् प्रतियत्न - वैकृत - वाक्या - ध्याहारेषु च 6 | 1 | 134**

उपात् कृञः सुट् स्याद् एष्वर्थेषु, चात् प्रागुक्तयोरर्थयोः। प्रतियत्नो गुणाऽऽधानम्। विकृतमेव वैकृतं विकारः। वाक्याऽध्याहारः आकाङ्क्षितैकदेशपूरणम्। उपस्कृता कन्या। उपस्कृतः ब्राह्मणः। एधोदकस्योपस्कुरुते। उपस्कृतं भुङ्क्ते। उपस्कृतं ब्रूते। मनु-अवबोधने। मनुते। मेने। मनिता। मनिष्यते। मनुताम्। अमनुत। मन्वीत। मनिषीष्ट। अमत-अमनिष्ट। अमनिष्यत।

---

**131. पदपरिचयः** - सम्परिभ्याम् (प.द्वि.व.) करोतौ (स. ए.व.) भूषणे (स.ए.व.)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - सम्परि-उपसर्गाभ्यां कृञ्धातोः ''अलङ्करणम्'' इत्यर्थे सुडागमः स्यात्।

**विशेषार्थः** - सम् परि इति उपसर्गयोः संयोगे विशेषकार्यं भवति तत् अत्र प्रतिपाद्यते। उपसर्गसमन्वितरूपसिद्धौ सूत्रमिदं प्रयुक्तं भवति। सम् तथा परि इत्यनयोः उपसर्गयोः पूर्वयोः कृञ्धातोः भूषणार्थे सुडागमः स्यात्।

**132. पदपरिचयः** - समवाये (स.ए.व.) च (अव्ययपदम्)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - सम्परि-उपसर्गाभ्यां कृञ्धातोः समवायः इत्यर्थे सुडागमः स्यात्।

**विशेषार्थः** - सम् परि इति उपसर्गयोः संयोगे विशेषकार्यं भवति तदत्र प्रतिपादितमस्ति। उपसर्गसमन्वितरूपसिद्धौ सूत्रमिदं प्रयुक्तं भवति। सम् तथा परि इत्यनयोः उपसर्गयोः पूर्वयोः कृञ्धातोः समवाय इति अर्थग्रहणे सुडागमः स्यात्।

**रूपसिद्धिः** - **संस्करोति** - सम् + करोति इत्यवस्थायां ''**सम्परिभ्यां करोतौ भूषणे**'' इत्यनेन सूत्रेण सुडागमे सम् + सुट् + करोति इति जाते अनुबंधलोपे सम् + स् + करोति इति जाते ''**समः सुटि**'' इत्यनेन मकारस्य रुत्वे पूर्वसवर्णस्यानुनासिके तथा पक्षे अनुस्वारागमे रेफस्य विसर्गे **सम्पुङ्कानां सो वक्तव्यः** इति वार्तिकेन विसर्गस्य पुनः सकारे कृते संस्करोति इति रूपं सिद्ध्यति।

**133. पदपरिचयः** - उपात् (प.ए.व.) प्रतियत्नवैकृतवाक्याध्याहारेषु (स.ब.व.) च (अव्ययपदम्)।

**अनुवृत्तिः** - ''**सम्परिभ्यां करोतौ भूषणे**'' **(6-1-132)** इत्यस्मात् सूत्रात् 'करोतौ, भूषणे' इति पदयोःअनुवृत्तिः। ''**समवाये च**'' **(6-1-133)** इत्यस्मात् सूत्रात् 'समवाये' इति पदस्य अनुवृत्तिः।

**समासः** - प्रतियत्नश्च वैकृतञ्च वाक्याध्याहारश्च इति प्रतियत्नवैकृतवाक्याध्याहाराः, तेषु प्रतियत्नवैकृतवाक्याध्याहारेषु इतीतरेतरद्वन्द्वः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - 'उप' इत्युपसर्गात् परस्य 'कृञ्' धातोः ककारस्य सुडागमः भवति, प्रतियत्न-वैकृत-वाक्याध्याहारार्थेषु च गम्यमानेषु।

**विशेषार्थः** - 'उप' इति इत्युपसर्गपूर्वकस्य कृञः सुडागमः कर्तव्यः भवति। विशेषरूपेण 'प्रतियत्नो गुणाऽऽधानम्' नूतनगुणानाम् आधानं करणं प्रतियत्नः कथ्यते। विकृतमेव वैकृतं विकारः। विकृतशब्दे स्वार्थे अण्प्रत्यये वैकृतं भवति। अतः वैकृतस्यार्थः विकारः। 'उपस्कृतं भुङ्क्ते (उपस्कृतं क्रियाविशेषणम्)। वाक्याऽध्याहारः आकांक्षितैकदेशपूरणम् आकांक्षिते वाक्ये एकादेशपदानाम्। अध्याहारः वाक्याध्याहारः कथ्यते।

## स्वाध्यायः

**1. योग्यविकल्पं चित्वा उत्तरं ददत।**

(1) तनादिभ्यस्तथासोः इति सूत्रं किं करोति ?

(क) श्नुप्रत्ययम् (ख) सिज्लोपम् (ग) उप्रत्ययम् (घ) शप्प्रत्ययम्

(2) ''जनसनखनां सञ्झलोः'' ० इति सूत्रेण किं भवति ?

(क) आत् (ख) श्नुः (ग) सिच् (घ) लोपः

(3) अत उत्सार्वधातुके-अनेन किं भवति ?

(क) इट् (ख) अस्य स्थाने उकारादेशः (ग) सिजादेशः (घ) च्लिप्रत्ययः

(4) नित्यं करोतेः-अस्य सूत्रप्रकारः कः ?

(क) विधिः (ख) संज्ञा (ग) अतिदेशः (घ) परिभाषा

(5) कुर्यात् इत्यत्र कः लकारः ?

(क) विधिलिङ् (ख) आशीर्लिङ् (ग) लट् (घ) लुङ्

(6) समवाये इति शब्दस्य कः अर्थः ?

(क) भूषणे (ख) संघीभवने (ग) करोतौ (घ) व्यवहारे

(7) समवाये च-अस्य सूत्रप्रकारः कः ?

(क) विधिः (ख) संज्ञा (ग) अतिदेशः (घ) परिभाषा

**2. एकैकवाक्येन उत्तराणि लिखत।**

(1) ''सम्परिभ्यां करोतौ भूषणे'' अनेन सूत्रेण किम् अवगम्यते ?

(2) ''उपात्प्रतियत्न.'' अस्य सूत्रस्य कः अर्थः ?

(3) ''तनादिभ्यस्तथासोः'' इति सूत्रस्य कः अर्थः ?

(4) 'जिजनिषति' इत्यत्र किमर्थम् आत्त्वं न भवति ?

(5) ''जनसनखनां सञ्झलोः'' इति सूत्रस्य कः अर्थः ?

**3. सविस्तरम् उत्तरम् लिखत।**

(1) ''अत उत्सार्वधातुके'' इति सूत्रं सानुवृत्ति सोदाहरणं व्याख्यात।

(2) ''न भकुर्छुराम्'' इत्यत्र कुर्शब्दं स्पष्टं कुरुत।

(3) ''नित्यं करोतेः'' इति सूत्रं सविस्तरं व्याख्यात।

**4. रूपसिद्धिं कुरुत।**

(1) कुर्यात् (2) संस्करोति (3) अतनिष्ट (4) असनिष्ट

**5. सूत्रव्याख्यानं कुरुत।**

(1) सम्परिभ्यां करोतौ भूषणे।

(2) न भकुर्छुराम्।

(3) उपात् प्रतियत्न - वैकृत - वाक्या - ध्याहारेषु च।

●

| 11 | # क्र्यादिप्रकरणम् |
|---|---|

''**डुक्रिञ् - द्रव्यविनिमये**'' ॥ 1 ॥

**134. क्र्यादिभ्यः श्ना 3 | 1 | 81**

शपोऽपवादः। क्रिणाति। **ई हल्यघोः** - क्रीणीतः। **श्नाऽभ्यस्तयोरातः** - क्रीणन्ति। क्रीणासि, क्रीणीथः, क्रीणीथ। क्रीणामि, क्रीणीवः, क्रीणीमः। क्रीणीते, क्रीणाते, क्रीणते। क्रीणीषे, क्रीणाथे, क्रीणीध्वे। क्रीणे, क्रीणीवहे, क्रीणीमहे। चिक्राय, चिक्रियतुः, चिक्रियुः। चिक्रयिथ - चिक्रेथ। चिक्रिये। क्रेता। क्रेष्यति। क्रेष्यते। क्रीणातु - क्रीणीतात्, क्रीणीताम्। अक्रीणात्। अक्रीणीत। क्रीणीयात्। क्रीणीत। क्रीयात्। क्रेषीष्ट। अक्रैषीत्। अक्रेष्ट। अक्रेष्यत्। अक्रेष्यत॥ **प्रीञ् तर्पणे कान्तौ च ॥ 2 ॥** प्रीणाति प्रीणीते। **श्रीञ् - पाके ॥ 3 ॥** श्रीणाति; श्रीणीते। **मीञ् - हिंसायाम् ॥ 4 ॥**

**135. हिनुमीना 8 | 4 | 15**

उपसर्गस्थान्निमित्तात्परस्य एतयोः नस्य णः स्यात्। प्रमीणाति - प्रमीणीते। **मीनाति॰** इत्यात्त्वम्। ममौ, मिम्यतुः। ममिथ - ममाथ। मिम्ये। माता। मास्यति। मीयात्, मासीष्ट। अमासीत्, अमासिष्टाम्। अमास्त। **षिञ्-बन्धने ॥ 5 ॥** सिनाति; सिनीते। सिषाय, सिष्ये। सेता। **स्कुञ्-आप्रवणे ॥ 6 ॥**

**136. स्तन्भुँ-स्तुन्भुँ-स्कन्भुँ-स्कुन्भुँ-स्कुञ्भ्यः श्नुश्च 3 | 1 | 82**

चात् श्ना। स्कुनोति, स्कुनाति। स्कुनुते, स्कुनीते। चुस्काव, चुस्कुवे। स्कोता। अस्कौषीत्। अस्कोष्ट। स्तन्भ्वादयश्चत्वारः सौत्राः। सर्वे रोधनार्थाः परस्मैपदिनः॥

**स्कुनाति च स्कुनीते च स्कुनोत्याप्लवतेऽपि च। स्कन्दते स्कुन्दते चापि षडाप्लवनवाचिनः॥**

---

**134. पदपरिचयः** - क्र्यादिभ्यः (प.बहु.वच.), श्ना (प्र.ए.व.)

**समासः** - क्रीरादिर्येषान्ते क्र्यादयः, तेभ्यः **क्र्या**दिभ्यः, तद्गुणसंविज्ञानबहु॰ ।

**अनुवृत्तिः** - ''**कर्तरि शप्**'' **(3-1-68)** इत्यस्मात् सूत्रात् 'कर्तरि', इत्यनुवर्तते ''**सार्वधातुके यक्**'' **(3-1-67)** इत्यस्मात् सूत्रात् 'सार्वधातुके' इति पदम् अनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - कर्त्रर्थके सार्वधातुके परे क्र्यादिधातुभ्यः श्नाप्रत्ययः विधीयते। शपः अपवादः।

**विशेषार्थः** - डुक्रीञ् द्रव्यविनिमये। क्री + ति इति दशायां शपि प्राप्ते प्रकृतसूत्रेण तं प्रबाध्य 'श्ना' प्रत्ययः क्रियते। अतः क्र्यादिगणे समागतधातुभ्यः श्नाविकरणप्रत्ययस्य विधानं कृतमस्ति।

**रूपसिद्धिः** - क्री + णा + ति इति स्थिते अनेन श्ना प्रत्यये अनुबंधलोपे क्री + ना + ति इति स्थिते, ङित्वद्भावे, गुणं प्रबाध्य णत्वे वर्ण सम्मेलने 'क्रीणाति' रूपमिदं सिद्धं भवति।

**135. पदपरिचयः** - हिनुमीना (ष.द्वि.व.)

**अनुवृत्तिः** - ''**उपसर्गात् असमासेऽपि णोपदेशस्य**'' **(8-4-14)** इत्यस्मात्सूत्रात् 'उपसर्गात्' इति पदस्य अनुवृत्तिः। ''**रषाभ्यां णो नः समानपदे**'' **(8-4-1)** इत्यस्मात्सूत्रात् 'रषाभ्याम्' णः' इति पदद्वयमनुवर्तते।

**समासः** - हिनुश्च मीनाश्च इति हिनुमीनौ, तयोः 'हीनुमीना' इति इतरेतरद्वन्द्वे लुप्तषष्ठीकं पदम्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - उपसर्गे विद्यमानात् निमित्तात् परत्र 'हिनु' तथा 'मीना' इत्यनयोः धात्वोः नकारस्य स्थाने णकारादेशः क्रियते।

**विशेषार्थः** - 'मीञ् हिंसायाम्' इति धातोः 'प्र' इत्युपसर्गे प्र + मीनाति-अस्यामवस्थायां सूत्रमिदं समायाति। उपसर्गस्थाभ्यां रेफषकाराभ्यां परे हिनु-मीनाधातू स्यातां, तदा तस्य नवर्णस्य णत्वं कर्तव्यम् इत्यादेशः।

**रूपसिद्धिः** - **प्रहिणोति** - प्र इत्युपसर्गपूर्वकात् हिनुधातोः लटिः, तिपि, अनुबन्धलोपे, ''हिनुमीना'' इति सूत्रेण नस्य णत्वे, धातोः उकारस्य गुणे 'प्रहिणोति' इति रूपं सिद्धति।

**136. पदपरिचयः** - स्तंभुँ-स्तुंभुँ-स्कन्भुँ-स्कुन्भुँ-स्कुञ्भ्यः (प.ब.व.) श्नुः (प्र.ए.व.) च (अव्ययम्)।

**137. हलः श्नः शानज्झौ 3 | 1 | 83**

हलः परस्य श्नः शानजादेशः स्याद् हौ परे। स्तभान॥

**138. जॄ-स्तन्भुँ-म्रुचुँ-म्लुचुँ-ग्रुचुँ-ग्लुचुँ-ग्लुञ्चुँ-श्विभ्यश्च 3 | 1 | 58**

च्लेरङ् वा स्यात्।

**139. स्तन्भेः 8 | 3 | 67**

स्तन्भेः सौत्रस्य सस्य षः स्यात्। व्यष्टभत्। अस्तम्भीत्॥ स्तन्भेः सौत्रस्य सस्य षः स्यात्। व्यष्टभत्। अस्तम्भीत्॥ युञ् बन्धने ॥ 7॥ युनाति, युनीते। योत॥ क्नूञ् शब्दे ॥ 8॥ क्नूनाति, क्नूनीते॥ द्रूञ् हिंसायाम् ॥ 9॥ द्रूणाति, द्रूणीते॥ दॄ विदारणे ॥ 10॥ दृणाति, दृणते॥ पूञ् पवने ॥ 11॥

---

**अनुवृत्तिः** - ''**कर्तरि शप्**'' **(3-1-68)** इत्यस्मात्सूत्रात् 'कर्तरि' इति इत्यनुवर्तते। ''**सार्वधातुके यक्**'' **(3-1-67)** इत्यस्मात्सूत्रात् 'सार्वधातुके' इति पदस्य अनुवृत्तिः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - कर्त्रर्थे सार्वधातुके परे स्तंभुँ, स्तुंभुँ, स्कंभुँ, स्कुंभुँ, स्कुञ्धातुभ्यः श्नुः एवं श्ना प्रत्ययः भवति।

**विशेषार्थः** - स्कुञ् आप्रवणे उभयपदिधातुः। अनुदात्तत्वे, नित्यमिट्, श्नु, श्ना विकरणप्रत्ययद्वयमपि प्राप्तम्। कर्त्रर्थे सार्वधातुके परे एतेभ्यः स्तंभुँ-स्तुंभुँ-स्कंभुँ-स्कुंभुँ-स्कुञ्धातुभ्यः श्नुप्रत्ययः श्नाप्रत्ययश्च भवति।

**रूपसिद्धिः** - स्कुञ् + श्ना अनुबन्धलोपे स्कु + ना इति जाते लटि, तिपि, स्कुनाति। पक्षे श्नुप्रत्यये गुणे स्कुनोति इति सिद्धम्।

**137. पदपरिचयः** - हलः (प.ए.व.) श्नः (ष.ए.व.) शानच् (प्र.ए.व.) हौ (स.ए.व.)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - हलः परस्य श्नः स्थाने शानच् आदेशः स्यात्, 'हि' इति शब्दे परे।

**विशेषार्थः** - श्नापक्षे मध्यमपुरुष-एकवचने उपधायाः नकारलोपानन्तरं स्तभ् + श्ना + हि इति जाते, अत्र सूत्रमिदं समायाति। हलः परवर्तिनः श्नः स्थाने शानच् आदेशः भवति हौ परे।

**रूपसिद्धिः** - **स्तभान** - लोटि मध्यपुरुषैकवचने 'स्तभ् + श्ना + हि' इति दशायां 'हि' इति परे सति, हल्वर्णात् भकारात् परत्र विद्यमानस्य 'श्ना' प्रत्ययस्य स्थाने शानजादेशेऽनुबन्धलोपे 'स्तभ् + आन + हि' इति जाते, ''अतो हेः'' इत्यनेन हेर्लोपे - 'स्तभान' इति रूपं सिद्ध्यति।

**138. पदपरिचयः** - जॄ-स्तुम्भुँ-म्रुचुँ-म्लुचुँ-ग्रुचुँ-ग्लुचुँ-ग्लुञ्चुँ-श्विभ्यः (प.ब.व.) च (अव्ययम्)।

**अनुवृत्तिः** - ''**च्लेः सिच्**'' **(3-1-44)** इत्यस्मात्सूत्रात् च्लेः इति पदस्य अनुवृत्तिः। ''**अस्यतिवक्तिख्यातिभ्योऽङ्**'' **(3-1-52)** इत्यस्मात् सूत्रात् 'अङ्' इत्यस्य अनुवृत्तिः। ''**इरितो वा**'' **(3-1-57)** इत्यस्मात्सूत्रात् 'वा' इति अव्ययपदस्य अनुवृत्तिः।

**समासः** - जॄश्च स्तन्भुश्च म्रुचुश्च म्लुचुश्च ग्रुचुश्च ग्लुचुश्च ग्लुञ्चुश्च श्विश्च इति जॄस्तन्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्वयः तेभ्यः इतीतरेतरद्वन्द्वः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - जॄ-स्तन्भुँ-म्रुचुँ-म्लुचुँ-ग्रुचुँ-ग्लुचुँ-ग्लुञ्चुँ-श्वि-एतेभ्यः धातुभ्यः परतो विद्यमानस्य च्लेः स्थाने अङ् आदेशः विकल्पेन भवति।

**विशेषार्थः** - लुङि स्तन्भ्धातोः परस्य च्लेः स्थाने विकल्पेन अङादेशः। जॄ-स्तन्भुँ-म्रुचुँ-म्लुचुँ-ग्रुचुँ-ग्लुचुँ-ग्लुञ्चुँ-श्वि-एतेभ्यः धातुभ्यः लुङि च्लिस्थाने विकल्पेन अङ् आदेशः स्यात्।

**रूपसिद्धिः** - **अस्तभत्,** स्तंभधातुः लुङि तिपि ''**इतश्च**'' इति तिबिकारलोपे, च्लिप्रत्यये, च्लेः सिजादेशे प्राप्ते, तं प्रबाध्य प्रकृतसूत्रेण अङादेशे, ङित्त्वात् ''**अनिदितां हल उपधायाः** क्ङिति'' इत्यनेन उपधानकारलोपे, अडागमे, वर्णसंयोगे च - 'अस्तभत्' इति रूपं सिद्धम्।

**139. पदपरिचयः** - स्तन्भेः (ष.ए.व.) च (अव्ययम्)।

**अनुवृत्तिः** - ''**उपसर्गात्सुनोति.**'' **(8-3-65)** इत्यस्मात् 'उपसर्गात्' इति पदम् अनुवर्तते। ''**सहेः साडः सः**'' **(8-3-56)** इत्यस्मात्सूत्रात् 'सः' इत्यनुवर्तते। ''**अपदान्तस्य मूर्धन्यः**'' **(8-3-55)** इत्यस्मात्सूत्रात् 'मूर्धन्यः' इति पदमनुवर्तते।

**140. प्वादीनां ह्रस्वः 7 | 3 | 80**

पूञ्-लूञ्-स्तॄञ्-कॄञ्-वॄञ्-धूञ्-शॄ-पॄ-वॄ-भॄ-मॄ-दॄ-जॄ-झॄ-धॄ-नॄ-कॄ-ॠ -गॄ-ज्या-री-व्ली-प्लीनां चतुर्विंशतेः शिति ह्रस्वः। पुनाति; पुनीते। पविता॥ **लूञ्-छेदने ॥ 12॥** लुनाति। लुनीते ॥ स्तॄञ् आच्छाने ॥ **13**॥ स्तृणाति। शर्पूर्वाः खयः। तस्तार। तस्तरतुः। तस्तरे। स्तरीता। स्तरिता। स्तृणीयात्, स्तृणीत। स्तीर्यात्॥

**141. लिँङ्-सिँचोरात्मनेपदेषु 7 | 2 | 42**

वृङ् - वृञ्भ्याम् ॠदन्ताच्च परयोर्लिंङ्सिंचोरिड् वा स्यात्तङि॥

**142. न लिंङि 7 | 2 | 39**

वृत इटो लिंङि न दीर्घः। स्तरिषीष्ट। **उश्च** इत्यनेन कित्त्वम् - स्तीर्षीष्ट। **सिचि च परस्मैपदेषु** - अस्तारीत्, अस्तारिष्टाम्, अस्तारिषुः। अस्तरीष्ट - अस्तरिष्ट - अस्तीर्ष्ट॥

---

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - उपसर्गस्थनिमित्तात् परे सौत्रस्य स्तन्भ्धातोः सकारस्य स्थाने षादेशः स्यात्।

**विशेषार्थः** - उपसर्गयोगे स्तंभ् - धातोः सस्य स्थाने षकारविधानम्। उपसर्गस्थेणः परे स्तंभधातोः सस्य स्थाने षकारः भवति।

**रूपसिद्धिः - प्रतिष्टभ्नाति** प्रति + स्तभ्नाति = प्रतिष्टभ्नाति। अनेन सूत्रेण सकारस्य शत्वे, **ष्टुना ष्टुः** इत्यनेन सूत्रेण तकारस्य टकारे प्रतिष्टभ्नाति। वि + अस्तभत् इत्यत्र अनेन सूत्रेण षत्वे ष्टुत्वे यण् आदेशे व्यष्टभत् सिद्धम्।

**140. पदपरिचयः** - प्वादीनाम् (ष.ब.व.) ह्रस्वः (प्र.ए.व.)

**समासः** - पूधातुः आदिर्येषां ते प्वादयः, तेषां प्वादीनाम्। (तद्गुणसंविज्ञानबहु°)

**अनुवृत्तिः** - **'ष्ठिवुक्लमुचमां शिति' (7-3-75)** इत्यस्मात् सूत्रात् 'शिति' इति पदम् अनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - शितः परे पूञ् इत्यादिचतुर्विंशतेः धातूनाम् अन्त्यस्य अचः स्थाने ह्रस्वः भवति।

**विशेषार्थः** - 'पूञ् पवने' इति धातोः श्नाप्रत्यये परे ह्रस्वविधानं कर्तुं सूत्रमिदं समागतम्।

**रूपसिद्धिः -पुनाति** 'पूञ् + श्ना + ति' इत्यवस्थायाम् अनुबन्धलोपे पू + ना + ति इति स्थिते, अनेन सूत्रेण ह्रस्वे पुनाति इति सिद्धम्।

**141. पदपरिचयः** - लिङ्सिचोः (ष.द्वि.व.) आत्मनेपदेषु (स.ब.व.)

**अनुवृत्तिः** - **'वृतो वा' (7-2-38)** इत्यस्मात् सूत्रात् 'वृतः, वा' इति पदेऽनुवर्तेते। **''इट् सनि वा'' (7-2-41)** इत्यस्मात् 'इट्' इति पदमनुवर्त्तते।

**समासः** - लिङ् च सिच्च इति लिङ्सिचौ, तयोः लिङ्सिचोः इति इतरेतरद्वन्द्वः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - वृङ्वृञ्धातुभ्यां वा ॠकारान्तधातोः परयोः लिङ्लकारसिजादेशयोः विकल्पेन इडागमः स्यात्, आत्मनेपदे तप्रत्यये परे सति।

**विशेषार्थः** - स्तॄञ् आच्छादने इति धातोः आशीर्लिंङि स्तॄ + सीच् + स् + त इत्यत्र इडागमः नित्यमेव भवति। अतः सूत्रमिदं कार्यं करोति। वृङ्वृञ्धातुभ्यां वा ॠकारान्तधातोः परयोः लिङ्सिचोः विकल्पेन इडागमः आत्मनेपदे स्यात्।

**रूपसिद्धिः - स्तरिषीष्ट** स्तॄ + सीच् + स् + त इत्यवस्थायां सूत्रेणानेन इडागमे गुणे स्तरिषीष्ट इति रूपं सिद्धम्।

**142. पदपरिचयः** - न (अव्ययपदम्) लिङि (स.ए.व.)

**अनुवृत्तिः** - **''वृतो वा'' (7-2-38)** इत्यस्मात् सूत्रात् 'वृतः', **''आर्धधातुकस्येड्वलादेः'' (7-2-35)** इत्यस्मात् 'इट्', **''ग्रहोऽलिटि दीर्घः'' (7-2-37)** इत्यस्मात् 'दीर्घ' इति पदमनुवर्त्तते।

**143. ग्रहोऽलिटि दीर्घः 7 | 2 | 37**

एकाचो ग्रहेर्विहितस्य इटो दीर्घः, न तु लिटि। ग्रहीता। गृह्णातु। **हलः श्नः शानज्झौ** गृहाण। गृह्यात्। ग्रहीषीष्ट। **ह्म्यन्त॰** इति न वृद्धिः – अग्रहीत्। अग्रहीष्टाम्। अग्रहीष्ट। अग्रहीषाताम्॥ **कुष – निष्कर्षे ॥ 21॥** कुष्णाति। कोषिता। **अश भोजने ॥ 22॥** अश्नाति आश। आशिता। अशिष्यति। अश्नातु। अशान॥ **मुष-स्तेये ॥ 23॥** मोषिता। मुषाण॥ **ज्ञा-अवबोधने ॥ 24॥** जज्ञौ। **वृङ्-सम्भक्तौ** ॥ 25॥ वृणीते। ववृषे। ववृढ्वे। वरिता-वरीता। अवरिष्ट-अवरीष्ट-अवृत॥

---

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – वृङ्वृञ्धातुभ्यां वा ॠकारान्तधातुभ्यः परत्र विद्यमानस्य इडागमस्य दीर्घः न भवति, लिङि परे।

**विशेषार्थः** – इडागमपक्षे 'स्तरिषीष्ट' इत्यादिरूपेषु "**वॄतो वा**" इत्यनेन इटः वैकल्पिकदीर्घः प्राप्नोति। तस्य प्रकृतसूत्रेण निषेधः क्रियते।

**रूपसिद्धिः** – **स्तरिषीष्ट**-स्तॄ + सीच् + स् + त इत्यवस्थायां इडागमे दीर्घाभावे षत्वे ष्टुत्वे वर्णसम्मेलने स्तरिषीष्ट इति रूपं सिद्धम्।

**143. पदपरिचयः** – ग्रहः(प.ए.व.) अलिटि (स.ए.व.) दीर्घः (प्र.ए.व.)

**अनुवृत्तिः** – **"आर्धधातुकस्येड्वलादेः" (7-2-35)** इत्यस्मात् विभक्तिं विपरिणमय्य 'इटः' इत्यनुवर्तते। **"एकाच उपदेशेऽनुदात्तात्" (7-2-10)** इत्यस्मात् 'एकाचः' इति पदमनुवर्तते।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – एकाचः ग्रहधातोः परे इटः दीर्घादेशः स्यात् परंतु लिट्परे न।

**विशेषार्थः** – 'ग्रह उपादाने' इति धातोः 'ग्रह् + इता' इति दशायां सूत्रमिदं समायाति। ग्रह् धातोः परत्र विद्यमानस्य इटः दीर्घादेशः भवति, न तु लिटि।

**रूपसिद्धिः** – **ग्रहीता** 'ग्रह् + इता' इत्यत्र अनेन सूत्रेण दीर्घत्वेन वर्णसम्मेलने 'ग्रहीता' इति रूपं सिद्धं भवति।

**स्वाध्यायः**

**1. योग्यविकल्पं चित्वा उत्तरं ददत।**

(1) 'क्र्यादिभ्यः श्ना' इत्यनेन सूत्रेण कस्य अपवादः ?

(क) शपः (ख) श्नः (ग) इटः (घ) आदः

(2) हिनुमीना इत्यत्र कति धातवः ?

(क) एकः (ख) द्वौ (ग) त्रयः (घ) चत्वारः

(3) "स्तंम्भुं॰" इति सूत्रे कति विकरणप्रत्ययाः ?

(क) एकः (ख) द्वौ (ग) त्रयः (घ) चत्वारः

(4) "जॄ-स्तन्भु-म्रुचु॰" इत्यादिसूत्रेण कः आदेशः क्रियते ?

(क) अङ् (ख) आट् (ग) इट् (घ) शप्

(5) "हलः शानज्झौ" इत्यनेन सूत्रेण कः आदेशः ?

(क) शप् (ख) श्नुः (ग) श्ना (घ) शानच्

(6) प्रतिष्टभ्नाति इति साधनिकायां किं मुख्यं सूत्रम् ?

(क) स्तन्भेः (ख) ष्टुना ष्टुः (ग) जॄ-स्तंभ्रु ० (घ) प्वादीनां ह्रस्वः

(7) पुनाति इत्यत्र मूलधातुः कः ?

(क) पु (ख) पुना (ग) पू (घ) पूञ्

**2. एकैकवाक्येन उत्तराणि लिखत।**

(1) 'प्वादीनां ह्रस्वः' इत्यनेन सूत्रेण किं भवति ?

(2) 'प्वादीनां ह्रस्वः' अस्मिन् सूत्रे कति धातवः ? के च ते ?

(3) 'लिङ्सिचोरात्मनेपदेषु' इत्यस्य कः अर्थः ?

(4) स्तरिषीष्ट इति कस्य सूत्रस्य उदाहरणमस्ति ?

(5) 'ग्रहोऽलिटि दीर्घः' इत्यस्य कः अर्थः ?

**3. सविस्तरम् उत्तरं लिखत।**

(1) ''स्तंभु०'' इति सूत्रं विस्तारपूर्वकं लिखत।

(2) 'प्वादीनां ह्रस्वः' इति सूत्रस्य सोदाहरणमर्थं लिखत।

(3) 'न लिङि' इति सूत्रस्य आवश्यकता का ?

**4. रूपसिद्धिं कुरुत।**

(1) प्रमीणाति (2) स्कुनोति (3) अस्तभत् (4) स्तरिषीष्ट।

●

# 12 चुरादिप्रकरणम्

**144. सत्याप-पाश - रूप-वीणा-तूल-श्लोक-सेना-लोम-त्वच-वर्म-वर्ण-चूर्ण-चुरादिभ्यो णिच् 3 | 1 | 25**

एभ्यो णिच् स्यात्। चूर्णान्तेभ्यः प्रातिपदिकाद्धात्वर्थे ◦ (सूत्रम्) इत्येव सिद्धे तेषामिह ग्रहणं प्रपञ्चार्थम्। चुरादिभ्यस्तु स्वार्थे। पुगन्त ◦ इति गुणः। सनाद्यन्ता ◦ इति धातुत्वम्। तिप्-शबादि, गुणायादेशौ - चोरयति॥

**145. णिचश्च 1 | 3 | 74**

णिजन्तादात्मनेपदं स्यात् कर्तृगामिनि क्रियाफले। चोरयते। चोरयामास। चोरयिता। चौर्यात्। चोरयिषीष्ट। णिश्रि ◦ इति चङ्। णौ चङि ◦ इति ह्रस्वः। चङि इति द्वित्वम्। हलादिः शेषः। दीर्घो लघोः इत्यभ्यासस्य दीर्घः अचूचुरत्। अचूचुरत॥ कथ-वाक्यप्रबन्धे॥ 2॥ अल्लोपः। णिजन्तादात्मनेपदंस्यात्कतऋगामिनि क्रियाफले। चोरयते। चोरयामास। चोरयिता। चोर्यात्, चोरयिषीष्ट। णिश्रीति चङ्। णौ चङीति ह्रस्वः। चङीति द्वित्वम्। हलादिः शेषः। दीर्घो लघोरित्यभ्यासस्य दीर्घः। अचूचुरत्, अचूचुरत॥ कथ वाक्यप्रबन्धे ॥ **2** ॥ अल्लोपः॥

---

**144. पदपरिचयः** - सत्याप-चुरादिभ्यः (प.ब.व.) णिच् (प्र.ए.व.)

**सूत्रप्रकारः** - विधिसूत्रम्।

**समासः** - सत्यापश्च, पाशश्च, रूपञ्च, वीणा च, तूलञ्च, श्लोकश्च, सेना च, लोम च, त्वचश्च, वर्म च, वर्णश्च, चूर्णञ्च, चुरादयश्च इति सत्याप-पाश-रूप-वीणा-तूल-श्लोक-सेना-लोम-त्वच-वर्म-वर्ण-चूर्ण-चुरादयः तेभ्यः इति इतरेतरद्वन्द्वः।

**सरलार्थः** - सत्याप, पाश, रूप, वीणा, तूल, श्लोक, सेना, लोमन्, त्वच्, वर्मन्, वर्ण, चूर्ण एतेभ्यः द्वादशनामधातुभ्यः तथा चुरादिगणे पठितेभ्यः धातुभ्यः णिच् प्रत्ययः स्यात्।

**विशेषार्थः** - सूत्रस्थानां द्वादशानां नामधातूनां विवक्षायां णिच् प्रत्ययः स्यात्। चुरादिगणे पठितेभ्यः अपि णिच्प्रत्ययः भवति। सत्याप इत्यत्र अन्त्यः अकारः उच्चारणार्थः। त्वच इति अदन्तनपुंसकशब्दस्य अत्र ग्रहणम्। अत्र अर्थनिर्देशः न कृतः। अतः लोकप्रसिद्ध्यनुसारं अर्थग्रहणं कर्तव्यम्। सत्यापशब्दमारभ्य चूर्णपर्यन्तं द्वादश नामधातवः सन्ति। एतेभ्यः विभिन्नधात्वर्थेषु प्रत्ययः भवति।

सत्यं करोति आचष्टे वा - सत्यापयति

पाशं विमुञ्चति - विपाशयति

रूपं पश्यति - रूपयति

वीणया उपगायति - उपवीणयति

तूलेन अनुकुष्णाति - अनुतूलयति

श्लोकैः उपस्तौति - उपश्लोकयति

सेनया अभियाति - अभिषेणयति

लोमानि अनुमार्ष्टि - अनुलोमयति

त्वचं गृह्णाति - त्वचयति

वर्मणा सन्नह्यति - संवर्मयति

वर्णं गृहणाति - वर्णयति

चूर्णैः अवध्वंसते - अवचूर्णयति।

**रूपसिद्धिः - चोरयति** चुर्धातोः ''सत्याप-पाश॰'' इत्यादिसूत्रेण णिच्प्रत्ययेऽनुबन्धलोपे 'चुर् + इ' इति जाते, **''पुगन्तलघूपधस्य च''** इत्यनेन गुणे 'चोरि' इति जाते, ''सनाद्यन्ता धातवः'' इत्यनेन धातुसंज्ञायां, लट्लकारे, तत्स्थाने तिबादेशे, सार्वधातुकत्वात् शप्प्रत्ययेऽनुबन्धलोपे, 'चोरि + अ + ति' ति जाते, धातोः गुणे, अयादेशे च 'चोरयति' इति रूपं सिद्ध्यति।

**146. अचः परस्मिन्पूर्वविधौ 1 | 1 | 57**

इति स्थानिवत्त्वान्नोपधावृद्धिः - कथयति। अग्लोपित्वाद् दीर्घसन्वद्भावौ न। अचकथत्॥ **गण - संख्याने ॥ 3॥** गणयति।

**147. ई च गणः 7 | 3 | 97**

गणयतेरभ्यासस्य ईत् स्याच्चङ्परे णौ, चाद् अत्। अजीगणत् - अजगणत्॥

---

**145. पदपरिचयः** - णिचः (प.ए.व.) च (अव्ययपदम्)

**अनुवृत्तिः - अनुदात्तङित आत्मनेपदम् (1-3-12)** इत्यस्मात्सूत्रात् ''आत्मनेपदम्'', **''स्वरितञितः कर्त्रभिप्राये क्रियाफले''** इत्यस्मात्सूत्रात् 'कर्त्रभिप्राये, क्रियाफले' इति पदे अनुवर्तेते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - क्रियाफलं कर्त्रे प्राप्तं स्यात् तदा णिजन्तेभ्यः आत्मनेपदप्रत्ययाः स्युः।

**विशेषार्थः** - 'चोरि' इत्ययं णिजन्तधातुः परस्मैपदी वा आत्मनेपदी ? इति प्रश्नः। वस्तुतः न्यायनुगुणं **''शेषात्कर्तरि परस्मैपदम्''** इत्यनेन परस्मैपदस्यैव प्रयोगः स्यात्। परन्तु लोके क्रियाफलस्य कर्त्रनुगामिनि सति आत्मनेपदस्य प्रयोगः दृश्यते। अतः उभयोः अन्यतरस्य प्रयोगसिद्ध्यै प्रकृतसूत्रेण इदं ज्ञाप्यते यत् यदि क्रियाफलं कर्त्रनुगामि, तर्हि णिजन्तचुरादिधातुभ्यः आत्मनेपदं भवति, अन्यत्र परस्मैपदस्य प्रयोगः।

**रूपसिद्धिः - चोरयते** - 'चोरि + त' इति दशायां सार्वधातुकत्वात् शपि, अनुबन्धलोपे, धातोः गुणे, अयादेशे, एत्वे च - 'चोरयते' इति रूपं सिद्ध्यति।

**146. पदपरिचयः** - अचः (ष.ए.व.) परस्मिन् (स.ए.व.), पूर्वविधौ (स.ए.व.) च अव्ययम्।

**अनुवृत्तिः - ''स्थानिवदादेशोऽनल्विधौ'' (1-1-56)** इत्यस्मात्सूत्रात् स्थानिवत् इति पदमनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - परं निमित्तीकृत्य अचःस्थाने यः आदेशः, सः स्थानिवत् स्यात्, तस्मात् स्थानिभूतात् अचः पूर्वस्य कार्ये कर्तव्ये।

**विशेषार्थः** - कथ वाक्यप्रबंधे। कथ् + इ इति स्थिते **अत उपधायाः** इत्यनेन सूत्रेण उपधावृद्धौ सूत्रमिदं समायाति। कथ + इ अत्र परत्र णिचं मत्त्वा थकारोत्तरस्य अकारस्य ''अतो लोपः'' इत्यनेन लोपः भवति। अयं लोपः अचः स्थाने प्रवृत्तः अतः अजादेशः। अयमजादेशः स्थानिवद् वर्तते। तत्सम्बंधितकार्यं लोपे सति प्रवृत्तं भवति। अत्र अस्थाने अचः पूर्वम् उपधावृद्धिविधायकस्य कार्यस्य निषेधः कर्तव्यः। अनेन सूत्रेण अचः व्यवधानेन णिच् परवर्ती न स्यात्। अतः ''अत उपधायाः'' अनेन उपधावृद्धिः न संभवति। कथि इति स्थितं भवति।

**रूपसिद्धिः - कथयति** - कथ् धातोः णिचि अनुबन्धलोपे, लटि, तिपि, शपि, अनुबन्धलोपे - 'कथ् + इ + अ + ति' इति जाते, धातोः गुणे, अयादेशे - 'कथयति' इति रूपं सिद्ध्यति।

**147. पदपरिचयः** - ई (प्र.ए.व.) च (अव्ययम्) गणः (ष.ए.व.)

**अनुवृत्तिः - ''अत्र लोपोऽभ्यासस्य'' (7-4-58)** इत्यनुवर्तते इत्यस्मात् अभ्यासस्य **''सन्वल्लघुनि चङ्परेऽनग्लोपे'' (7-4-93)** इत्यस्मात् 'चङ्परे' इत्यनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - चङ्परके णिपरे गणधातोः अभ्यासस्य ई आदेशः स्यात् अत् आदेशः अपि स्यात्।

**विशेषार्थः** - गण संख्याने। अजगण + अ + त् इत्यत्र सन्वद्भावः। अतः इत्वादिकार्यं न भवति। अत्र सूत्रमिदं प्रवर्तते। चङ् यस्मात् परवर्ती अस्ति, तादृशे णौ परे गण् धातोः अभ्यासस्य ई आदेशः स्यात्। तथा पक्षे अत् आदेशः अपि भवति।

**रूपसिद्धिः - अजगणत्** - अजगण् + अ + त् अस्यामवस्थायाम् अभ्यासस्य जकारोत्तरस्य-अकारस्य स्थाने ई आदेशः स्यात्। अजीगणत्। अत् आदेशे अजगणत् इति रूपं सिद्ध्यति।

## स्वाध्यायः

**1. योग्यविकल्पं चित्वा उत्तरं ददत।**

(1) 'सत्यापपाश...०' इत्यनेन सूत्रेण कः प्रत्ययः ?

(क) शप्　(ख) णिच्　(ग) श्नु　(घ) श्ना

(2) 'सत्यापपाश ...०' इत्यस्मिन् सूत्रे कति शब्दाः ?

(क) 11　(ख) 12　(ग) 13　(घ) 20

(3) 'णिचश्च'-इतीदं सूत्रं किम्प्रकारकम् ?

(क) विधिः　(ख) संज्ञा　(ग) नियमः　(घ) अधिकारः

(4) णिचश्च इत्यत्र च इत्यस्य पदपरिचयः कः ?

(क) पञ्चमी. बहु. वचनम्　(ख) अव्ययम्

(ग) सप्तमी एक. वचनम्　(घ) सम्बोधनम्-एकवचनम्

(5) 'अचः परस्मिन् पूर्वविधौ' इतीदं सूत्रं किम्प्रकारकम् ?

(क) विधिः　(ख) संज्ञा　(ग) नियमः　(घ) अधिकारः

(6) विपाशयति इत्यत्र मूलधातुः कः ?

(क) विपा　(ख) पू　(ग) पाश　(घ) वि

(7) अनुलोमयति इत्यत्र मूलधातुः कः ?

(क) अनु　(ख) लोम　(ग) म्य　(घ) लोमय

**2. एकैकवाक्येन उत्तराणि लिखत।**

(1) 'सत्यापपाश ...०' इत्यत्र के द्वादशशब्दाः ?

(2) 'णिचश्च' इति सूत्रे अनुवृत्तिं सविस्तरं लिखत।

(3) 'अचः परस्मिन्पूर्वविधौ' इति कस्यामवस्थायां प्रवर्तते ?

(4) ई च गणः इत्यस्य अनुवृत्तिं लिखत।

(5) अजीगणत् रूपं परिचाययत।

**3. सविस्तरम् उत्तरं लिखत।**

(1) ई च गणः इति सूत्रस्य आवश्यक्ता का ?

(2) णिचश्च इति सूत्रस्य आवश्यक्तां प्रदर्शयत।

(3) अचः परस्मिन्पूर्वविधौ इति सूत्रस्य आवश्यकतां दर्शयत।

**4. रूपसिद्धिं कुरुत।**

(1) चोरयति　(2) कथयति　(3) अजीगणत्　(4) अजगणत्

•

| 13 | # ण्यन्तप्रकरणम् |
|---|---|

**148. स्वतन्त्रः कर्ता 1 | 4 | 54**

क्रियायां स्वातन्त्र्येण विविक्षितोऽर्थः कर्ता स्यात्।

**149. तत्प्रयोजको हेतुश्च 1 | 4 | 55**

कर्तुः प्रयोजको हेतुसंज्ञः कर्तृसंज्ञश्च स्यात्।

**150. हेतुमति च 3 | 1 | 26**

प्रयोजकव्यापारे प्रेषणादौ च वाच्ये धातोर्णिच् स्यात्। भवन्तं प्रेरयति भावयति।

---

**148. पदपरिचयः** – 'स्वतन्त्रः' (प्र.ए.व.), कर्ता (प्र.ए.व.)

**समासः** – स्वं तन्त्रं यस्य सः स्वतन्त्रः (बहु.)

**अनुवृत्तिः** – ''**कारके**'' (1.4.23) इत्यधिक्रियते।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सरलार्थः** – क्रियायां स्वातन्त्र्येण विवक्षितस्य कारकस्य कर्तृसंज्ञा भवति।

**विशेषार्थः** – ''रामः पुस्तकं पठति'' इत्यस्मिन् वाक्ये पठनक्रियायां रामः स्वयं क्रियाविधायकत्वात् कर्ता भवति। सः कर्ता क्रियायाः आधारभूतः गम्यते।

**149. पदपरिचयः** – 'तत्प्रयोजकः' – (प्र.ए.व.) 'हेतुः' (प्र.ए.व.)।

**समासः** – तस्य प्रयोजकः तत्प्रयोजकः (षष्ठी.तत्पु.)।

**अनुवृत्तिः** – ''**स्वतन्त्रः कर्ता**'' (1.4.54) इत्यस्मात् ''कर्ता'' इत्यनुवर्तते।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सरलार्थः** – तस्य स्वतन्त्रकर्तुः यः प्रयोजकः तस्य हेतुसंज्ञा भवति, चकारात् कर्तृसंज्ञा च।

**विशेषार्थः** – प्रयोजको नाम प्रेरकः। बालकः पुस्तकं पठति। 'तं पठन्तं बालकं गुरुः पठितुं प्रेरयति' – अत्र गुरोः पाठन – क्रियान्वयित्वात् प्रेरकत्वाच्च कर्तृसंज्ञा हेतुसंज्ञा च भवति।

**150. पदपरिचयः** – 'हेतुमति' (स.ए.व.) 'च' (अव्यय॰)।

**समासः** – हेतुसंज्ञा अस्य अस्तीति हेतुमान्, तस्मिन् हेतुमति।

**अनुवृत्तिः** – ''**धातोरेकाचो हलादेः क्रियासमभिहारे यङ्**'' (3.1.22) इत्यस्मात् 'धातोः' ''**सत्यापपाश॰**'' (3.1.25) इत्यस्मात् 'णिच्' इत्यनुवर्तते।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – प्रयोजककर्तुः प्रेरकस्य च व्यापारे प्रेषणादिवाच्ये धातोः णिच् भवति।

**विशेषार्थः** – फलसाधनयोग्यः पदार्थो लोके हेतुरित्युच्यते। तस्य यदीह ग्रहणं स्यादिहापि णिच् स्यात् – अध्ययनेन वसतीति। तस्मात् पारिभाषिकस्य हेतोः ग्रहणमिति दर्शयितुमाह ''**हेतुः स्वतन्त्रस्य प्रयोजकः**'' इति।

**रूपसिद्धिः** – **भावयति** – भवन्तं प्रेरयति इति विग्रहे भू इत्यस्माद् धातोः ''**तत्प्रयोजको॰**'' इति सूत्रेण हेतुसंज्ञायां ''**हेतुमति च**'' इति सूत्रेण णिच् प्रत्यये अनुबन्धलोपे भू + इ इत्यत्र ''**अचोऽञ्णिति**'' इति सूत्रेण वृद्धौ भौ + इ इति स्थिते ''**एचोयवा॰**'' इति सूत्रेण आवादेशे 'भावि' इति स्थिते ''**सनाद्यन्ता॰**'' इति सूत्रेण धातुसंज्ञायां लटि, तिपि, शपि भावि + अ + ति इत्यवस्थायां गुणे अवादेशे 'भावयति' रूपं सिद्धम्।

**151. ओः पुयण्ज्यपरे 7 | 4 | 80**

सनि परे यदङ्गं तदवयवाभ्यासोकारस्य इत्स्यात् पवर्गयण्जकारेष्ववर्णपरेषु परतः। अबीभवत्। **ष्ठा गति - निवृत्तौ।**

**152. अर्तिह्रीव्लीरीक्नुयीक्ष्माय्यातां पुङ्णौ 7 | 3 | 36**

स्थापयति।

**153. तिष्ठतेरित् 7 | 4 | 05**

उपधाया इदादेशः स्याच्चङ्परे णौ। अतिष्ठिपत्। **घट चेष्टायाम्।**

---

**151. पदपरिचयः** - 'ओः' (ष.ए.व.) 'पुयण्जि' - (स.ए.व.) अपरे (स.ए.व.)।

**समासः** - पुश्च यण् च ज् चेति एषां समाहारः - पुयण्ज्, तस्मिन् पुयण्जि इति समाहारद्वन्द्वः।

**अनुवृत्तिः** - ''**सन्यतः**'' (7.4.79) सूत्रात् 'सनि' इत्यनुवर्तते ''**भृञामित्**'' (7.4.76) इत्यस्मात् 'इत्' ''अत्र लोपोऽभ्यासस्य'' (7.4.58) सूत्रात् 'अभ्यासस्य' इत्यनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - सनि परे सति, आदौ यः अङ्गसंज्ञावान् भागः, तस्य अङ्गसंज्ञावतः अवयवः यः अभ्यासः उकारः, तस्य अभ्यासोकारस्य स्थाने इकारादेशः भवति। किन्तु कदा ? तर्हि उच्यते - अभ्यासोकारस्य पश्चात् अकारो भवेत्, तस्मात् अकारात्परत्र पवर्गीयवर्णः वा यण्वर्णः वा जकारः स्याच्चेत्।

**विशेषार्थः** - यदि ''णौ चङ्युपधाया ह्रस्वः'' इत्यनेन कृतः परनिमित्तकः उपधाह्रस्वः ''**अचः परस्मिन् पूर्वविधौ**'' इति सूत्रेण 'स्थानिवत्' इति स्वीक्रियते, तर्हि लघुपरकत्वस्य अभावात् सन्वद्भावः एव न स्यात्। यदा सन्वद्भावः एव न स्यात्तर्हि ''**ओः पुयण्ज्यपरे**'' इत्यनेन अभ्यासस्य उकारस्य इकारादेशः कथं स्यात् ? तस्य समाधानम् इदमस्ति - यदि स्थानिवद्भावः क्रियते, तर्हि ''**ओः पुयण्ज्यपरे**'' इति सूत्रं निरवकाशं व्यर्थञ्च स्यात्। अतः प्रकृतसूत्राऽरम्भसामर्थ्यात् आचार्यपाणिनिः इदमत्र ज्ञापयति यत् सन्वद्भावस्थलेषु स्थानिवद्भावो नास्तीति।

**रूपसिद्धिः** - **अबीभवत्** - भूधातोः '**हेतुमति च**' इति सूत्रेण णिचि अनुबन्धलोपे धातुसंज्ञायां, लुङि, तिपि, अटि, च्लौ - ''**णिश्रिद्रु॰**'' इति च्लेःचङि अनुबन्धलोपे '**णेरनिटि**' इत्यनेन णिलोपे, '**चङी'ति** द्वित्वे अभ्यासत्वे, '**ह्रस्वः**' इति ह्रस्वे ''**अभ्यासे चर्च**'' इत्यनेन भकारस्य बकारे 'अबुभू + अति' इति स्थिते, वृद्धौ-आवादेशे ''**णौ चङ्युपधाया ह्रस्वः**'' इति ह्रस्वे ''**सन्वल्लघुनि चङ्परेऽनग्लोपे**'' इति सन्वद्भावे ''**ओः पुयण्ज्यपरे**'' इति अभ्यासोकारस्य इत्वे, ''**दीर्घो लघोः**'' इति अभ्यासस्य दीर्घे, '**इतश्चेति**' तिप इकारलोपे ''अबीभवत्'' इति।

**152. पदपरिचयः** - अर्तिह्रीव्लीरीक्नुयीक्ष्माय्याताम् (ष.ब.व.) पुक् - (प्र.ए.व.) णौ (स.ए.व.)।

**समासः** - अर्तिश्च ह्रीश्च, व्लीश्च, रीश्च, क्नूयीश्च, क्ष्मायीश्च, आच्च - इति अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातः, तेषाम् इति इतरेतरद्वन्द्वः।

**अनुवृत्तिः** - ''**अङ्गस्य**'' **( 6-4-1 )** इत्यधिक्रियते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - ऋ, ह्री, व्ली, री, क्नुयी, क्ष्मायी इत्येषां धातूनां तथा आदन्तानां धातूनां णौ परे पुगागमः भवति।

**विशेषार्थः** - अत्र षड्धातवः पठिताः सन्ति। तेभ्यः पुगागमः भवति। (1) ऋ गतौ - अर्पयति। (2) ह्री लज्जायाम् - ह्रेपयति। (3) व्ली वरणे - व्लेपयति। (4) री-गतिरेषणयोः रेपयति। रीङ् श्रवणे - रेपयति। (5) क्नुयी शब्दे - क्नोपयति। (6) क्ष्मायी विधूनने - क्ष्मापयति। (7) आकारान्तः - दापयति, ज्ञापयति।

**रूपसिद्धिः** - **स्थापयति** - 'ष्ठा गतिनिवृत्तौ' धातोः ''**धात्वादेः षः सः**'' इति सत्वे स्था इत्यस्माद् णिचि कृते प्रकृतसूत्रेण **अर्तिह्रीव्ली॰** इत्यनेन पुगागमे 'स्थापि' इति स्थिते, सनादिधातुत्त्वे लटि तिपि, शपि स्थापि + अ + ति इति अवस्थायां गुणे, अयादेशे 'स्थापयति' सिद्धम्।

**154. सूत्रम् - मितां ह्रस्वः 6 | 4 | 92**

घटादीनां ज्ञपादीनां चोपधाया ह्रस्वः स्याण्णौ।

घटयति। **ज्ञप ज्ञाने ज्ञापने च।** ज्ञपयति। अजिज्ञपत्॥

---

**153. पदपरिचयः** - तिष्ठतेः (ष.ए.व.) इत् - (प्र.ए.व.)

**अनुवृत्तिः** - ''**णौ चङ्युपधाया ह्रस्वः**'' (7.4.1) सूत्रात् ''णौ, चङि, उपधायाः'' इति पदत्रयम् अनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - तिष्ठतेः अङ्गस्य चङ्परके णिप्रत्यये परे सति उपधायाः इकारादेशो भवति।

**विशेषार्थः** - 'इत्' इत्यत्र तपरः ह्रस्वकालिकार्थः।। श्तिपा निर्देशो यङ्लुङः निवृत्त्यर्थः।

**रूपसिद्धिः** - **अतिष्ठिपत्** - ष्ठा इत्यस्य ''धात्वादेः षः सः'' इति सत्वे ''**निमित्तापाये नैमितिकस्याप्यपायः**'' इति ठकारस्यापि निवृत्तौ 'स्था' इत्यस्मात् ''**हेतुमति च**'' इति णिच्यनुबन्धलोपे, धातुसंज्ञायां लुङि तिपि, अटि, च्लिप्रत्यये कृते ''**अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ**'' इत्यनेन पुगागमे, अनुबन्धलोपे ''**णिश्रिद्रुस्रुभ्यः कर्तरि चङ्**'' इति च्लेश्चङ्यनुबन्धलोपे '**तिष्ठतेरिदिति**' उपधाया इकारे, णेर्लुकि, ''**चङि**'' इति द्वित्वे, अभ्यासत्वे ''**हलादिःशेषः**'' इति सूत्रं बाधित्वा ''**शर्पूर्वाःखयः**'' इत्यनेन यकारस्य अवशेषे, अभ्यासस्य चर्त्वे, ''**आदेशप्रत्यययोः**'' इति षत्वे च कृते ''अतिष्ठिपत्'' इति।

**154. पदपरिचयः** - ''मितां'' (ष.ब.व.) ''ह्रस्वः'' (प्र.ए.व.)

**समासः** - मकारः इत् यस्य सः मित् - तेषां मिताम् (बहुव्रीहिः)

**अनुवृत्तिः** - ''**ऊदुपधाया गोहः**'' (7.2.116) सूत्रात् 'उपधायाः', ''**दोषो णौ**'' (6.4.90) सूत्रात् 'णौ' च इत्यनुवर्तते।

**सूत्रप्रकारः** - अतिदेशसूत्रम्।

**सरलार्थः** - णौ परे ज्ञपादीनां घटादीनां च धातूनां ह्रस्वः भवति।

**विशेषार्थः** - धातुपाठे केषाञ्चन धातूनां मित्करणं स्थलद्वये अतिदिष्टम् अस्ति। १. घटादिधातवः, २. चुरादिगणीयाः ज्ञप् इत्यादिधातवः। अतः एव वृत्तौ ''घटादीनां ज्ञपादीनाञ्च'' इति कथितम्।

**रूपसिद्धिः** - **घटयति** - घट्धातोः णिचि वृद्धौ घाट् + इ इत्यवस्थायां ''मितां ह्रस्वः'' इति ह्रस्वे धातुत्वे लटि, तिपि, शपि, गुणे अयादेशे च घटयति रूपं सिद्धम्। एवमेव ज्ञपयति।

ण्यन्तप्रकरणे निर्दिष्टाः चत्वारः धातवः अधोलिखिताः सन्ति।

| लकाराः | भू सत्तायाम् | ष्ठा गतिनिवृत्तौ | घट चेष्टायाम् |
|---|---|---|---|
| लट् | भावयति | स्थापयति | घटयति |
| लिट् | भावयाञ्चकार | स्थापयामास | घटयामास |
| लुट् | भावयिता | स्थापयिता | घटयिता |
| लृट् | भावयिष्यति | स्थापयिष्यति | घटयिष्यति |
| लोट् | भावयतु-भावयतात् | स्थापयतु-तात् | घटयतु-घटयतात् |
| लङ् | अभावयत् | अस्थापयत् | अघटयत् |
| वि. लिङ् | भावयेत् | स्थापयेत् | घटयेत् |
| आ. लिङ् | भाव्यात् | स्थाप्यात् | घट्यात् |
| लुङ् | अबीभवत् | अतिष्ठिपत् | अजीघटत् |
| लृङ् | अभावयिष्यत् | अस्थापयिष्यत् | अघटयिष्यत् |

| लकाराः | ज्ञप-ज्ञापने ज्ञाने च |
|---|---|
| लट् | ज्ञपयति |
| लिट् | ज्ञापयामास |
| लुट् | ज्ञपयिता |
| लृट् | ज्ञपयिष्यति |
| लोट् | ज्ञपयतु |
| लङ् | अज्ञपयत् |
| वि. लिङ् | ज्ञपयेत् |
| आ. लिङ् | ज्ञप्यात् |
| लुङ् | अजिज्ञपत् |
| लृङ् | अज्ञपयिष्यत् |

| सामान्यं क्रियापदम् | ण्यन्तं क्रियापदम् |
|---|---|
| गच्छति | गमयति |
| अत्ति | आदयति |
| प्राप्नोति | प्रापयति |
| करोति | कारयति |
| क्रीडति | क्रीडयति |
| चलति | चालयति |
| पचति | पाचयति |
| ददाति | दापयति |
| पठति | पाठयति |
| वहति | वाहयति |

**स्वाध्यायः**

**1. योग्यविकल्पं चित्वा उत्तरं ददत।**

(1) हेतुसंज्ञाविधायकं सूत्रं किम् ?

(क) स्वतन्त्रः कर्ता (ख) कर्मणि द्वितीया

(ग) हेतुमति च (घ) तत्प्रयोजको हेतुश्च

(2) णिच् इत्यत्र णकारस्य इत्संज्ञायाः फलं किम् ?

(क) वृद्धिः (ख) लोपः (ग) गुणः (घ) दीर्घः

(3) हेतुमति च इत्यनेन कः प्रत्ययो भवति ?

(क) सन् (ख) णिच् (ग) यङ् (घ) यक्

(4) भावयति-इत्यत्र कः धातुः ?

(क) भू (ख) ष्ठा (ग) एध (घ) घट

(5) मितां ह्रस्वः सूत्रमिदं किं करोति ?

(क) दीर्घम् (ख) लोपम् (ग) ह्रस्वम् (घ) इदादेशम्

(6) 'मितां ह्रस्वः' इति कीदृशं सूत्रम् ?

(क) विधिसूत्रम् (ख) परिभाषासूत्रम् (ग) संज्ञासूत्रम् (घ) अतिदेशसूत्रम्

(7) "तत्प्रयोजकः" इत्यत्र कः समासः ?

(क) षष्ठीतत्पुरुषः (ख) तृतीयातत्पुरुषः (ग) पञ्चमीतत्पुरुष (घ) सप्तमीतत्पुरुष

**2. एकैकवाक्येन उत्तराणि लिखत।**

(1) क्रियायाः आधारभूतः कः ?

(2) प्रयोजकः नाम किम् ?

(3) भावयति इत्यस्य विग्रहं लिखत ।

(4) ज्ञप्धातोः लटि किं रूपम् ?

(5) मिताम् इत्यत्र विभक्तिवचनं दर्शयत।

(6) पुगागमविधायकं सूत्रं लिखत।

(7) ह्रीधातोः अर्थः कः ?

**3. सविस्तरम् उत्तरम् लिखत।**

(1) 'हेतुमति च' सूत्रं व्याख्यात ।

(2) घट्-धातोः लट्-लृट्-लङ् लकाराणां सर्वाणि रूपाणि लिखत।

(3) ण्यन्ते स्थाधातोः - लट्-लोट्-लुङ् लकाराणां सर्वाणि रूपाणि लिखत।

**4. ससूत्रं रूपसिद्धिं कुरुत।**

(1) भावयति (2) अबीभवत् (3) घटयति (4) स्थापयति (5) ज्ञपयति।

**5. यथाधीतं सूत्रविवेचनं कुरुत।**

(1) स्वतन्त्रः कर्ता।

(2) ओः पुयण्ज्यपरे।

(3) तिष्ठतेरित्।

(4) अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ।

(5) मितां ह्रस्वः।

**6. 'अ' विभागेन सह 'ब' विभागं संयोजयत।**

| 'अ' | 'ब' |
|---|---|
| (1) पठति | (1) कारयति |
| (2) ददाति | (2) प्रापयति |
| (3) करोति | (3) गमयति |
| (4) प्राप्नोति | (4) पाठयति |
| (5) गच्छति | (5) दापयति |

•

| 14 | सन्नन्तप्रकरणम् |
|---|---|

**155. धातोः कर्मणः समानकर्तृकादिच्छायां वा 3 | 1 | 7**

इषिकर्मणः इषिणैककर्तृकाद् धातोः सन् प्रत्ययो वा स्यादिच्छायाम्। **पठ व्यक्तायां वाचि।**

**156. सन्यङोः 6 | 1 | 9**

सन्नन्तस्य यङन्तस्य च धातोरनभ्यासस्य प्रथमस्यैकाचो द्वे स्तोऽजादेस्तु द्वितीयस्य। सन्यतः। पठितुमिच्छति पिपठिषति। कर्मणः किम् ? गमनेनेच्छति। समानकर्तृकात् किम् ? शिष्याः पठन्तु इतीच्छति गुरुः। वाग्रहणाद् वाक्यमपि। लुङ्सनोघस्लृ।

**157. सः स्यार्धधातुके। ( 7.4.49 )**

सस्य तः स्यात् सादौ आर्धधातुके। अत्तुमिच्छति जिघत्सति। एकाच इति नेट्।

---

**155. पदपरिचयः** – 'धातोः' (प.ए.व.), 'कर्मणः' (ष.ए.व.), 'समानकर्तृकात्' (प.ए.व.), 'इच्छायाम्' (स.ए.व.), 'वा' (अव्य॰)॥

**समासः** – समानः कर्ता यस्य सः समानकर्तृकः, तस्मात् समानकर्तृकात् (बहुव्रीहिः)

**अनुवृत्तिः** – ''**गुप्तिज्किद्भ्यः सन्**'' (3.1.5) सूत्रात् 'सन्' इत्यनुवर्तते।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – इच्छाक्रियायाः कर्मभूतात् पुनश्च कस्माच्चिदपि धातोः इच्छार्थे सन् प्रत्ययः विकल्पेन भवति, किन्तु तत्र नियमद्वयमवश्यम् अपेक्ष्यते।

**विशेषार्थः** – यथा पठ्धातोरिच्छार्थे प्रयोगे पठ्धातोः इच्छायाञ्च एककर्तृकाद् च सन् प्रत्ययो भवति – उदाहरणम् – देवदत्तः पठितुमिच्छति इति पिपठिषति देवदत्तः। अत्र पठ्धातोः इच्छार्थे सन् प्रत्ययो वर्तते। पठ्धातुः अत्र अर्थरूपेण इष्धातोः कर्म अस्ति। तथा इष्धातुना सह समानकर्तृकः अपि अस्ति अर्थात् इष्धातोः यः कर्ता अस्ति सःएव कर्ता पठ्धातोः अस्ति। ''पठनेन इच्छति'' अत्र पठ्धातुः इष्धातोः कर्म नास्ति, अपि तु करणमस्ति। अतः सत्यपि समानकर्तरि – सन् प्रत्ययो न भवति। **शिष्याः पठन्तु इतीच्छति गुरुः।** अत्र पठ्धातोः कर्तारः शिष्याः सन्ति इष्धातोः कर्ता गुरुः अस्ति। अतः भिन्न-कर्तृकादत्र सन् प्रत्ययो न भवति॥

**156. पदपरिचयः** – 'सन्यङोः' – (ष.द्वि.व.)

**अनुवृत्तिः** – ''**एकाचो द्वे प्रथमस्य**'' (6.1.1) सूत्राद् 'एकाचः', ''**अजादेर्द्वितीयस्य**'' (6.1.2) सूत्राद् अजादेः, ''लिटि धातोरनभ्यासस्य'' (6.1.2) सूत्राद् 'अनभ्यासस्य' इत्यनुवर्तते।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – सन्नन्तस्य यङन्तस्य च धातोः द्वित्वं भवति।

**विशेषार्थः** – पठितुमिच्छति इत्यतः पठनस्य इच्छाक्रियायाश्च एककर्तृकात् सन् प्रत्ययो भवति। कर्मणः किम् ? 'गमनेनेच्छति' इत्यादौ इषिधातोः कर्मत्वाभावात् सन् न भवति। 'शिष्याः पठन्तु इति इच्छति गुरुः' इत्यत्र पठनेच्छाक्रिययोः भिन्नकर्तृत्वात् न सन्। वाग्रहणेन पक्षे वाक्यमपि भवति॥

**रूपसिद्धिः** – **पिपठिषति** – पठितुमिच्छतीति विग्रहे '**धातोः कर्मणः**' इत्यादिना सन् प्रत्यये '**सन्यङोः**' इति पठ् इति धातोः द्वित्वे, अभ्यासादिकार्ये '**सन्यतः**' इति इत्वे '**सनाद्यन्ताः॰**' इति सन्नन्तस्य धातुत्वे, लटि-तिपि-शपि-पररूपे कृते सस्य षत्वे 'पिपठिषति' इति॥

**157. पदपरिचयः** – 'सः' (ष.ए.व.), 'सि' (स.ए.व.), 'आर्द्धधातुके' (स.ए.व.)।

**विग्रहः**: – हेतुसंज्ञः (संज्ञा) अस्य अस्तीति हेतुमान्, तस्मिन् हेतुमति।

**158. अज्झनगमां सनि 6 | 4 | 16**

अजन्तानां हन्तेरजादेशगमेश्च दीर्घो झलादौ सनि।

**159. सूत्रम् - इको झल् 1 | 2 | 09**

इगन्ताज्झलादिः सन् कित् स्यात्। ॠत इद्धातोः। कर्तुमिच्छति चिकीर्षति।

**160. सनि ग्रहगुहोश्च 7 | 2 | 12**

ग्रहेर्गुहेरुगन्ताच्च सन इण्न स्यात्। बुभूषति।

---

**अनुवृत्तिः** - ''**अच उपसर्गात्तः**'' (7.4.47) सूत्रात् 'तः' इत्यनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - सादौ आर्धधातुके परे सस्य स्थाने तादेशः भवति।

**विशेषार्थः** - प्रकृतसूत्रेण सकारस्य स्थाने तकारादेशः क्रियते, यदा परत्र सकारादिः आर्धधातुकसंज्ञकः प्रत्ययः अस्ति तदा।

**रूपसिद्धिः - जिघत्सति** - अत्तुमिच्छति इत्यर्थे अद्धातोः ''**धातोः कर्मणः समानकर्तृकादिच्छायां वा**'' इत्यनेन सन्प्रत्यये 'अद् + स' इति जाते, ''**लुङ्सनोर्घस्लृ**'' इति घस्लादेशे अनुबन्धलोपे च - 'घस् + स' इति जाते, धातोः अनुदात्तत्वात् ''**एकाच उपदेशेऽनुदात्तात्**'' इति इडागमनिषेधे 'घस् + स' इति जाते, ''**सः स्यार्धधातुके**'' इत्यनेन सस्य तकारादेशे 'घत्स' इति जाते, ''**सन्यङोः**'' इति धातोः द्वित्वे 'घत् + घत् + स' इति जाते, अभ्यासत्वे, हलादिशेषे 'घ + घत् + स' इति जाते, ''**कुहोश्चुः**'' इति झकारे 'झ + घत् + स' इति जाते, ''**अभ्यासे चर्च**'' इति झस्य जकारे ''**सन्यतः**'' इति अभ्यास-अकारस्य इकारे - 'जिघत्स' इति जाते, लटि, तिपि, शपि, पररूपे च 'जिघत्सति' इति रूपम्।

**158. पदपरिचयः** - 'अज्झनगमाम्' (ष.ब.व.), 'सनि' (स.ए.व.)।

**समासः** - अच् च हन् च गम् च - अज्झनगमः, तेषाम् अज्झनगमाम् - इतरेतरद्वन्द्वः।

**अनुवृत्तिः** - ''**अङ्गस्य**'' (6.4.1) इति अधिक्रियते ''**अनुनासिकस्य क्विझलोः क्ङिति**'' इति (6.4.5) सूत्रात् 'झलि' इत्यनुवर्तते ''**ढ्रलोपे पूर्वस्य दीर्घोऽणः**'' (6.3.111) सूत्रात् 'दीर्घः' इत्यनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अजन्तधातूनां, हन्धातोः तथा अचः (स्वरस्य) स्थाने आदेक्ष्यमाणगम्धातोः दीर्घः भवति, झलप्रत्याहारवर्णादिः सन् प्रत्ययः परत्र यदि भवति तर्हि।

**विशेषार्थः** - अचश्च (1.2.28) परिभाषानुसारं धातूनामेतेषाम् अचः स्थाने एव दीर्घः भवति। चिकीर्षति इत्यत्र कृ इत्यस्य दीर्घः कॄ भविष्यति। यदा सनः इडागमः न भवति, तदा सन्प्रत्ययः झलादिः भवति।

**159. पदपरिचयः** - 'इकः' (प.ए.व.), 'झल्' (प्र.ए.व.)।

**अनुवृत्तिः** - ''**असंयोगाल्लिट् कित्**'' (1.2.5) सूत्रात् 'कित्' इत्यनुवर्तते ''**रुदविदमुषग्रहिस्वपिप्रच्छः संश्च**'' (6.4.5) सूत्राच्च 'सन्' इत्यनुवर्तते।

**सूत्रप्रकारः** - अतिदेशसूत्रम्।

**सरलार्थः** - इगन्ताद् धातोः झलादिः सन् कित् स्यात्।

**विशेषार्थः** - यदा प्रकृतसूत्रेण किद्वद्भावः भवति, तदा '**क्ङिति च**' इत्यनेन क्रियमाणं गुणादिकार्यं निषिध्यते।

**रूपसिद्धिः - चिकीर्षति** - कर्तुमिच्छति इति विग्रहे कृधातोः सन् प्रत्यये, सनि आर्धधातुके सति इडागमः प्राप्यते, तं प्रबाध्य ''**एकाच उपदेशे॰**'' इत्यनेन निषेधे ''**अज्झनगमां**'' इत्यनेन कृ इत्यस्य दीर्घे, ''**सार्वधातुकार्ध॰**'' इत्यनेन गुणः प्राप्यते, तस्य प्रकृतसूत्रेण ''इको झल्'' इत्यनेन इत्वे रपरत्वे किर् + स इत्यत्र '**हलि च**' इत्यनेन दीर्घे कीर् + स इति जाते ''**आदेशप्रत्यययोः**'' इत्यनेन मूर्धन्यषकारे कीर् + ष इति जाते ''**सन्यङोः**'' इति द्वित्वे, हलादिशेषे, चुत्वे, चिकीर् + ष धातुसंज्ञायां लटि, तिपि, शपि च कृते चिकीर्षति रूपं सिद्धम् इति जाते।

**160. पदपरिचयः** - 'सनि' (स.ए.व.), 'ग्रहगुहोः' (ष.द्वि.व.), च (अव्य.)।

**अनुवृत्तिः** - ''**नेड्वशि वशि कृति**'' (7.2.8) सूत्रात् 'न इट्' ''**श्र्युकः किति**'' (7.2.11) सूत्रात् 'उकः' इत्यनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - ग्रह्धातोः गुह्धातो उगन्तधातुभ्यश्च परत्र विद्यमानस्य सनः इडागमः न भवति।

**विशेषार्थः** - अत्र भू-धातुः उगन्तः ज्ञातव्यः। अतः ''**श्र्युकः किति**'' इत्यनेन प्राप्तस्य इटः प्रकृतसूत्रेण निषेधो भवति।

**रूपसिद्धिः** - **बुभूषति** - 'भवितुम् इच्छति' विग्रहे ''धातोः कर्मणः'' इति सनि, **आर्धधातुकस्येड्** वलादेरिति प्राप्तस्येटः **सनि ग्रहगुहोश्चेति** निषेधे, **इको झलीति** कित्त्वेन गुणस्यापि निषेधे, सन्यङोरिति द्वित्वेऽभ्यासत्वे ह्रस्वे, **अभ्यासे चर्चेति** चर्त्वे, जश्त्वे, सस्य षत्वे बुभूष इत्यस्य सनाद्यन्तेति धातुसंज्ञायां लटि-तिपि-शपि-पररूपे च कृते 'बुभूषति' इति॥

सन्नन्तप्रकरणे पठिताः चत्वारः धातवः अधोनिर्दिष्टाः सन्ति।

| लकाराः | पठ व्यक्तायां वाचि | अद भक्षणे |
|---|---|---|
| लट् | पिपठिषति | जिघत्सति |
| लिट् | पिपठिषाञ्चकार | जिघत्साञ्चकार |
| लुट् | पिपठिषिता | जिघत्सिता |
| लृट् | पिपठिषियति | जिघत्सिष्यति |
| लोट् | पिपठिषतु | जिघत्सतु-जिघत्सताम् |
| लङ् | अपिपठिषत् | अजिघत्सत् |
| वि. लिङ् | पिपठिषेत् | जिघत्सेत् |
| आ. लिङ् | पिपठिष्यात् | जिघत्स्यात् |
| लुङ् | अपिपठिषीत् | अजिघत्सीत् |
| लृङ् | अपिपठिषिष्यत् | अजिघत्सिष्यत् |

| लकाराः | कृ-करणे | भू-सत्तायाम् |
|---|---|---|
| लट् | चिकीर्षति | बुभूषति |
| लिट् | चिकीर्षाञ्चकार | बुभूषाञ्चकार |
| लुट् | चिकीर्षता | बुभूषिता |
| लृट् | चिकीर्षिष्यति | बुभूषिष्यति |
| लोट् | चिकीर्षतु-चिकीर्षतात् | बुभूषतु-बुभूषतात् |
| लङ् | अचिकीर्षत् | अबुभूषत् |
| वि. लिङ् | चिकीर्षेत् | बुभूषेत् |
| आ. लिङ् | चिकीर्ष्यात् | बुभूष्यात् |
| लुङ् | अचिकीर्षीत् | अबुभूषीत् |
| लृङ् | अचिकीर्षिष्यत् | अबुभूषिष्यत् |

छात्राः सन्नन्तस्य रूपाणि अन्येषां धातूनामपि जानीयुः तदर्थमत्र अन्यानि उदाहरणानि दत्तानि सन्ति –

| सामान्यं क्रियापदम् | सन्नन्तं क्रियापदम् |
|---|---|
| अर्चति | अर्चिचिषति |
| करोति | चिकीर्षति |
| क्रीडति | चिक्रीडिषति |
| खादति | चिखादिषति |
| गच्छति | जिगमिषति |
| चरति | चिचरिषति |
| चलति | चिचलिषति |
| चोरयति | चुचोरयिषति |
| धावति | दिधाविषति |
| पठति | पिपठिषति |
| जुहोति | जुहूषति |
| अत्ति | जिघत्सति |
| भवति | बुभूषति |
| लिखति | लिलिखिषति |

**स्वाध्यायः**

**1. योग्यविकल्पं चित्वा उत्तरं ददत।**

(1) सन्नन्तप्रकरणे कति सूत्राणि ?

(क) 5 (ख) 7 (ग) 6 (घ) 8

(2) 'सः स्यार्धधातुके' सूत्रमिदं किं करोति ?

(क) सस्य तकारम् (ख) तस्य दकारम् (ग) तस्य सकारम् (घ) सस्य मकारम्

(3) 'इको झल्' सूत्रेणानेन किं भवति ?

(क) सन्वद्भावः (ख) त्वद्भावः (ग) णित्त्वद्भावः (घ) कित्वद्भावः

(4) अद्धातोः सन्नन्ते किं रूपम् ?

(क) अदिषति (ख) अत्ति (ग) जिघत्सति (घ) जिहासति

(5) 'सनि ग्रहगुहोश्च' अस्य सूत्रस्य कार्यं किम् ?

(क) इदादेशः (ख) दीर्घः (ग) इण्नः (घ) ह्रस्वः

(6) 'इको झल्' इति कीदृशं सूत्रम् ?

(क) विधिसूत्रम् (ख) संज्ञासूत्रम् (ग) अतिदेशसूत्रम् (घ) परिभाषासूत्रम्

(7) 'जुहोति' अस्य सन्नन्ते किं भवति ?

(क) जिघत्सति (ख) जुहूषति (ग) जिगमिषति (घ) होष्यति

**2. अधोलिखितानां प्रश्नानां लघूत्तराणि लिखत।**

(1) केन सूत्रेण सन्नतस्य द्वित्वं भवति ?

(2) पठितुमिच्छति इत्यस्य सन्नन्तं किम् ?

(3) चिकीर्षति इति कस्य धातोः रूपम् ?

(4) किद्त्वद्भावस्य फलं किम् ?

(5) ''धातोः कर्मणः०'' अनेन सूत्रेण कः प्रत्ययो भवति ?

(6) बुभूषिता इत्यत्र कः लकारः ?

(7) सनि इत्यत्र का विभक्तिः ?

**3. विस्तरेण प्रश्नानामुत्तराणि लिखत।**

(1) सन् प्रत्ययः कदा भवति ? सन् प्रत्यय-विधायकं सूत्रं लिखित्वा उदाहरणं लिखत।

(2) कस्यचिदेकस्य धातोः दशलकारेषु सन्नन्तरूपाणि लिखत।

(3) कृधातोः सन्नन्ते - लट् - लिट् - लोट् लङ् लकाराणां रूपाणि लिखत।

**4. ससूत्रं रूपसिद्धिं कुरुत।**

(1) पिपठिषति (2) जिघत्सति (3) चिकीर्षति (4) बुभूषति (5) जिघत्सति

**5. सूत्राणि व्याख्यात।**

(1) धातोः कर्मणः ......।

(2) सः स्यार्धधातुके ।

(3) अज्झनगमां सनि ।

(4) सनि ग्रहगुहोश्च ।

**6. 'अ' विभागेन सह 'ब' विभागं संयोजयत।**

| अ | ब |
|---|---|
| (1) धावति | (1) चिचरिषति |
| (2) चरति | (2) जुहूषति |
| (3) गच्छति | (3) बुभूषति |
| (4) जुहोति | (4) दिधाविषति |
| (5) भवति | (5) जिगमिषति |

●

# 15 यङन्तप्रकरणम्

**161. धातोरेकाचो हलादेः क्रियासमभिहारे यङ् 3 | 1 | 22**

पौनः पुन्ये भृशार्थे च द्योत्ये धातोरेकाचो हलादेर्यङ् स्यात्।

**162. गुणो यङ्लुकोः 7 | 4 | 82**

अभ्यासस्य गुणो यङि यङ्लुकि च परतः। ङिदन्तत्वाद् आत्मनेपदम्। पुनः पुनरतिशयेन वा भवति - बोभूयते। बोभूयाञ्चक्रे। अबोभूयिष्ट॥

**163. नित्यं कौटिल्ये गतौ 3 | 1 | 23**

गत्यर्थात् कौटिल्य एव यङ् स्यान्न तु क्रियासमभिहारे॥

---

**161. पदच्छेदः** - 'धातोः' (प.ए.व.), 'एकाचः' (प.ए.व.), 'हलादेः' (प.ए.व.), 'क्रियासमभिहारे' (स.ए.व.), 'यङ्' (प्र.ए.व.)॥

**समासः** - एकः अच् यस्मिन् एकाच्, तस्मात् एकाचः (बहुव्रीहिः)

क्रियायाः समभिहारः - क्रियासमभिहारः, तस्मिन् - क्रियासमभिहारे (ष.त॰)।

**अनुवृत्तिः** - ''**धातोः कर्मणः समानकर्तृकादिच्छायां वा**'' (3.1.7) सूत्रात् 'वा' इत्यनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - क्रियायाः समभिहारे द्योत्ये हलादेः एकाचो धातोः विकल्पेन 'यङ्' प्रत्ययो भवति।

**विशेषार्थः** - 'एकाच' इत्यत्र बहुव्रीहिः, तत्पुरुषः न। 'हलादेः' इति विशेषणात्। पौनः पुन्यं भृशार्थो वा क्रियासभिहारः। सूत्रमिदं यङ्प्रत्ययकरणाय प्रयुक्तम्। यङ्प्रत्ययविधानाय त्रयः बिन्दवः अनेन सूत्रेण अवधेयाः दर्शिताः - (1) धातुः एकाच् स्यात् (2) धातुः हलादिः स्यात् (3) क्रियासमभिहारार्थः स्यात्॥ धातोः किम् ? सोपसर्गाद् उत्पत्तिः मा भूत् - भृशं प्राटति। एकाचः इति किम् ? भृशं जागर्ति। हलादेः इति किम् ? भृशमीक्षते॥

**162. पदपरिचयः** - 'गुणः' (प्र.ए.व.), 'यङ्लुकोः' (स.द्वि.व.)।

**समासः** - यङ् च लुक् च यङ्लुकौ, तयोः यङ्लुकोः (इतरेतरद्वन्द्वः)

**अनुवृत्तिः** - ''**अत्र लोपोऽभ्यासस्य**'' (7.4.58) सूत्रात् 'अभ्यासः' इत्यनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अभ्यासस्य गुणः स्यात् यङि यङ्लुकि च परे।

**विशेषार्थः** - अभ्यासस्य गुणोऽयं विधीयते। अत्र लुक्शब्दः समान्यः, तथापि यङ्लुक एव सम्प्रत्ययो भवति। यदा यङ वा यङ्लुक् परतः भविष्यति, तदा अभ्यासस्य गुणः भवितव्यः। ''**पुगन्तलघूपधस्य च**'' इति प्राप्तोऽपि गुणः ''**नाभ्यस्तस्याचि॰**'' इति निषिध्यते। यङ् इत्यत्र ङित्वाद् ''**अनुदात्तङित आत्मनेपदम्**'' अनेन आत्मनेपदं भविष्यति॥

**रूपसिद्धिः - बोभूयते** - अतिशयेन पुनः पुनर्यो भवतीति विग्रहे भूधातोः ''**धातोरेकाचो हलादेः क्रियासमभिहारे यङ्**'' इत्यनेन यङि ''**सन्यङोः**'' इत्यनेन द्वित्वे, अभ्यासत्वे, अभ्यासस्य ह्रस्वे, जश्त्वे, ''**गुणो यङ्लुकोः**'' इत्यनेन गुणे च कृते '**बोभूय**' इत्यस्य धातुसंज्ञायां ङित्त्वादात्मनेपदत्वेन तप्रत्यये शबादिकार्ये कृते 'बोभूयते' इति॥ **बोभूयाञ्चक्रे** - भूधातोर्यङि, णित्वे, गुणे, जश्त्वे आमि च कृते, धातोः कृञोऽनुप्रयोगे द्वित्वादिकार्ये अभ्यासे कृते बोभूयाञ्चक्रे। **अबोभूयिष्ट** - भूधातोर्यङि - गुणे, जश्त्वे 'बोभूय' इत्यस्य धातुत्वात् लुङि, अडागमे, च्लौ, सिचि, इडागमे, षत्वे ष्टुत्वे च अबोभूयिष्ट॥

**163ò.पदपरिचयः** - 'नित्यम्' - (द्वि.ए.व.), 'कौटिल्ये' (स.ए.व.) 'गतौ' (स.ए.व.)

**सूत्रप्रकारः** - नियमसूत्रम्।

**164. दीर्घोऽकितः 7 | 4 | 83**

अकितोऽभ्यासस्य दीर्घो यङ्लुकोः। कुटिलं व्रजति वाव्रज्यते॥

**165. यस्य हलः 6 | 4 | 49**

यस्येति संघातग्रहणम्। हलः परस्य यशब्दस्य लोपः आर्धधातुके। आदेः परस्य। अतो लोपः वाव्रजाञ्चक्रे। वाव्रजिता।

**166. रीगृदुपधस्य च 8 | 4 | 39**

ऋदुपधस्य धातोरभ्यासस्य रीगागमो यङ्लुकोः। वरीवृत्यते। वरीवृताञ्चक्रे। वरीवर्तित।

---

**सरलार्थः** - कौटिल्यार्थे एव गतिवाचकधातोः यङ् भवति, क्रियासमभिहारे न भवति॥

**विशेषार्थः** - 'नित्यम्' इति द्वितीयैकवचनान्तं क्रियाविशेषणम्। "**धातोरेकाचो हलादेः०**" सूत्रात् नित्य शब्दः अत्र अवधारणार्थकः। अत एव गत्यर्थकधातूनां 'पुनःपुनः गच्छति' वा 'अतिशयेन गच्छति' इति विग्रहो नैव भवति। व्रज गतौ धातुः गत्यर्थकः अस्ति। अतः कुटिलगमनार्थे यङ् प्रत्ययः अनेन सूत्रेण भविष्यति।

**रूपसिद्धिः** - **पिपठिषति** - पठितुमिच्छतीति विग्रहे 'धातोः कर्मणः' इत्यादिना सन् प्रत्यये 'सन्यङोः' इति पठ् इत्यस्य द्वित्वे अभ्यासादिकार्ये 'सन्यतः' इति इत्वे "सनाद्यन्ता धातवः" इति सन्नन्तस्य धातुत्वे, लटि-तिपि-शपि-पररूपे च कृते सस्य षत्वे 'पिपठिषति' इति॥

**164. पदपरिचयः** - 'दीर्घः' (प्र.ए.व.), 'अकितः' (ष.ए.व.)

**समासः** - नास्ति कित् यस्य सः अकित्, तस्य अकितः (नञ्. बहु०)

**सूत्रप्रकारः** - विधिसूत्रम्।

**अनुवृत्तिः** - "**अत्र लोपोऽभ्यासस्य**" **( 2.4.34 )** इति सूत्रात् 'अभ्यासस्य' इत्यनुवर्तते। "**गुणो यङ्लुकोः**" **( 7.4.82 )** इति सूत्रात् 'यङ्लुकोः' इत्यनुवर्तते।

**सरलार्थः** - यङि यङ्लुकि च परे किद्भिन्नस्य धातोरभ्यासस्य दीर्घः स्यात्।

**विशेषार्थः** - ननु चात्र अपवादत्वात् नुकि कृते अभ्यासस्य अजन्तत्वादेव दीर्घत्वं न भविष्यति ? एवं तर्हि अकितः इत्यनेन एतत् ज्ञाप्यते, अभ्यासविकारेषु अपवादा न उत्सर्गान् विधीन् बाधन्ते इति। एतस्य ज्ञापने सन्ध्यक्षरह्रस्वो न बाध्यते, डोढौक्यते इत्यत्र दीर्घोऽकितः इत्यनेन॥

**रूपसिद्धिः** - **वाव्रज्यते** - कुटिलं व्रजतीति विग्रहे व्रजधातोः यङि द्वित्वे, अभ्यासकार्ये वव्रज् + य् इति दशायाम् अभ्यासदीर्घे सनादि - धातुत्वे लटि धातोः शपि पररूपे एत्वे च वाव्रज्यते॥

**165. पदपरिचयः** - 'यस्य' (ष.ए.व.), हलः (प.ए.व.)

**अनुवृत्तिः** - "**अतो लोपः**" (6.4.48) इत्यस्मात् 'लोपः' तथा "**आर्धधातुके**" (2.4.34) इति अधिक्रियते।

**सूत्रप्रकारः** - अतिदेशसूत्रम्।

**सरलार्थः** - हलः परस्य यशब्दस्य लोपः स्यात् - आर्धधातुके परे॥

**विशेषार्थः** - यस्य हलः। सङ्घातग्रहणार्थमस्ति। तेन ईर्ष्यिता अहर्यादित्यादौ यलोपो न। सङ्घातग्रहणेन चाऽर्थवद्ग्रहणम् परिभाषोपस्थित्या पुत्रकाम्येत्यादौ नातिप्रसङ्गः। वर्णग्रहणे तु उक्तपरिभाषया अनुपस्थित्या स्यादेवात्र यलोप इति भावः। हलः किम् ? लोलूयिता। पोपूयिता॥

**रूपसिद्धिः** - **वाव्रजाञ्चक्रे** - व्रजधातोः यङि, द्वित्वे, अभ्यासकार्ये, वव्रज् + य इत्यत्र अभ्यासदीर्घे, सनादिधातुत्वे, लिटि आमि च वाव्रज् + य + आम् इति अवस्थायां, यलोपे, अतो लोपे च धातोः कृञः अनुप्रयोगे पुनः द्वित्वे अभ्यासकार्ये, श्चुत्वे एशादेशे च वाव्रजाञ्चक्रे।

**वाव्रजिता** - व्रज् + य इति दशायां धातुत्वे, लुटि, तासि, डादेशे, द्वित्वादिकार्ये कृते यलोपे, अतो लोपे च वाव्रज् + त् + आ इति दशायाम्, इडागमे वाव्रजिता।

**167. क्षुभ्नादिषु च 8 | 4 | 39**

णत्वं न। नरीनृत्यते। जरीगृह्यते॥

---

**166. पदपरिचयः** – 'रीक्' (प्र.ए.व.), 'ऋदुपधस्य' (ष.ए.व.) 'च' (अव्य.)

**समासः** – ऋकारः उपधा यस्य ऋदुपधः, तस्य ऋदुपधस्य (बहुव्रीहिः)

**अनुवृत्तिः** – **''अत्र लोपोऽभ्यासस्य''** (7.4.58) सूत्रात् 'अभ्यासस्य' तथा **'गुणो यङ्लुकोः' (7.4.82)** इत्यतः 'यङ्लुकोः' इत्यनुवर्तेते।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – ऋकारोपधस्य धातोः अभ्यासस्य रीगागमः स्यात्, यङि यङ्लुकि च परे।

**विशेषार्थः** – चकारोऽत्र क्रियते। स च ऋदुपधाद् अन्यस्यापि ऋत्वतः समुच्चयार्थः। तेन वृश्चप्रभृतीनामपि ऋत्वतां रीगादयः भवन्तीति।

**रूपसिद्धिः** – **वरीवृत्यते** – वृत्धातोः यङ्प्रत्यये द्वित्वे अभ्यासकार्ये ववृत् + य इति दशायां रीगागमे, वरीवृत् + य् इत्यस्य धातुसंज्ञायां लटि धातोः शपि पररूपे एत्वे च वरीवृत्यते॥

**वरीवृताञ्चक्रे** – वृत्धातोः यङि द्वित्वे, अभ्यासकार्ये रीगागमे वरीवृत् + य इति दशायां धातुत्वात् लटि यलोपे अतो लोपे च वरीवृत् + आम् इत्यत्र त प्रत्यये, कृञोऽनुप्रयोगे द्वित्वे अभ्यासे श्चुत्वे वरीवृताञ्चक्रे॥

**167. पदपरिचयः** – 'क्षुभ्नादिषु' (स.ब.व.) च (अव्य.)

**समासः** – क्षुभ्नाशब्द आदिर्येषान्ते क्षुभ्नादयः, तेषु – क्षुभ्नादिषु (तद्गुण. बहु.)

**अनुवृत्तिः** – **''रषाभ्यां नो णः समानपदे''** (8.4.1) इत्यस्मात् 'नः, णः' इति पदद्वयमनुवर्तते।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – क्षुभ्नादिगणे नस्य णत्वं न भवति।

**विशेषार्थः** – अजादेशस्य स्थानिवद्भावादिह अपि प्रतिषेधो भवति। क्षुभ्नीतः इति अपरमुदाहरणम्।

**रूपसिद्धिः** – **नरीनृत्यते** – नृत्धातोर्यङि द्वित्वे, अभ्यासकार्ये रीगागमे, धातुत्वाल्लटि, धातोः शपि टेरेत्वे नरीनृत्यते। अत्र प्रकृतसूत्रेण नकारस्य णकारो न भवति।

**जरीगृह्यते** – गृहधातोर्यङि द्वित्वादिअभ्यासकार्ये, जश्त्वे रीगागमे लटि तप्रत्यये शपि एत्वे जरीगृह्यते॥

1. यङन्तप्रकरणे पठिताः पञ्चधातवः: अधोनिर्दिष्टाः सन्ति।

| लकाराः | भूधातुः (सत्तायाम्) | व्रजधातुः (गतौ) | वृतुधातुः (वर्तने) |
|---|---|---|---|
| लट् | बोभूयते। | वाव्रज्यते। | वरीवृत्यते। |
| लिट् | बोभूयाञ्चक्रे। | वाव्रजाञ्चक्रे। | वरीवृताञ्चक्रे। |
| लुट् | बोभूयिता। | वाव्रजिता। | वरीवर्तिता। |
| लृट् | बोभूयिष्यते | वाव्रजिष्यते। | वरीवर्तिष्यते। |
| लोट् | बोभूयताम्। | वाव्रज्यताम् | वरीवृत्यताम्। |
| लङ् | अबोभूयत। | अवाव्रज्यत। | अवरीवृत्यत। |
| वि. लिङ् | बोभूयेत। | वाव्रज्येत। | वरीवृत्येत। |
| आ. लिङ् | बोभूयिषीष्ट। | वाव्रजिषीष्ट। | वरीवर्तिषीष्ट। |
| लुङ् | अबोभूयिष्ट। | अवाव्रजिष्ट। | अवरीवृत्यत। |
| लृङ् | अबोभूयिष्यत। | अवाव्रजिष्यत | अवरीवर्तित। |

2.

| लकाराः | नृत्धातुः ( नर्तने ) | ग्रहधातुः ( उपादाने ) |
|---|---|---|
| लट् | नरीनृत्यते। | जरीगृह्यते। |
| लिट् | नरीनृताञ्चक्रे। | जरीग्रहाञ्चक्रे। |
| लुट् | नरीनर्तिता। | जरीग्रहिता। |
| लृट् | नरीनर्तिष्यते। | जरीग्रहिष्यते। |
| लोट् | नरीनृत्यताम्। | जरीगृह्यताम् |
| लङ् | अनरीनृत्यत। | अजरीगृह्यत। |
| वि. लिङ् | नरीनृत्येत। | जरीगृह्येत। |
| आ. लिङ् | नरीनर्तिषीष्ट। | जरीग्रहिषीष्ट। |
| लुङ् | अनरीनृत्यत। | अजरीग्रहिष्ट |
| लृङ् | अनरीनर्तिष्यत। | अजरीग्रहिष्यत। |

| सामान्यं क्रियापदम् | सन्नन्तं क्रियापदम् |
|---|---|
| कूर्दते | चोकूर्द्यते |
| क्रीडति | चेक्रीड्यते |
| खादति | चाखाद्यते |
| गायति | जेगीयते |
| जानाति | जाज्ञायते |
| त्यजति | तात्यज्यते |
| पश्यति | दरीदृश्यते |
| नमति | नंनम्यते |
| पचति | पापच्यते |
| पठति | पापठ्यते |
| पिबति | पेपीयते |

**स्वाध्यायः**

**1. योग्यविकल्पं चित्वा उत्तरं ददत।**

(1) ''गुणो यङ्लुकोः'' अनेन सूत्रेण किं भवति ?

(क) लुक् (ख) यङ् (ग) गुणः (घ) वृद्धिः

(2) व्रजधातोः अर्थः कः ?

(क) गतिः (ख) ग्रहणम् (ग) वर्तनम् (घ) सञ्चलनम्

(3) कूर्दते - इत्यस्य यङन्ते किं रूपम् ?

(क) कुकूर्द (ख) चोकूर्द्यते (ग) कूर्दिष्यति (घ) चुकूद्यते

(4) कुटिलं व्रजति अर्थात् ?

(क) वरीवृत्यते (ख) बोभूयते (ग) वाव्रज्यते (घ) नरीनृत्यते

(5) 'यस्य हलः' इति किम्प्रकारकं सूत्रम् ?

(क) विधिसूत्रम् (ख) अतिदेशसूत्रम् (ग) संज्ञासूत्रम् (घ) अधिकारसूत्रम्

(6) 'रीगृदुपधस्य च' इत्यनेन किं भवति ?

(क) यङागमः (ख) सनागमः (ग) रीगागमः (घ) यगागमः

(7) 'क्षुभ्नादिषु च' इति किं सूत्रम् ?

(क) विधिसूत्रम् (ख) संज्ञासूत्रम् (ग) नियमसूत्रम् (घ) निषेधसूत्रम्

**2. अधोलिखितानां प्रश्नानां लघूत्तराणि लिखत।**

(1) यङ्प्रत्ययः केन सूत्रेण भवति ?

(2) यङन्तप्रकरणे कति धातवः पठिताः ?

(3) गायतीत्यस्य यङन्तं रूपं किम् ?

(4) ग्रहधातोः कः अर्थः ?

(5) पश्यतीत्यस्य यङन्तं रूपं किम् ?

(6) नरीनृत्यते इत्यस्य विग्रहः कः ?

(7) वाव्रजिता इत्यत्र कः लकारः ?

**3. विस्तरेण प्रश्नानामुत्तराणि लिखत।**

(1) वृतुधातोः - लट्-लिट्-लोट् लकाररूपाणि लिखत।

(2) व्रजधातोः - लट्-लुट्-लृट् लकाररूपाणि लिखत।

(3) ग्रहधातोः - लट्-लङ्-लुङ् लकाररूपाणि लिखत।

**4. ससूत्रं रूपसिद्धिं कुरुत।**

(1) बोभूयते (2) वाव्रज्यते (3) वाव्रजिता (4) वरीवृत्यते (5) जरीगृह्यते

(6) वाव्रजाञ्चक्रे (7) बोभूयाञ्चक्रे

**5. अधोलिखितानि सूत्राणि सविस्तरं व्याख्यात।**

(1) धातोरेकाचो हलादेः।

(2) यस्य हलः ।

(3) क्षुभ्नादिषु च ।

●

| 16 | यङ्लुगन्तप्रकरणम् |
|---|---|

**168. यङोऽचि च 2 | 4 | 74**

यङोऽचि प्रत्यये लुक् स्यात्। चकारात्तं विनापि क्वचित्। अनैमित्तिकोऽयमन्तरङ्गत्वादादौ भवति। ततः प्रत्ययलक्षणेन यङन्तत्वाद् द्वित्वम्। अभ्यासकार्यम्। धातुत्वाल्लडादयः। शेषात्कर्तरि इति परस्मैपदम्। चर्करीतं चेत्यदादौ पाठाच्छपो लुक्।

**169. यङो वा 7 | 3 | 94**

यङ्लुगन्तात्परस्य हलादेः पितः सार्वधातुकस्येड् वा स्यात्। भूसुवोरिति गुणनिषेधो यङ्लुकि भाषायां न, बोभूतु तेतिक्ते इति छन्दसि निपातनात्। बोभवीति, बोभोति। बोभूतः। अदभ्यस्तात्। बोभुवति। बोभवाञ्चकार, बोभवामास। बोभविता। बोभविष्यति। बोभवीतु, बोभोतु, बोभूतात्। बोभूताम्। बोभुवतु। बोभूहि। बोभवानि। अबोभवीत्, अबोभोत्। अबोभूताम्। अबोभवुः। बोभूयात्। बोभूयाताम्। बोभूयुः। बोभूयात्। बोभूयास्ताम्। बोभूयासुः। गातिस्थेति सिचो लुक्। यङो वेतीट्पक्षे गुणं बाधित्वा नित्यत्वाद् वुक्। अबोभूवीत्, अबोभोत्। अबोभूताम्। अबोभूवुः। अबोभविष्यत्॥

---

**168. पदपरिचयः** - 'यङः' (ष.ए.व.), 'अचि' (स.ए.व.), 'च' (अव्य.)

**अनुवृत्तिः** - ''**बहुलं छन्दसि**'' **( 7-3-98 )** इत्यस्मात् 'बहुलम्' इति अनुकृष्यते। ''**ण्यक्षत्रियार्षञितो यूनि लुगणिञोः**'' **( 2-4-58 )** इत्यस्मात् 'लुक्' इत्यनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अजादौ प्रत्यये यङो लोपः स्यात्।

**विशेषार्थः** - बहुलनिर्देशाद् अजादिप्रत्ययाऽभावेऽपि लोपो भवति। बहून् अर्थान् लातीति बहुलम्। यङ्लुग् द्विविधः - 'पापच' इत्यादौ अज्निमित्तकः एकः। सूत्रस्थ 'च' शब्देनाचं विनापि भवन् अनैमित्तिको द्वितीयः। ''**असिद्धं बहिरङ्गमन्तरङ्गे**'' इति परिभाषया अन्तरङ्गे कार्ये कर्तव्ये बहिरङ्गकार्यम् असिद्धं भवति। अत्र अजादेः अभावे यङ्प्रत्ययस्य लुक्कार्यं न किञ्चित् आश्रयते इत्यतः तत्-अन्तरङ्गम् द्वित्वं तु एकाजनेकाजादि आश्रयते इत्यतः तद् बहिरङ्गम्। अतः अन्तरङ्गं पूर्वं ततः द्वित्वादिबहिरङ्गकार्यं भवति। अत्रैका शंका जागर्ति - यदि यङः लोपः पूर्वं भवति, तर्हि यङः अभावे ''**सन्यङोः**'' इत्यनेन द्वित्वं भवति उत न ? तत्र समाधानमुच्यते - ''**प्रत्ययलोपे प्रत्ययलक्षणम्**'' इति न्यायेन यङ्प्रत्ययस्य लोपेऽपि शेषांशं यङन्तं मत्त्वा द्वित्वादिकार्याणि भविष्यन्त्येव।

**169. पदपरिचयः** - 'यङः' (प.ए.व.), 'वा' (अव्य.)।

**अनुवृत्तिः** - ''**उतो वृद्धिर्लुकि हलि**'' (7.3.98) इत्यस्मात् 'हलि' इत्यनुवर्तते, ''**नाभ्यस्तस्याऽचि पिति सार्वधातुके**'' **( 7-3-87 )** इत्यस्मात् 'पिति', 'सार्वधातुके' इति पदेऽनुवर्तेते, ''**ब्रुव ईट्**'' **( 7-3-93 )** इत्यतः 'ईट्' इत्यनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - यङ्लुगन्तात् परस्य हलादेः पित्संज्ञकस्य सार्वधातुकसंज्ञकस्य च प्रत्ययस्य विकल्पेन ईडागमः भवति।

**विशेषार्थः** - ''हल्'' इति सार्वधातुकस्य विशेषणम् अस्ति। अतः तदादिविधौ हलादौ पिति सार्वधातुके इत्येवं भविष्यति। यङः पञ्चम्यन्तं तथा हलादौ पिति सार्वधातुके इत्यस्मिन् सप्तमी अस्ति '**उभयनिर्देशे पञ्चमीनिर्दिशो बलीयान्**' इति परिभाषानुसारं पञ्चम्याः निर्देशः बलवान् अनुशास्यते। अतः हलादौ पिति सार्वधातुके इत्यस्य स्थाने विभक्तिविपरिणामात् 'हलादेः पितः सार्वधातुकस्य' इत्येवं भविष्यति॥

**रूपसिद्धिः** - **बोभवीति-बोभोति** - अतिशयेन पुनः पुनर्वा भवतीति विग्रहे भूधातोः ''धातोरेकाचो हलादेः'' इति यङि द्वित्वापेक्षयान्तरङ्गत्वात्पूर्वं 'यङोऽचि च' इति यङो लुकि प्रत्ययलक्षणेन यङन्तत्वमाश्रित्य 'भू' इत्यस्य

द्वित्वेऽभ्यासकार्ये कृते 'बोभू' इत्यस्य धातुसंज्ञायां लटि शेषात्कर्तरीति सहकारेण परस्मैपदमिति परस्मैपदे तिपि, शपि यङ्लुग्बोधक 'चर्करीत' शब्दस्यादादिपाठाच्छपः लुकि, 'यङो वा' इति ईड्विकल्पे गुणावादेशयोः कृतयोः बोभवीति इति। ईडभावे 'बोभोति' इति। अत्र 'भूसुवोस्तिङि' इति गुणनिषेधस्तु न 'बोभोतु' इति छन्दसि गुणस्य निपातनेन लोके यङ्लुकि गुणस्येष्टवात्॥

**यङ्लुक्प्रकरणस्य परिचयः प्रयोगश्च।**

अस्यां प्रक्रियायां पूर्वकृतस्य यङ्प्रत्ययस्य लोपः (लुक्) भवति। अत्र किमपि अर्थस्य परिवर्तनं न भवति। क्रियासमभिहारादि ये अर्थाः यङन्तस्य, ते एव अर्थाः यङ्लुगन्तस्यापि ज्ञेयाः। अतः एव बोभूयते (यङन्तप्रक्रिया) एवं बोभवीति (यङ्लुगन्तप्रक्रिया) अनयोः द्वयोः मध्ये नास्ति किमपि अन्तरम्। तथापि छात्रबोधाय केचन प्रयोगाः सार्थाः अत्र प्रदीयन्ते।

(1) पुनः पुनः अतिशयेन वा पुनाति - पोपवीति - पोपोति।

(2) पुनः पुनः अतिशयेन वा जयति - जेजयीति - जेजेति।

(3) पुनः पुनः अतिशयेन वा करोति - चर्करीति - चर्कर्ति।

(4) पुनः पुनः अतिशयेन वा तनोति - तन्तनीति - तन्तन्ति।

(5) पुनः पुनः अतिशयेन वा भ्रमति - बभ्रमीति - बम्भ्रन्ति।

(6) पुनः पुनः अतिशयेन वा ददाति - ददेति - ददाति।

(7) पुनः पुनः अतिशयेन वा गृह्णाति - जाग्रहीति - जाग्राति।

(8) पुनः पुनः अतिशयेन वा विशति - वेविशीति - वेवेष्टि।

(9) पुनः पुनः अतिशयेन वा कुटिलं व्रजति - वाव्रजीति, वोव्रत्ति

(10) पुनः पुनः अतिशयेन वा लूनाति - लोलवीति - लोलोति।

**स्वाध्यायः**

**1. योग्यविकल्पं चित्वा उत्तरं ददत।**

(1) यङ्लुगन्तप्रकरणे सूत्रसंख्या का ?

(क) 2 (ख) 5 (ग) 3 (घ) 4

(2) "यङोऽचि च" अनेन सूत्रेण किं भवति ?

(क) लुक् (ख) ईड् (ग) गुणः (घ) निषेधः

(3) 'अचि' इति का विभक्तिः ?

(क) प्रथमा (ख) सप्तमी (ग) षष्ठी (घ) पञ्चमी

(4) 'यङो वा' इत्यनेन किं भवति ?

(क) ह्रस्वः (ख) ईड् (ग) दीर्घः (घ) यङ्

(5) "यङोऽचि च" इति कीदृशं सूत्रम् ?

(क) संज्ञासूत्रम् (ख) परिभाषासूत्रम् (ग) विधिसूत्रम् (घ) अतिदेशसूत्रम्

**2. अधोलिखितानां प्रश्नानां लघूत्तराणि लिखत।**

(1) ''यङोऽचि च'' सूत्रस्य पदपरिचयं लिखत।

(2) 'बहुलम्' इत्यस्य विग्रहः कः ?

(3) बोभवीतीत्यस्य विग्रहः कः ?

(4) ''यङो वा'' इति सूत्रेण ईडभावे किं भवति ?

(5) उभयनिर्देशे कः निर्देशो बलीयान् ?

**3. सविस्तरेण प्रश्नानामुत्तराणि लिखत।**

(1) 'उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' इति स्पष्टयत।

(2) भूधातोः यङ्लुकि - लट् - लिट् - लुट् लकाररूपाणि लिखत।

(3) भूधातोः यङ्लुकि - लिङ् - लुङ्, लृङ् लकाररूपाणि लिखत।

**4. रूपसिद्धिं कुरुत।**

(1) बोभवीति (2) बोभवाञ्चकार (3) बोभविता (4) बोभविष्यति (5) बोभवीतु

(6) अबोभवीत्

**5. सविस्तरं व्याख्यात।**

(1) यङोऽचि च।

(2) यङो वा।

●

# 17 तर्कसङ्ग्रहः - प्रत्यक्षखण्डः

**मङ्गलाचरणम् -**

**निधाय हृदि विश्वेशं विधाय गुरुवन्दनम्।**
**बालानां सुखबोधाय क्रियते तर्कसङ्ग्रहः॥**

**विश्वेशम्** - जगत्कर्तारं साम्बमूर्तिं, **हृदि** - मनसि, नितरां धारयित्वा गुरुवन्दनं च, **विधाय** कृत्वा, बालानां **सुखबोधाय** - अनायासेन पदार्थतत्त्वज्ञानाय **मया** अन्नंभट्टेन, तर्कसङ्ग्रहः **तर्काः** सप्तपदार्थाः तेषां सङ्ग्रहः तर्कसङ्ग्रहः तर्कसङ्ग्रहनामकः ग्रन्थः **क्रियते** - विधीयते।

**पदकृत्यम् -**

बालेति। अधीतव्याकरणकाव्यकोषः अनधीतन्यायशास्त्रो बालः । व्यासादावतिव्याप्तिवारणाय अनधीतन्यायेति सुखेति सुखेन अनायासेन बोधाय पदार्थतत्त्वज्ञानाय इत्यर्थः। तर्क्यन्ते-प्रमितिविषयीक्रियन्ते इति तर्काः द्रव्यादिपदार्थाः। तेषां सङ्ग्रहः संक्षेपेण उद्देश-लक्षण-परीक्षाः यस्मिन् सः ग्रन्थः। 'नाममात्रेण वस्तुसंकीर्तनम्' उद्देशः यथा- द्रव्यं गुण इति। 'असाधारणधर्मः' लक्षणं यथा-गन्धवत्त्वं पृथिव्याः। लक्षितस्य लक्षणं सम्भवति न वेति विचारः परीक्षा। अत्र उद्देशस्य पक्षज्ञानं फलम्, लक्षणस्य इतरभेदज्ञानं परीक्षायाः लक्षणे दोषपरिहारः इति मन्तव्यम्।

**पदकृत्यव्याख्या** - मङ्गलाचरणे बालशब्दः पारिभाषिकः अर्थात् वयसः दृष्ट्या न बालकः, अपि तु पठितव्याकरणकाव्यकोशः अपठितन्यायशास्त्रः बालः इति अध्ययनदृष्ट्या बालः गृहीतः। ज्ञातव्याकरणादिशास्त्रे व्यासे बाल-लक्षणस्य अतिव्याप्तिदोषवारणाय 'अनधीतन्यायः' इति पदं प्रदत्तम्। मातुः स्तनपानकर्तरि शिशौ बाल-लक्षणस्य अतिव्याप्तिदोषनिवारणाय 'अधीतव्याकरणम्' इत्यादि पदं प्रदत्तम्। **सुखेति** अनायासेन (अल्पप्रयत्नेन) द्रव्यादिपदार्थानां तत्त्वज्ञानाय इत्यर्थः। प्रमाणबोधजन्यपदार्थाः **तर्काः,** तेषां संग्रहः अर्थात् संक्षेपेण यस्मिन् उद्देशः लक्षणं परीक्षा च सन्ति अतः अस्य ग्रन्थस्य तर्कसंग्रहः इति नामाभिधानम्।

**उद्देशः** - नाममात्रेण वस्तुसंकीर्तनम्। यथा द्रव्यं गुणाः कर्म इति।

**लक्षणम्** - 'असाधारणधर्मः' लक्षणम्। यथा - गन्धवत्त्वं पृथिव्याः लक्षणम्।

गन्धवत्त्वधर्मः (गन्धः) केवलं पृथिव्यामेव वर्तते। एषः पृथिव्याः असाधारणधर्मः। अतः पृथिव्याः लक्षणमिदम्।

**परीक्षा** - लक्षितस्य लक्षणं सम्भवति न वा इति विचारः। यथा लक्षितस्य पृथिव्यादिपदार्थस्य गन्धवत्त्वादिलक्षणं सम्भवति न वा इति विचारः परीक्षा उच्यते।

**उद्देशस्यफलम्** - पक्षज्ञानम्।

**लक्षणस्य फलम्** - इतरेतरभेदज्ञानं यथा गन्धवत्त्वलक्षणात् पृथिव्यादौ जलादेः भेदज्ञानं भवति।

**परीक्षाफलम्** - लक्षणे दोषपरिहारः।

पदार्थाः कति कानि च तेषां नामानि ?

(1) **द्रव्य-गुण-कर्म-सामान्य-विशेषसमवायाभावाः सप्तपदार्थाः॥**

तत्र द्रव्याणि

(2) **पृथिव्यप्तेजो-वाय्वाकाश-काल-दिगात्म-मनांसिन नवैव॥**

पदकृत्यम् - तत्रेति। तत्र सप्तपदार्थमध्य इत्यर्थः। द्रव्याणि नवैव इत्यन्वयः। एवं तत्र इति पदं चतुर्विंशतिर्गुणा इत्यादिनाप्यन्वेति। द्रव्यत्वजातिमत्त्वं, गुणत्त्वं, समवायिकारणत्वं वा द्रव्यसामान्य-लक्षणम्।

(1) **मूलार्थः** - वैशेषिकदर्शने - द्रव्यम्, गुणः, कर्म, सामान्यम्, विशेषः समवायः, अभावः इति सप्तपदार्थाः स्वीक्रियन्ते।

(2) सप्तपदार्थेषु पृथिवी, जलम्, तेजः, वायुः, आकाशम्, कालः, दिक् (दिशा), आत्मा, मनः एतानि नव द्रव्याणि सन्ति।

पदकृत्यव्याख्या - तत्र सप्तपदार्थेषु पृथिवी, जलम्, तेजःप्रभृति नव एव द्रव्याणि सन्ति। एवम् अग्रे अपि - 'तत्र' इति पदस्य सम्बन्धः चतुर्विंशतिर्गुणाः सन्ति। सप्तपदार्थेषु उत्क्षेपणादीनि पञ्चकर्माणि भवन्ति इत्यादि।

द्रव्यलक्षणं - द्रव्यत्वजातिमत्त्वम्, गुणवत्त्वम्, कार्यं प्रति समवायिकारणं वा द्रव्यसामान्यलक्षणम्। यस्मिन् द्रव्यत्वजातिः कार्यमात्रस्य समवायिदिकारणं तद् द्रव्यम्॥

**मूलम् - कति गुणाः ? के च ते ?**

(1) **रूप-रस-गन्ध-स्पर्श-संख्या-परिमाण-पृथक्त्व-संयोग-विभाग परत्वाऽपरत्व-गुरुत्व-द्रवत्व-स्नेह-शब्द-बुद्धि-सुख-दुःखेच्छा-द्वेष-प्रयत्न-धर्माऽधर्म-संस्काराश्चतुर्विंशतिर्गुणाः।**

कियन्ति कर्माणी कानि च तानि ?

(2) **उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्च कर्माणि।**

सामान्यं कति विधम् ?

(3) **परमपरं चेति द्विविधं सामान्यम्।**

कियन्तो विशेषाः ?

(4) **नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव।**

**पदकृत्यम्** - परमपरं चेति परसामान्याऽपरसामान्यमित्यर्थः। परत्वं चाऽधिकदेशवृत्तित्वम्। अपरत्वं न्यूनदेशवृत्तित्वम्। तदेव हि लक्षणं यदव्याप्त्यतिव्याप्त्यसम्भव-(अव्याप्ति-अतिव्याप्ति-असम्भव-) रूपदोषत्रयशून्यम्। यथा गोः सास्नादिमत्त्वम्। अव्याप्तिः च 'लक्ष्यवृत्तित्वे सत्यलक्ष्यवृत्तित्त्वम्', अत एव गोर्न श्रृङ्गित्वलक्षणं तस्याऽतिव्याप्तिग्रस्तत्वात्। असम्भवश्च - लक्ष्यमात्राऽवृत्तित्वम्।

(1) **मूलार्थः** - रूपम्, रसः, गन्धः, स्पर्शः, संख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः परत्वम्, अपरत्वम्, गुरुत्वम्, द्रवत्वम्, स्नेहः, शब्दः, बुद्धिः, सुखम्, दुःखम्, इच्छा, द्वेषः, प्रयत्नः धर्म, अधर्मः, संस्कारः इति एते चतुर्विंशतिः गुणाः सन्ति।

(2) कियन्ति कर्माणि कानि च तानि ?

(1) उत्क्षेपणम्-ऊर्ध्वक्षेपणम्।
(2) अपक्षेपणम्-अधोनिक्षेपणम्।
(3) आकुञ्चनम्-संकोचनम्।
(4) प्रसारणम्-विस्तरणम्
(5) गमनम्-उत्तरदेशसंयोगः।

एतानि पञ्चकर्माणि सन्ति।

(3) **सामान्यम्**

**अर्थः** परसामान्यम्, अपरसामान्यम् इति द्विविधम् अस्ति।

पदकृत्यव्याख्या -

(1) परं यत्सामान्याऽपेक्षया अधिकदेशवृत्तिः। अपरं - न्यूनदेशवृत्तिः। यथा-पृथिवीत्वाद्यपेक्षया द्रव्यत्वं परसामान्यम्, पृथिवीत्वादि अपरसामान्यम् अस्ति॥

(2) लक्षणस्य त्रयः दोषाः भवन्ति-अतिव्याप्तिः अव्याप्तिः असम्भवः च। अतिव्याप्तिः अलक्ष्ये लक्षणम्। यथा-श्रृङ्गित्वं गोर्लक्षणं कृतञ्चेत् लक्ष्यभूत-गोभिन्नमहिष्यादौ अतिव्याप्तिः तत्रापि श्रृङ्गित्वस्य विद्यमानत्वात्।

**अव्याप्तिः।** लक्ष्यैकदेशाऽवृत्तित्वम्-लक्ष्यस्य एकभागे लक्षणस्य अप्रवृत्तिः अव्याप्तिः। यथा गोः कपिलत्वं लक्षणं चेत् श्वेतगवि अव्याप्तिः तत्र कपिलरूपत्वस्य अभावात्।

**असम्भवः।** लक्ष्यमात्रे कुत्रापि लक्षणाऽसत्त्वम्। यथा गोः एकशफवत्वं न लक्षणं गोसामान्यस्य द्विशफत्वेन प्रसिद्धे। एकशफवत्त्वस्य कुत्रापि असम्भवात्।

कियन्तो विशेषाः ?

(1) **नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव।**

समवायः कतिविधः ?

**समवायस्त्वेक एव।**

अभावः कतिविधः ?

(2) **अभावश्चतुर्विधः प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति।**

**पदकृत्यम्-नित्येति।** 'ध्वंसभिन्नत्वे सति ध्वंसाऽप्रतियोगित्वं नित्यत्वम्'। ध्वंसेऽतिव्याप्तिवारणाय 'ध्वंसभिन्ने'ति विशेषणम्। घटादावतिव्याप्तिवारणाय विशेष्यदलम्। 'ध्वंसप्रतियोगित्वं प्रागभावप्रतियोगित्वं वा' अनित्यत्वम्।

**मूलार्थः**

(1) नित्यद्रव्येषु वर्तमानाः विशेषाः अनन्ताः एव भवन्ति।

(2) समवायः तु एक एव भवति।

(3) अभावः चतुर्विधः भवति। प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावः, अन्योन्याभावः। इति उद्देशग्रन्थः अर्थात् पदार्थानां नाममात्रेण कथनम् अस्ति। एतेषां पदार्थद्रव्याणां विशेषतः लक्षणविचारः अग्रे क्रियते।

**पदकृत्यव्याख्या** - यस्य अभावः भवति सः प्रतियोगी कथ्यते। यस्मिन् अभावो भवति सः अनुयोगी कथ्यते। यथा - 'भूतले घटो नास्ति' इति वाक्ये भूतले घटस्य अभावः वर्तते। तस्माद् घटः प्रतियोगी। स च घटाभावः भूतले अस्ति, अतः भूतलम् अनुयोगी भवति। अत्र पदकृत्ये नित्येति - ध्वंसः (विनाशः) तस्य अभावे सति ध्वंसस्य (विनाशस्य) अप्रतियोगित्वं - ध्वंसाऽयोग्यत्वं नित्यत्वम्। अविनाशित्वं नित्यत्वमित्यर्थः। ध्वंसस्य अप्रतियोगी ध्वंसः अपि अस्ति, ध्वंसस्य अभावः (ध्वंसः) कदापि न भवति अतः ध्वंसे नित्यलक्षणवारणाय - 'ध्वंसभिन्नः' इति विशेषणं प्रदत्तम्। ध्वंसभिन्ने घटादौ नित्यलक्षणस्य अतिव्याप्तिवारणाय - 'ध्वंसाप्रतियोगित्वम्' इति विशेष्यपदं प्रदत्तम्। यतः घटस्तु ध्वंसस्य प्रतियोगी भवति। 'यस्य अभावः भवति सः प्रतियोगी' उच्यते। ध्वंसस्य प्रागभावस्य वा प्रतियोगी अनित्यः।

**पृथिव्याः किं लक्षणं कति च भेदाः ? तत्र गन्धवती पृथिवी। सा द्विविधा नित्याऽनित्या च। नित्या-परमाणुरूपा। अनित्या-कार्यरूपा। पुनस्त्रिधा-शरीरेन्द्रियविषयभेदात्। शरीरमस्मदादीनाम्। इन्द्रियं गन्धग्राहकं घ्राणं तच्च नासाग्रवर्ति। विषयो मृत्पाषाणादिः।**

**पदकृत्यम्** - शरीरेति। यद् भोगायतनं तदेव शरीरं चेष्टाश्रयो वा। इन्द्रियमिति। चक्षुरादौ अतिव्याप्तिवारणाय गन्धग्राहकमिति। कालादावतिव्याप्तिवारणायेन्द्रियमिति। विषय इति। शरीरेन्द्रियभिन्नत्वे सत्युपभोगसाधनं विषयः। शरीरादावतिव्याप्तिनिरासाय सत्यन्तम्। परमाण्वादावतिव्याप्तिवारणाय-विशेष्यदलम्। कालादावतिव्याप्तिवारणाय-जन्यत्वं सत्यपि प्रदेयम्।

**मूलार्थः** - तत्र नव द्रव्येषु गन्धवत्त्वं पृथिव्याः लक्षणम्। गन्धः अस्याः अस्तीति गन्धवती पृथिवी। सा-पृथिवी परमाणुरूपा नित्या भवति। कार्यरूपा अनित्या भवति। सा पृथिवी पुनः त्रिधा भवति-पृथिव्याः शरीरम् अस्मदादीनां शरीरम् अस्ति। पृथिव्या इन्द्रियं गन्धग्राहकं घ्राणं-यन्नासाग्रे स्थितम् अस्ति। पृथिव्याः विषयः मृत्तिका-पाषाणादयः।

**शरीरस्य लक्षणम्** - सुखदु:खादीनां भोगानाम् आधारभूतं चेष्टाश्रयं वा शरीरम् उच्यते। चक्षुरादौ घ्राणलक्षणस्य अतिव्याप्तिवारणाय गन्धग्राहकम् इति विशेषणं जन्यमात्रस्य जनकत्वात् कालोऽपि गन्धग्रहणस्य कारणमस्ति अत: कालादौ घ्राणलक्षणस्य अतिव्याप्तिवारणाय इन्द्रियमिति। शरीरेन्द्रियभिन्नत्वेऽपि उपभोगस्य साधनं विषय: भवति। उपभोगस्य साधनं तु शरीरम् इन्द्रियाणि च उपभोगसाधनानि सन्ति तत्र विषयलक्षणस्य अतिव्याप्तिवारणाय शरीरेन्द्रियभिन्नत्वे सति इति विशेषणम्। शरीरेन्द्रियभिन्न-परमाण्वादौ अतिव्याप्तिवारणाय उपभोगसाधनम् इति विशेष्यपदम्। अतीन्द्रियस्य परमाणो: उपभोग: न भवति। 'जन्यानां जनक: काल:' इति नियमबलेन काल: अपि शरीरेन्द्रियभिन्नत्वे सति उपभोग-साधनं प्रति कारणम् अस्ति। तत्र विषयत्वस्य वारणाय जन्यत्वे सति इत्यादि-विशेषणं देयम्। कालस्तु नित्य: अस्ति, न तु जन्य:।




## जलस्य किं लक्षणं कति च भेदा: ?

**शीतस्पर्शवत्य आप:। ता: द्विविधा: नित्या: अनित्याश्च। नित्या: परमाणुरूपा:। अनित्या: कार्यरूपा:। पुनस्त्रिविधा: - शरीरेन्द्रियविषयभेदात्। शरीरं वरुणलोके। इन्द्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति। विषय: सरित्समुद्रादि:।**

**पदकृत्यम्** - शीतेति। तेजादावतिव्याप्तिवारणाय शीतेति। आकाङ्क्षावारणाय स्पर्शेति। कालादावतिव्याप्तिवारणाय समवायसम्बन्धेनेति पदं देयम्। इन्द्रियमिति। त्वगादावतिव्याप्तिवारणाय रसग्राहकमिति। रसनेन्द्रियरससन्निकर्षादावतिव्याप्तिनिरासाय इन्द्रियमिति। सरिदिति। आदिना तडाग-हिमकरकादीनां संग्रह:।

**मूलार्थ:** - यस्य द्रव्यपदार्थस्य शीत: स्पर्श: तज्जलम् अस्ति। तज्जलं द्विविधं नित्यम् अनित्यं च। नित्यं परमाणुरूपम्। अनित्यं - कार्यरूपम्। शरीरेन्द्रियविषयभेदात् जलं त्रिविधम्। जलस्य शरीरं वरुणलोके विद्यते। जलस्य

इन्द्रियं रसग्रहणशीलं रसनम् अस्ति। यच्च जिह्वायाः अग्रभागे तिष्ठति। येन रसस्य मुखे भानं भवति। जलस्य विषयः नद्यः समुद्रादयः सन्ति।

**टिप्पणी** – शीतस्पर्शसमवायिकारणत्वं जलत्वम्। अर्थात् शीतस्पर्शस्य यत् समवायिकारणम् अस्ति तज्जलम् उच्यते।

**पदकृत्यव्याख्या** – तेजसि अतिव्याप्तिवारणाय शीतः इति विशेषणम्। पृथिव्यादावतिव्याप्तिवारणाय स्पर्शपदं प्रदत्तम्। कालिकसम्बन्धेन कालः अपि शीतस्पर्शाश्रयः अस्ति। अतः कालादौ अतिव्याप्तिवारणाय-समवायसम्बन्धेति पदं देयम्। रसनेन्द्रियसन्निकर्षः रससंयोगः। तत्र अतिव्याप्तिवारणाय इन्द्रियमिति। न हि संयोगादिः इन्द्रियम्। सरित्समुद्रादिः इति आदिपदेन तडागहिमकरकादीनामपि ग्रहणं भवति। आपः इति पदम् अप्-शब्दस्य स्त्रीलिङ्गस्य नित्यबहुवचनस्य अस्ति। अतः मूले शीतस्पर्शवत्यः इत्यपि स्त्रीलिङ्गे बहुवचने। सुखबोधाय सरलार्थे जलशब्दः प्रदत्तः स च नपुसके विद्यते।

## तेजसः किं लक्षणम्, कति च भेदाः ?

**उष्णस्पर्शवत्तेजः। तच्च द्विविधम्-नित्यमनित्यं च। नित्यं परमाणुरूपम्। अनित्यं कार्यरूपम्। पुनस्त्रिविधम् शरीरेन्द्रियविषयभेदात्। शरीरमादित्यलोके प्रसिद्धम्। इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति। विषयश्चतुर्विधो भौमदिव्योदर्याकारजभेदात्। भौमं वह्न्यादिकम्। अबिन्धनं दिव्यं विद्युदादि। भुक्तस्य परिणामहेतुरुदर्यम्। आकरजं सुवर्णादि।**

**पदकृत्यम्** – उष्णेति। जलादावतिव्याप्तिवारणायोष्णेति।

कालादावतिप्रसङ्गवारणाय समवायसम्बन्धेनेति पदं देयम्।

इन्द्रियमिति घ्राणादौ अतिव्याप्तिवारणाय रूपग्राहकमिति। भेदात् इति पदं प्रत्येकमभिसम्बध्यते।

भौममिति। आदिपदेन खद्योतगततेजःप्रभृतेः परिग्रहः। विद्युदादीति। आदिना अर्कचन्द्रादीनां परिग्रहः। भुक्तेति। भुक्तस्य – अन्नादेः, पीतस्य – जलादेः जीर्णता, तस्य हेतुरौदर्यमिति। सुवर्णेति। आदिना रजतादिपरिग्रहः।

**मूलार्थः** – यस्मिन् द्रव्ये उष्णः (धर्मः) स्पर्शः च भवति तत् द्रव्यं तेजः उच्यते। तेजसः द्वौ भेदौ भवतः। नित्यम् अनित्यं च। नित्यं तेज परमाणुरूपम्। अनित्यं तेजः कार्यरूपम्। अनित्यं तेजः शरीरेन्द्रियविषयभेदात् त्रिविधं भवति। तेजोमयं (तैजसम्) शरीरम् आदित्यलोके प्रसिद्धम्। तेजसः इन्द्रियं चक्षुः अस्ति, यच्च रूपग्राहकम् अस्ति। चक्षुर्गोलके कृष्णताराग्रभागे स्थितम् अस्ति। विषयरूपं तेजः चतुर्विधं भवति, भौमम्, दिव्यम् औदर्यम् आकरजं च।

**भौमं तेजः** अग्न्यादिकम्। दिव्यं तेजः अबिन्धनम्। आपः एव इन्धनानि यस्य तत् अबिन्धनं विद्युदादि दिव्यं तेजः।

**औदर्यं तेजः** भुक्तस्य पीतस्य च पदार्थस्य परिपक्वं करोति तत् तेजः जठराग्निरूपम्। आकरजं तेजः सुवर्णादि-खननात् उत्पन्नम्।

**पदकृत्यव्याख्या** – स्पर्शवत्तेजः इति लक्षणं कृतं चेत् जलादौ अतिप्रसक्तिः स्यात्। तद्वारणाय उष्णेति पदं प्रदत्तम्। कालिकसम्बन्धेन कालादौ लक्षणस्य अतिव्याप्तिवारणाय समवायसम्बन्धेन उष्णस्पर्शवत् तेजः इति पदं देयम्। घ्राणादौ अतिव्याप्तिदोषनिवारणाय रूपग्राहकम् इत्युक्तम्। भेदात् इति पदं प्रत्येकम् अभिसम्बध्यते। यथा शरीरभेदात्, इन्द्रियभेदात् विषयभेदात् इति। वह्न्यादिकम् इत्यत्र आदिपदेन खद्योतादिषु स्थितस्य तेजसः ग्रहणम्। विद्युतादि इत्यत्र आदिपदेन सूर्यचन्द्रादीनामपि ग्रहणं भवति। भक्षितस्य अन्नस्य जलस्य वा पाचन-हेतु जठराग्निरूपं तेजः औदर्यम्। सुवर्णादि इत्यत्र आदिपदेन रजतादीनामपि ग्रहणं भवति।

## वायोः लक्षणं कति च भेदाः ?

**रूपरहितस्पर्शवान् वायुः। द्विविधः नित्योऽनित्यश्च। नित्यः परमाणुरूपः अनित्यः कार्यरूपः। पुनःत्रिविधः शरीरेन्द्रियविषयभेदात्। शरीरं वायुलोके। इन्द्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवर्ति। विषयो वृक्षादिकम्पनहेतुः। शरीरान्तः सञ्चारी वायुः प्राणः। स चैकोऽप्युपाधिभेदात् प्राणापानादिसंज्ञां लभते।**

**पदकृत्यम्** – रूपेति। घटादिवारणाय विशेषणम्। आकाशादिवारणाय विशेष्यम्। इन्द्रियमिति। वृक्षेति। आदिपदेन

जलादिपरिग्रहः। शरीरान्तरिति। महावाय्वादौ अतिव्याप्तिवारणाय विशेषणम्। 'मन' आदिवारणाय विशेष्यम्। धनञ्जयवारणाय सञ्चारीति। उपाधीति। मुखनासिकाभ्यां निर्गमनप्रवेशनात् प्राणः। जलादेरधोनयनादपानः। भुक्तपरिमाणाय जठरानलस्य समुन्नयनात् समानः। अन्नादेरूर्ध्वनयनादुदानः। नाडीमुखेषु वितननाद् व्यानः इति क्रियारूपोपाधिभेदात् तथा व्यवह्रियते इत्यर्थः।

**मूलार्थः** - 'रूपरहितत्वे सति स्पर्शवत्त्वम्' वायोर्लक्षणम्। अर्थात् रूपरहितं स्पर्शवद् द्रव्यं वायुः उच्यते। वायुः नित्यः अनित्यः च द्विविधः। नित्यः वायुः परमाणुरूपः अनित्यः वायुः कार्यरूपः। स च शरीरभेदात् इन्द्रियभेदात् च त्रिविधः। शरीरात्मकः वायुः वायुलोके भवति। वायवीयम् (वायुसम्बन्धि) इन्द्रियं त्वक् अस्ति। वायोः विषयः वृक्षादीनां कम्पनहेतुः शरीरान्तःसञ्चारी वायुः प्राणः उच्यते। सः वायुः एकः एव किन्तु क्रियारूपभेदात् प्राणः, अपानः, समानः, उदानः, व्यानः इति शब्दैः पञ्चविधः व्यवह्रियते।

**टिप्पणी -** **'हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले।**

**उदानः कण्ठदेशःस्यात् व्यानः सर्वशरीरगः'॥ (अमरकोशः)**

प्राणवायुः हृदये, अपानवायुः गुह्यदेशे, समानवायुः नाभिप्रदेशे, उदानवायुः कण्ठदेशे व्यानवायुः समस्तशरीरे तिष्ठति।

**पदकृत्यव्याख्या** - वायुलक्षणे रूपरहितविशेषणं न स्यात् तर्हि रूपत्वं घटपटादौ सत्त्वात् तत्र अतिप्रसक्तिवारणाय रूपरहितत्वमिति। स्पर्शमात्रं वायोर्लक्षणं कृतं चेत् पृथिवीजलादौ अतिव्याप्तिः स्यात्। तन्निवारणाय रूपरहितस्पर्शवान् वायुः इति विशेषणम्, स्पर्शमात्रत्वं पृथिव्यादौ सत्वात्। रूपरहितत्वं केवलं वायोर्लक्षणं कृतं चेत् आकाश-कालादौ अपि वायोर्लक्षणस्य अतिव्याप्तिः स्यात्। अतः तन्निवारणाय स्पर्शवत्त्वरूपं विशेष्यदलमस्ति। वृक्षादि इत्यत्र आदिपदेन जलादीनाम् अपि ग्रहणं भवति। जलादीनामपि वायुना संचालनं भवति। बाह्यसंचरणे महावायौ प्राणलक्षणस्य अतिव्याप्तिवारणाय शरीरान्तः इति पदं प्रदत्तम्। शरीरान्तःस्थिते धनञ्जये वायौ अतिप्रसक्तिवारणाय सञ्चारी इति पदम्। धनञ्जयवायुः अन्तः स्थितोऽपि न संचरति। क्रियाभेदात्-मुखनासिकाभ्यां निर्गमन-प्रवेशनाच्च वायुः प्राणः उच्यते। भुक्तस्य अन्नादेः - ऊर्ध्वनयनात् उदानः उच्यते। नाडीषु रसादेः विस्तरणात् व्यानः उच्यते। क्रियारूपेण उपाधिभेदात् तथा व्यवहारः भवति॥

आकाशस्य किं लक्षणं कतिविधं च तत् ?

**शब्दगुणकमाकाशम्। तच्चैकं विभु नित्यं च।**

**पदकृत्यम्** - शब्देति। शब्दो गुणो यस्य तत् तथा। असम्भववारणाय शब्दगुणोभयम्। विभ्विति। सर्वमूर्तद्रव्यसंयोगीत्यर्थः।

**मूलार्थः** - शब्दगुणकं द्रव्यम् आकाशम् उच्यते। तच्च एकं विभु (व्यापकम्) नित्यम् अविनाशि अस्ति। आकाशलक्षणम् - 'शब्दसमवायिकारणत्वम् आकाशत्वम्'। विभुलक्षणम् - 'सर्वमूर्तद्रव्यसंयोगित्वं' विभुत्वम्। विभुषु चत्वारः - आकाशम्, कालः, दिक्, आत्मा। मूर्तलक्षणम्-'क्रियावत्त्वम्'। मूर्तद्रव्याणि - पृथिवी, आपः, तेजः, वायुः, मनः॥

**पदकृत्यव्याख्या** - शब्दः गुणः यस्य तत् इति बहुव्रीहिः। यस्य द्रव्यस्य शब्दः गुणाः यस्मिन् द्रव्ये शब्दो गुणः समवायेन तिष्ठति तद् द्रव्यम् आकाशम् इति उच्यते। असम्भवे अतिव्याप्तिदोषवारणाय शब्दः गुणः इति पदद्वयं प्रदत्तम्। अर्थात् यदि शब्दवत्त्वम् आकाशस्य लक्षणं कृतं चेत् आकाशे शब्दस्य नित्ययोगाभावात् असम्भवदोषः स्यात्। अतः शब्दस्य समवायमात्रत्वस्य उपपत्तये गुणवत्त्वम्। यदि गुणवत्त्वम् आकाशलक्षणं चेदपि असम्भवदोषः स्यात्। शब्दातिरिक्ते आकाशे न कोऽपि गुणः प्रतीयते यः आकाशं परिलक्षयति।

**कालस्य लक्षणम् - अतीतादिव्यवहारहेतुः कालः। स च एको विभुः नित्यः च।**

**पदकृत्यम्** - अतीतेति। अतीत इत्यादिःयो व्यवहारः अतीतः, भविष्यत्, वर्तमानः इत्यात्मकः तस्य असाधारणहेतुः कालः इत्यर्थः। ननु इदं लक्षणम् आकाशेऽतिव्याप्तम् । व्यवहारस्य शब्दात्मकत्वादिति चेत् न। अत्र

हेतुपदेन निमित्तहेतोर्विवक्षिततत्वात्। न च एवमपि - कण्ठताल्वाद्यभिघातेऽतिव्याप्तिरिति वाच्यम्, विभुत्वस्यापि निर्देशात्।

**मूलार्थः** - भूत-भविष्यद्-वर्तमानानां व्यवहारस्य कारणं कालः उच्यते। कालः एकः विभुः (व्यापकः) नित्यः अविनाशी वर्तते।

**पदकृत्यव्याख्या** - अतीतादिना भूतभविष्यद्- वर्तमानकालः गृह्यते। हेतु इत्यनेन असाधारणं कारणम्। काललक्षणस्य अतिव्याप्तिः आकाशे स्यात्। अतीतादिव्यवहारः शब्दरूपः अस्ति, शब्दस्य हेतुः आकाशः भवति इति चेन्न। अत्र हेतुद्वारा निमित्तकारणं विवक्षितमस्ति। आकाशस्तु शब्दस्य समवायिकारणं वर्तते।

कण्ठताल्वादेः अभिघातः (अयमतीतः इत्यादि) शब्दरूपवाक्यव्यवहारस्य निमित्तकारणम् अस्ति अतः तत्र काललक्षणस्य अतिव्याप्तिः भविष्यति इति न शङ्क्यम्। काललक्षणे विभुत्वस्यापि सन्निवेशात् कण्ठताल्वभिघातो न अतिव्यातिः॥

दिशः किं लक्षणं ? कतिविधा च सा ?

**प्राच्यादिव्यवहारहेतुर्दिक्। सा चैका नित्या विभ्वी च।**

**पदकृत्यम्** - प्राचीति। इयं प्राची, इयमवाची, इयं प्रतीची, इयमुदीची इत्यादिव्यवहारासाधारणकारणं दिग् इत्यर्थः। हेतुः दिगित्युच्यमाने परमाण्वादौ अतिव्याप्तिः स्यात्। तद्वारणाय प्राच्यादिव्यवहारहेतुरिति। आकाशादिवारणाय असाधारणेत्यपि बोध्यम्।

**मूलार्थः** - प्राची-एषा पूर्वदिशा, इयं प्रतीची-एषा पश्चिमदिशा, इयम् उदीची - एषा उत्तरदिशा, इयम् अवाची एषा दक्षिणदिशा इति व्यवहारस्य असाधारणं कारणं दिग् इति कथ्यते। दिक् एका नित्या विभ्वी च अस्ति।

**पदकृत्यव्याख्या** - हेतुर्दिग् इत्युच्यमाने परमाण्वादौ अतिव्याप्तिवारणाय प्राच्यादिव्यवहारहेतुरिति। परमाणुः प्राच्यादिव्यवहारस्य असाधारणं कारणं दिग् उच्यते। आकाशादिस्तु कार्यमात्रस्य साधारणं कारणम् अस्ति।

आत्मनः किं लक्षणं कतिविधश्च सः ?

**ज्ञानाधिकरणमात्मा। स द्विविधः जीवात्मा परमात्मा चेति। तत्रेश्वरः सर्वज्ञः परमात्मा एक एव। जीवस्तु प्रतिशरीरं भिन्नो विभुर्नित्यश्च।**

**पदकृत्यम्** - ज्ञानाधिकरणमस्ति। भूतलादिवारणाय ज्ञानेति। कालादिवारणाय समवायेन इत्यपि देयम्। ईश्वरः इति। समवायसम्बधेन नित्यज्ञानवान् ईश्वरः। जीवः इति। सुखादिसमवायिकारणं जीवः इत्यर्थः।

**मूलार्थः** - ज्ञानस्य आश्रयः आत्मा कथ्यते। सः आत्मा द्विविधः जीवात्मा, परमात्मा च इति। तत्र द्वयोः मध्ये परमात्मा - ईश्वरः समर्थः सर्वज्ञः, एकः एव अस्ति। जीवात्मा तु प्रतिदेहं भिन्नः अस्ति। जीवात्मा-विभुः (व्यापकः) नित्यः अविनाशी च वर्तते।

**पदकृत्यव्याख्या** - आश्रयभूतं तु भूतलमपि अस्ति। तत्र अतिव्याप्तिवारणाय ज्ञानाधिकरणमित्युक्तम्। भूतलं न ज्ञानाधिकरणम्। कालादौ अतिव्याप्तिवारणाय समवायेन ज्ञानाधिकरणम् आत्मा इति। समवायेन इति पदं योज्यम्। समवायसम्बन्धेन नित्यज्ञानवान् ईश्वरः अस्ति। जीवस्तु सुखादिसमवायिकारणम् अस्ति।

**टिप्पणी** - संयोगसम्बन्धः पृथक्-सद्द्रव्ययोरेव भवति। यथा घटः संयोगेन भूतले वर्तते। समवायसम्बन्धश्च गुणगुणिनोः अवयवावयविनोः, क्रियाक्रियावतोः जातिजातिमतोः, नित्यद्रव्य-विशेषयोः च भवति। गुणगुणिनोः यथा नीलरूपं घटे समवायेन वर्तते। अवयवावयविनोः घटकपालयोः यत् तन्तुषु समवायसम्बन्धेन वर्तते। क्रियाक्रियावतोः गमनक्रिया अश्वे समवायेन वर्तते। जातिजातिमतोः - घटत्वं जातिः समवायेन घटे अस्ति। नित्यद्रव्यविशेषयोः षष्ठपदार्थः विशेषः समवायेनैव नित्यद्रव्येषु वर्तते।

**मनसः लक्षणम् - सुखाद्युपलब्धिसाधनम् इन्द्रियं मनः।**

तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यञ्च।

**पदकृत्यम्** - सुखेति। आत्मनः संयोगादिवारणाय इन्द्रियम् इति।

चक्षुरादिवारणाय सुखेति।

**मूलार्थः** - सुखदुःखादीनां प्राप्तिसाधनं मनः उच्यते। तन्मनः प्रत्येकस्मिन् आत्मनि नियततया विद्यमानत्वाद् अनन्तम् अस्ति। तन्मनः परमाणुरूपं नित्यं च वर्तते।

**पदकृत्यव्याख्या** - सुखदुःखादीनां साक्षात्कारसाधनम् इन्द्रियं मनः अर्थात् सुखदुःखादिसाक्षात्कारस्य कारणत्वेऽपि इन्द्रियत्वं मनसः लक्षणम् अस्ति। अत्र लक्षणे इन्द्रियत्वमात्रम् उच्यते चेत् चक्षुरादौ मनसः लक्षणम् अतिव्याप्तं स्यात् तन्निवारणाय सुखदुःखादिसाक्षात्कारकारणत्वमिति विशेषणम् अस्ति। यदि इन्द्रियत्वरूपं विशेष्यं न प्रदत्तं चेत् आत्मन अपि मनसः लक्षणम् अतिव्याप्तं भवेत् यतो हि आत्मा सुखदुःखादिकं प्रति समवायिकारणत्वात् सुखादीनां साक्षात्कारे हेतुः भवत्येव। इति अतिव्याप्तिदोष-वारणाय इन्द्रियत्वरूपं विशेष्यपदम्।

आत्मा न इन्द्रियम्॥

चक्षुरादौ अतिव्याप्तिवारणाय सुखदुःखाद्युपलब्धिसाधनम्।

इति न हि चक्षुः सुखदुःखादीनाम् उपलब्धिसाधनम्॥

## गुणलक्षणप्रकरणम् -

रूपस्य किं लक्षणं ? कतिविधं च तत् ?

**चक्षुर्मात्रग्राह्यो गुणो रूपम्। तच्च शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात् सप्तविधम्। पृथिवी जलतेजोवृत्ति तत्र पृथिव्यां सप्तविधम्। अभास्वरशुक्लं जले भास्वरशुक्लं तेजसि।**

**पदकृत्यम्** - चक्षुरिति। रूपादिवारणाय गुणपदम्। रसादिवारणाय चक्षुर्ग्राह्य इति। संख्यादिवारणाय मात्रपदम्। यद्यपि प्रभाभित्तिसंयोगवारणाय गुणपदेन विशेषगुणस्य विवक्षणीयतया तत एव संख्यादिवारणं सम्भवतीति मात्रं पदं व्यर्थम्। तथापि सांसिद्धिकद्रवत्ववारणाय तद् आवश्यकम्। वस्तुतस्तु परमाणुरूपेऽव्याप्तिवारणाय चक्षुर्मात्रग्राह्यजातिमत्त्वेन विवक्षणीयतया विशेषपदं देयम्। त्र्यणुकादिवारणाय गुणपदं तु देयमेव। सप्तेति रूपमित्यनुषज्यते।

**मूलार्थः** - चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वे सति चक्षुर्भिन्नेन्द्रियजन्यप्रत्यक्षाविषयत्वं रूपस्य लक्षणम्। रूपम्- शुक्लं, नीलं, पीतं, रक्तं, हरितं, कपिशं, चित्रम् इति भेदात् सप्तसंख्याकम्। रूपं पृथिव्यां जले तेजसि च तिष्ठति। पूर्वोक्तानि शुक्ल-नीलादिसप्तरूपाणि पृथिव्यामेव तिष्ठन्ति। जले अभास्वरं-चाकचक्यरहितं शुक्लं तिष्ठति।

**पदकृत्यव्याख्या** - यः पदार्थः येन इन्द्रियेण ग्राह्यः भवति तद्गता जातिरपि तेनैव इन्द्रियेण ग्राह्या भवति। अतः रूपत्वजातिरपि चक्षुर्मात्रग्राह्यत्वात् रूपत्वे रूपलक्षणस्य अतिव्याप्तिवारणाय गुणपदम्। लक्षणे चक्षुर्मात्रग्राह्यत्वं विशेषणं, गुणत्वं च विशेष्यमात्रोपादाने रसादौ अतिव्याप्तिः। अतः चक्षुर्मात्रग्राह्यत्वं विशेषणम्। रसादेः रसनेन्द्रियग्राह्यत्वेन चक्षुर्ग्राह्यत्वाभावात्। मात्रपदानुपादाने संख्यादिसामान्यगुणे अतिव्याप्तिः। चक्षुर्ग्राह्यत्वविशिष्टगुणत्वस्य तत्रापि सत्त्वात्। अतः तद्वारणाय मात्रपदम्। संख्यादेः चक्षुर्भिन्नत्वगिन्द्रियग्राह्यत्वात् चक्षुर्मात्रग्राह्यत्वं नास्ति। न तु प्रभाघटसंयोगे रूपलक्षणस्य अतिव्याप्तिः, तस्य चक्षुर्मात्रग्राह्यगुणत्वादिति चेन्न, लक्षणे गुणपदस्य विशेषणपरकत्वात् न दोषः संयोगः न विशेषगुणः। न च लक्षणे विशेषगुणत्वनिवेशात् संख्यादिसामान्यगुणे नातिव्याप्तिः। चक्षुर्ग्राह्यत्वम् इत्यनेन सिद्धेः मात्र पदं व्यर्थम् इति वाच्यम्, जलमात्रवृत्तौ सांसिद्धिकद्रवत्वे रूपलक्षणस्य अतिव्याप्तिदोषवारणाय मात्रपदस्य आवश्यकत्वात्। चक्षुर्मात्रग्राह्यजातित्वं त्र्यणुकेऽपि सत्त्वात् रूपलक्षणस्य अतिप्रसक्तिवारणाय गुणपदोपोदानम् आवश्यकम्।

रसस्य किं लक्षणं कतिविधश्च सः ? -

**रसनाग्राह्यो गुणो रसः। स च मधुराम्ललवणकटुकषायतिक्तभेदात् षड्विधः। पृथिवीजलवृत्तिः। तत्र पृथिवीजलयोरित्यर्थः। षड्विध इति। अत्र रस इत्यनुवर्तते।**

**पदकृत्यम्** - रसनेति। रसत्वादिवारणाय गुण इति। रूपादावतिव्याप्तिवारणाय रसनेति। पृथिनीजलयोरित्यर्थः। षड्विध इति। अत्र रस इत्यनुवर्तते।

**मूलार्थः** - चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वे सति गुणत्वम् रसत्वम्। सः रसः मधुरः आम्लः, लवणः, कटुः, कषायः, तिक्तः इति षड्विधः भवति। रसगुणः पृथिव्यां जले च तिष्ठति। पृथिव्यां षड् रसाः भवन्ति। जले तु केवलं मधुररसः एव वर्तते।

**पदकृत्यव्याख्या** - रूपवद् रसादेः लक्षणे विशेषणाभावात् लक्ष्येतरे गुणे अतिव्याप्तिः स्यात्। विशेष्याभावाद् लक्ष्यमात्रे रसत्वगन्धत्वजातौ रसादिलक्षणस्य अतिव्याप्तिः स्यात्। अतः रसादीनां लक्षणे विशेषणविशेष्ययोः द्वयोरपि उपादानमावश्यकम्। अत्र रसत्वादौ जातौ रसलक्षणस्य अतिव्याप्तिवारणाय रसनाग्राह्यो गुणः इति गुणपदम्। रूपादौ अतिव्याप्तिवारणाय रसनाग्राह्य इति। न हि रूपादयः रसनेन्द्रियग्राह्याः। अपि तु ते चक्षुरिन्द्रियग्राह्याः। पृथिवीजलवृत्तिः अर्थात् पृथीवीजलयोः वर्तते इत्यर्थः।

गन्धस्य किं लक्षणं कति च भेदाः ?

**घ्राणग्राह्यो गुणो गन्धः। स द्विविधः सुरभिरसुरभिश्च। पृथिवीमात्रवृत्तिः।**

**पदकृत्यम्** - घ्राणेति। गन्धत्वादावतिव्याप्तिवारणाय गुण इति। रूपादावतिव्याप्तिवारणाय घ्राणग्राह्य इति। पृथिवीति। पृथिवीसम्बन्धसत्वे गन्धप्रतीतिसत्त्वम्, पृथिवीसम्बन्धाभावे गन्धप्रतीत्यभाव इत्यन्वयव्यतिरेकाभ्यां पृथिवीगन्धस्यैव जले प्रतीतिबोर्ध्या। एवं वायावपि। ननु देशान्तरस्थकस्तूरी-कुसुमसम्बद्धपवनस्य एतद्देशे असत्त्वात् तत्सम्बन्धाभावात् गन्धवतीत्यनुपपत्तिः। न च वाखानीतत्र्यणुकादिसम्बन्धोऽस्त्येव इति वाच्यम्, कस्तूर्या न्यूनापत्तेः कुसुमस्य च सच्छिद्रत्वापत्ते इति चेत् न। भोक्त्रदृष्टविशेषेण पूर्ववत् त्र्यणुकान्तराद्युपपत्तेः। कर्पूरादौ तु तदभावान्न तथात्वम् इति।

**मूलार्थः** - घ्राणेन्द्रियेण ग्राह्यः गुणः गन्धः उच्यते। तस्य द्वौ भेदौ स्तः। सुरभिः (गन्धः) असुरिभः (दुर्गन्धः)। घ्राणेन्द्रियजन्यप्रत्यक्षविषयत्वे सति गुणत्वं गन्धस्य लक्षणम्। गन्धः पृथिव्यामेव तिष्ठति।

**पदकृत्यव्याख्या** - 'यः पदार्थः येन इन्द्रियेण ग्राह्यः भवति तद्गता जातिरपि.' इत्यादिनियमबलेन गन्धत्वादिजातौ गन्धलक्षणस्य अतिव्याप्तिवारणाय घ्राणग्राह्यो गुणः इति गुणपदम्। पृथिव्याः सम्बन्धे सति गन्धस्य प्रतीतिः पृथिव्याः सम्बन्धाभावे गन्धस्य अप्रतीतिः इति अन्वयव्यतिरेकनियमबलेन जले अनुभूयमानः गन्धः पृथिव्याः एव इति ज्ञेयः। एवं वायौ अपि अनुभूयमानः गन्धः पृथिव्याः एव। तथापि देशान्तरस्थितकस्तूरीकुसुमसम्बन्धवायोः कारणतः प्रतीयमानः गन्धः न स्यात्, यतो हि कुसुमादीनां सम्बन्धः गन्धप्रतीतिस्थाने नास्ति। वायुद्वारा नीयमानस्य कुसुमस्य त्र्यणुकसम्बन्धः तत्रापि अस्त्येव इति वाच्यम्, त्र्यणुके निर्गते कस्तूर्यां न्यूनतापत्तेः, कुसुमे च छिद्रत्वापत्तेः इति चेन्न, भोक्तुः अदृष्टविशेषात् कस्तूर्यादौ त्र्यणुकान्तः न्यूनता स्यात्।

**स्पर्शस्य लक्षणं भेदाश्च - त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः। स च त्रिविधः - शीतोष्णानुष्णाशीतभेदात्। पृथिव्यप्तेजोवायुवृत्तिः।**

**तत्र शीतो जले, उष्णस्तेजसि, अनुष्णाऽशीतः पृथिवीवाय्वोः।**

**पदकृत्यम्** - त्वगिन्द्रियेति। स्पर्शत्वादावतिव्याप्तिवारणाय गुण इति। रूपादावतिव्याप्तिवारणाय त्वगिन्द्रीयेति। सङ्ख्याऽदिवारणाय च मात्रपदम्। तत्रेति। पृथिव्यादिचतुष्टये। शीत इति। शीतः स्पर्शः। उष्ण इति। उष्णः स्पर्शः।

**मूलार्थः** - स्पर्शस्य लक्षणं त्वगिन्द्रियमात्रग्राह्यत्वे सति गुणत्वं स्पर्शत्वम्। त्वगिन्द्रियमात्रेण ग्राह्यत्वे सति गुणत्वं स्पर्शत्वम्। त्वगिन्द्रियमात्रेण ग्राह्यः गुणः स्पर्शः उच्यते। शीतः उष्णः अनुष्णाऽशीतः इति भेदात् स्पर्शः त्रिविधः। स्पर्शः पृथिव्यां, जले, तेजसि, वायौ च वर्तते। तत्र त्रिषु शीतः स्पर्शः जले, उष्णः स्पर्शः तेजसि, अनुष्णाऽशीतः (न उष्णः न शीतः) स्पर्शः पृथिव्यां वायौ च भवति।

**पदकृत्यव्याख्या** - स्पर्शत्वादिजातौ-स्पर्शलक्षणस्य अतिव्याप्तिवारणाय गुणः इति पदम्। रूपादौ अतिव्याप्तिवारणाय त्वगिन्द्रियेति। नहि रूपादयः त्वगिन्द्रियेण ग्राह्याः। संख्यादिसामान्यगुणेषु अतिव्याप्तिदोषवारणाय

मात्रपदम्। 'तत्र' इत्यनेन पृथिवी, जलं, तेजः, वायुः, इति चतुर्षु इत्यर्थः। शीत इत्यनेन शीतः इति। उष्ण इत्यनेन उष्णः स्पर्श इति ज्ञेयः।

**टिप्पणी** – स्पर्शलक्षणे यदि मात्रपदं न योज्यते तदा त्वगिन्द्रियग्राह्यत्वविशिष्टगुणत्वमेव स्पर्शलक्षणं स्यात्। तथा च संख्यायाः अपि त्वगिन्द्रियग्राह्यगुणत्वमस्ति। यतो हि नेत्रे उन्मिल्य स्पर्शद्वारा अपि द्वौ त्रयः वा घटाः इति ज्ञानं जायते एव। तस्मात् संख्यायामुक्तलक्षणस्य अतिव्याप्तिः। अतः मात्रपदं देयम्। तथा सति नातिव्याप्तिः, तस्याः चक्षुषा अपि ग्राह्यत्वेन त्वगिन्द्रियमात्रग्राह्यत्वाभावात्॥

रूपादिचतुष्टयं कुत्र पाकजमपाकजं वा कुत्र ?

**रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च। अन्यत्रापाकजं नित्यमनित्यं च। नित्यगतं नित्यम्। अनित्यगतमनित्यम्।**

**अर्थः** – पाकः विजातीयतेजःसंयोगः। स च नानाजातीयरूपजनकः विजातीयतेजःसंयोगः। तदपेक्षया रसजनकः विजातीयः। एवं गन्धजनकः अपि ततः विजातीयः एवं स्पर्शजनकोऽपि तथैव। एवं प्रकारेण भिन्नभिन्नजातीयाः पाकाः कल्पनीयाः। तथा तृणपुञ्जनिक्षिप्ते आम्रादौ फले। उष्णनामकविलक्षणतेजःसंयोगात् पूर्वरूपनाशेन (आम्रे यत् पूर्वरूपं हरितवर्णः तस्य नाशेन) रूपान्तरस्य पीतादेरुत्पत्तिः भवति। किन्तु रसन्तु सः आम्लः तिष्ठति। आम्रे एतादृशः तेजः संयोगः जातः येन केवलं रूपमेव परिवर्तितम्। रसस्तु आम्लः एव। तस्माद् रूपादिजनकाः विजातीयाः एव पाकाः।

रूपं रसः गन्धः स्पर्शः च चत्वारः गुणाः पृथिव्यः पाकजाः (पाकसमुत्पन्ना) अनित्याः सन्ति। तत्र तेजसः संयोगात् समुत्पन्नाः भवन्ति। जलतेजसी विना पाकेन नित्ये अनित्ये च भवतः। परमाणौ रूपादिनित्यम्। घटादौ रूपादि अनित्यम् अस्ति।

पृथिव्याः भिन्नाश्रये रूपादि अपाकजम् वर्तते। नित्यम् अनित्यं च भवति।

**संख्यायाः लक्षणम्** –

एकत्वादिव्यवहारहेतुः संख्या। सा नवद्रव्यवृत्तिः।

**एकत्वादिपरार्धपर्यन्ता। एकत्वं नित्यम् अनित्यत्यं च।**

**नित्यगतं नित्यम् अनित्यगतम् अनित्यम्। द्वित्वादिकं तु सर्वत्रानित्यमेव।**

**पदकृत्यम्** – एकत्वादीति। एकत्वमित्यादिः यो व्यवहारः एको द्वावित्यात्मकः तस्य हेतुः सङ्ख्या इत्यर्थः। घटादिवारणाय एकत्वादीति। कालादिवारणायासाधारणेत्यपि देयम्। ननु संख्या अवधिरस्ति नवेत्याह–एकत्वादीति। तथा च –

**एकं दश शतं चैव सहस्रमयुतं तथा।**
**लक्ष्यं च नियुतं चैव कोटिरर्बुदमेव च॥**
**वृन्दं खर्वो निखर्वश्च शङ्खः पद्मश्च सागरः।**
**अन्त्यं मध्यं परार्धं च दशवृद्धया यथाक्रमम्।**

इति महदुक्तेः परार्धपर्यन्तैव संख्या इति भावः॥

**मूलार्थः** – एकत्वं द्वित्वं त्रित्वम् इत्यादिव्यवहारकारणं गुणः संख्या उच्यते। सा संख्या पृथिव्यादिषु नवद्रव्येषु तिष्ठति। एकत्वादारभ्य परार्धपर्यन्ता।

एकत्वसंख्या नित्या अनित्या च। परमाणुरूपे द्रव्ये नित्या। कार्यरूपा अनित्या भवति। यतो हि द्वित्वादिसंख्या अपेक्षाबुद्धिजन्या भवति।

**पदकृत्यव्याख्या** – संख्यायाः लक्षणे घटादौ अतिव्याप्तिवारणाय एकत्वादिव्यवहारः इति। कालादौ अतिव्याप्तिवारणाय एकत्वादिव्यवहारासाधारणहेतुः इति असाधारणम् इत्यादि पदं देयम्। संख्यायाः अवधिः अस्ति न वा ? इति प्रश्ने उच्यते एकत्वादिव्यवहारः इति।

टिप्पणी – संख्यायाः लक्षणम् – एकत्वादिव्यवहारसाधारणकारणत्वे सति गुणत्वं संख्यात्वम्। एकम् – 1, दश- 10, शतम् $10^2$ सहस्रम् $10^3$, अयुतम् $10^4$, लक्ष्यम् $10^5$, नियुतम् $10^6$, कोटि $10^7$, अर्बुदम् $10^8$, वृन्दम् $10^9$, खर्वः $10^{10}$, निखर्वः $10^{11}$, शङ्खः $10^{12}$, पद्मः $10^{13}$, सागरः $10^{14}$, अन्त्यम् $10^{15}$, मध्यम् $10^{16}$, परार्धम् $10^{17}$, अनेन प्रकारेण संख्यायाः अवधिरस्ति॥

परिमाणस्य लक्षणं तद्भेदाश्च – मानव्यवहारासाधारणं कारणं परिमाणम्। नवद्रव्यवृत्ति। तच्चतुर्विधम् – अणु, महत्, दीर्घं, ह्रस्वं चेति।

**पदकृत्यम्** – मानेति मानं – परिमितिः तस्य व्यवहारः – इदं महदिदमणु इत्याद्यात्मकः तस्य कारणं परिमाणमिति। दण्डादिवारणाय मानेति। कालादिवारणाय असाधारणेति। शब्दत्ववारणाय कारणमिति। नवद्रव्येति। चतुर्विधमपि परममध्यमभेदेन द्विविधम्। तत्र परमाणुश्चस्वत्वे परमाणुमनसोः मध्यमाणुह्रस्वत्वेह्णुके। परममहत्त्वदीर्घत्वं गगनादौ। मध्यममहत्त्वदीर्घत्वे घटादौ। एतन्मौक्तिकादिदं मौक्तिकम् अणु इति व्यवहारस्य अपकृष्टमहत्वाश्रयत्वाद् गौणत्वं बोध्यम्। एवमेव कैतनाद् व्यजनं ह्रस्वमित्यत्रापि निकृष्टदीर्घत्वाद् गौणत्वम्।

**मूलार्थः** – मानव्यवहारस्य असाधारणकारणं परिमाणम्। तद् नवद्रव्येषु तिष्ठति। अणु सूक्ष्मं, महत् स्थूलं, दीर्घं- लम्बं, ह्रस्वं-लघु इति परिमाणस्य चत्वारः भेदाः भवन्ति।

**पदकृत्यव्याख्या** – एतत् स्थूलम् एतद्-सूक्ष्मम्, एतत् दीर्घम्, एतद् ह्रस्वम् इति च व्यवहारः तस्य कारणं परिमाणम् उच्यते। मीयते अनेन इति मानं परिमितिः, परितः मीयते द्रव्यपदार्थः अनेन इति परिमाणम्। दण्डादौ परिमाणलक्षणस्य प्रसक्तिवारणाय मानव्यवहारेति। परिमाणलक्षणे कालादौ अतिव्याप्तिवारमणाय असाधारणमिति साधारणं कारणं तु कालादौ अतिव्याप्तिवारणाय असाधारणमिति, साधारणं कारणं तु कालादावपि स्यात्। शब्दत्वे परिमाणलक्षणं कारणं न भवति। परिमाणं चतुर्विधम् अपि परममध्यमभेदेन पुनः द्विविधम् तत्र परमाणौ ह्रस्वत्वे परमाणुमनसोः। मध्यमाणौ ह्रस्वद्व्यणुके। परममध्यमयोः दीर्घत्वे आकाशादौ। मध्यममहत्त्वे दीर्घत्वं च घटादौ। एतस्माद् मौक्तिकात् इदं मौक्तिकम् अणु (सूक्ष्मम्) इति व्यवहारस्य अपकृष्टमहत्वाश्रयत्वात् गौणत्वं बोध्यम्। एवं रीत्या केतनात् व्यजनं ह्रस्वम् इत्यपि निकृष्टदीर्घत्वात् गौणत्वम्॥

**पृथक्त्वलक्षणम् – पृथग्व्यवहारासाधारणं कारणं पृथक्त्वम्। सर्वद्रव्यवृत्ति।**

**पदकृत्यम्** – पृथगिति। अयमस्मात् पृथगिति यो व्यवहारः तस्य कारणं पृथक्त्वमित्यर्थः। दण्डादिवारणाय पृथगित्यादि। कालादिवारणाय असाधारणेति। पृथग्व्यवहारवारणाय कारणमिति।

**मूलार्थः** – पृथक्त्वस्य लक्षणम् पृथग्व्यवहारस्य असाधारणकारणत्वं पृथक्त्वम्। पृथग्व्यवहारस्य असाधारणं कारणं पृथक्त्वम् उच्यते॥ तत् पृथक्त्वं सर्वद्रव्येषु तिष्ठति।

**पदकृत्यव्याख्या** – पृथक्त्वम्-अयम् अस्माद् पृथक् इति यः व्यवहारः तस्य कारणं पृथक्त्वम् इत्यर्थः। दण्डादौ पृथक्त्वलक्षणस्य अन्यत्र अतिप्रसक्तिवारणाय पृथगिति। कालादौ पृथक्त्वलक्षणस्य अतिव्यातिवारणाय असाधारणं कारणमिति पृथक्त्वे अतिप्रसक्तिवारणाय कारणमिति॥

**संयोगस्य लक्षणम्** – संयुक्तव्यवहारहेतुः संयोगः। सर्वद्रव्यवृत्तिः।

**पदकृत्यम्** – संयुक्तेति। 'इमौ संयुक्तौ' इति यो व्यवहारः तस्य हेतुः संयोगः इत्यर्थः। दण्डादौ अतिव्याप्तिवारणाय संयुक्तव्यवहारेति कालादिवारणाय असाधारणेत्यपि देयम्।

संयुक्तव्यवहारत्वेऽतिप्रसक्तिवारणाय हेतुरिति। उपदर्शित-चतुष्टये असाधारणपदं देयम्। क्वचित्पुस्तके – परिमाणपृथक्त्वलक्षणे ईश्वरेच्छादिवारणाय असाधारणेति दृश्यते तत्तु आधुनिकैर्निरस्तमिति बोध्यम्।

**मूलार्थः** – संयुक्तव्यवहारस्य हेतुः गुणः संयोगः उच्यते। सः सर्वद्रव्येषु तिष्ठति।

**पदकृत्यव्याख्या** – एतौ संयुक्तौ (मिलितौ) इति व्यवहारस्य कारणं संयोग इति। दण्डादौ संयोगलक्षणस्य अतिव्याप्तिवारणाय संयुक्तव्यवहारः इति। न हि दण्डादौ संयुक्तव्यवहारः भवति। कालादौ अतिव्याप्तिवारणाय

असाधारणं कारणम्। संयुक्तत्वे एव संयोगलक्षणस्य अतिप्रसक्तिवारणाय हेतुः इति। कुत्रचित् पुस्तके परिमाणलक्षणे पृथक्त्वलक्षणे च ईश्वरेच्छादिवारणायासाधारणेति दृश्यते। तद् आधुनिकैः खण्डितम्॥

विभागलक्षणम् – संयोगनाशको गुणो विभागः। सर्वद्रव्यवृत्तिः।

**पदकृत्यम्** – संयोगेति। संयोगनाशजनकः इत्यर्थः। कालेऽतिप्रसक्तिवारणाय गुणपदम्। ईश्वरेच्छादिवारणाय असाधारणेत्यपि देयम्। ननु असाधारणपदोपादाने गुणपदस्य वैयर्थ्यं स्यादिति चेन्न, क्रियायामतिप्रक्तिवारणाय तस्यापि आवश्यकत्वात्।

**मूलार्थः** – संयोगस्य नाशकः गुणः विभागः उच्यते। विभागः सर्वेषु द्रव्येषु वर्तते।

**पदकृत्यव्याख्या** – संयगनाशकत्वे सति गुणवत्वं विभागस्य लक्षणम्। विभागलक्षणे विशेषमात्रे उच्यमाने क्रिया संयोगविनाशिका भवति। अतः तत्र विभागलक्षणस्य अतिव्याप्तिः स्यात्। तन्निवारणाय गुणत्वं विशेष्यपदम्। क्रियायां गुणत्वधर्माभावात् न अतिव्याप्तिः।

परत्वापरत्वयोः किं लक्षणं के च भेदाः ?

परापरव्यवहारासाधारणकारणे परत्वापरत्वे। पृथिव्यादिचतुष्टयमनोवृत्तिनी। ते च द्विविधे। दिक्कृते कालकृते चेति। दूरस्थे दिक्कृतं परत्वम्। समीपस्थे दिक्कृतमपरत्वम्। ज्येष्ठे कालकृतं परत्वम्, कनिष्ठे कालकृतमपरत्वम्।

**पदकृत्यम्** – परेति। परव्यवहारासाधारणं कारणं परत्वम्। अपरव्यवहारासाधारणं कारणमपरत्वम् इत्यर्थः। दण्डादिवारणाय परव्यवहारेति। कालादिवारणायासाधरणेति। परव्यवहारत्ववारणाय कारणमिति। एवमेव द्वितीयं बोध्यम्।

**मूलार्थः** – एतत् एतस्मात् परम्, एतत् एतस्मात् अपरम् एवं प्रकारकः व्यवहारः क्रमशः परत्वम् अपरत्वं च उच्यते। द्वे अपि पृथिव्यां जले तेजसि, वायौ मनसि च तिष्ठतः। परत्वम् अपरत्वं च द्विविधम् अस्तिः। दिक्कृतं कालकृतं च। दूरस्थे पदार्थे दिक्कृतं परत्वम् अस्ति। निकटस्थे पदार्थे दिक्कृतम् अपरत्वम् अस्ति। ज्येष्ठे कालकृतं परत्वम् अस्ति। कनिष्ठे कालकृतम् अपरत्वम् अस्ति।

**पदकृत्यव्याख्या** – परत्वस्य लक्षणं – परव्यवहारासाधारणं कारणं परत्वम्। अपरत्वस्य लक्षणम् अपरव्यवहारासाधारणं कारणम् अपरत्वम्।

दण्डादौ परत्वापरत्वयोः लक्षणे प्रसक्तिवारणाय परव्यवहारेति वा अपरव्यवहारेति पदे प्रदत्ते।

कालादौ अतिव्याप्तिदोषवारणाय असाधारणं कारणम् इति असाधारणेति पदं प्रदत्तम्। परव्यवहारत्वे परत्व लक्षणस्य अतिव्याप्तिवारणाय कारणपदम् उपात्तम्।

गुरुत्वस्य किं लक्षणम् ?

**आद्यपतनासमवायिकारणं गुरुत्वम्। पृथिवीजलवृत्ति। पदकृत्यम् – आद्येति। दण्डादिवारणाय असमवायेति। रूपादिवारणाय पतनेति। वेगे अतिव्याप्तिवारणाय आद्येति।**

**मूलार्थः** – प्रथमपतनस्य असमवायिकारणं गुरुत्वमुच्यते। गुरुत्वं पृथिव्यां जले च तिष्ठति।

**पदकृत्यव्याख्या** – दण्डादौ अतिप्रसक्तिनिरासाय 'असमवायिकारणमि'ति प्रदत्तम्। रूपादौ अतिव्याप्तिवारणाय 'आद्यपतनमि'ति पतनपदम्।

द्वितीयपतनक्रियायां वेगस्य असमवायिकरणत्वात्तत्र अतिव्याप्तिवारणाय 'आद्ये'ति विशेषणम्।

द्रवत्वस्य किं लक्षणं के च भेदाः ?

**आद्यस्यन्दनासमवायिकारणं द्रवत्वम्। पृथिवीतेजोवृत्तिः। तद् द्विविधम् सांसिद्धिकं नैमित्तिकं च। सांसिद्धिकं जले, नैमित्तिकं पृथिवीतेजसोः। पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वम्। तेजसि सुवर्णादौ।**

**पदकृत्यम्** - आद्यस्यन्दनेति। दण्डादिवारणाय असमवायीति। रसादिवारणाय स्यन्दनेति।

**मूलार्थः** - प्रथमस्यन्दस्य असमवायिकारणं द्रवत्वं भवति।

द्रवत्वम् - पृथिव्यां, जले, तेजसि च तिष्ठति। द्रवत्वं सांसिद्धिके (स्वाभाविकम्) पृथिव्यां तेजसि च द्रवत्वं नैमित्तिकम् (निमित्ताद् उत्पन्नमिति)।

**पदकृत्यव्याख्या** - द्रवत्वस्य लक्षणे दण्डादौ अतिप्रसक्तिवारणाय असमवायिकारणं द्रवत्वमिति। रसादौ द्रवत्वस्य लक्षणे अतिप्रसक्तिवारणाय आद्यस्यन्दनेति स्यन्दनं पदं प्रदत्तम्।

स्नेहस्य किं लक्षणं, कुत्र च सः ?

**चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः। जलमात्रवृत्तिः।**

**पदकृत्यम्** - चूर्णादीति। चूर्णं पिष्टं तदेवादिर्यस्य मृत्तिकादेः स चूर्णादिस्तस्य पिण्डीभावः संयोगविशेषस्तस्य हेतुर्निमित्तकारणं स्नेह इत्यर्थः। कालादावतिव्याप्तिवारणाय गुणपदम्। रूपादावतिव्याप्तिवारणाय पिण्डीभावेति। चूर्णपदं - स्पष्टार्थम्।

**मूलार्थः** - चूर्णादेः धारणाकर्षणादिसम्पादके संयोगे कारणीभूतः गुणः स्नेहः कथ्यते।

सः स्नेहः गुणः केवलं जले एव तिष्ठति।

**स्नेहस्य लक्षणम्** - 'चूर्णादिपिण्डीभावाऽसाधारणनिमित्तहेतुत्वे सति गुणत्वमिति' स्नेहस्य लक्षणम्। चूर्णं नाम पिष्टं तदेव आदिः यस्य मृदादेः सः चूर्णादिः तस्य धारणाऽऽकर्षणहेतुभूतः विलक्षणसंयोगः पिण्डीभावः, तस्य निमित्तकारणं स्नेहः इति। कालादौ स्नेहलक्षणस्य अतिप्रसक्तिर्न भवेत् तदर्थं गुणपदम्। न हि कालादिः गुणः। रूपादीनां पिण्डीभावो न भवति, अतः तत्र अतिव्याप्तिनिरासाय 'पिण्डीभावः' इति पदम्।

शब्दस्य किं लक्षणं कुत्र च सः ?

**श्रोत्रग्राह्यो गुणः शब्दः। आकाशमात्रवृत्तिः। सः द्विविधः।**

**ध्वन्यात्मको वर्णात्मकश्च। तत्र ध्वन्यात्मको भेर्यादौ। वर्णात्मकः संस्कृतभाषादिरूपः।**

**पदकृत्यम्** - श्रोत्रेति। शब्दत्वातिव्याप्तिवारणाय गुण इति। रूपादिवारणाय श्रोत्रग्राह्य इति। वस्तुतस्तु श्रोत्रोत्पन्नशब्दस्यैव श्रोत्रग्राह्यत्वेन तद्भिन्ने अव्याप्तिवारणाय श्रोत्रग्राह्यजातिमत्वे तात्पर्याद् गुणपदमनुपादेयमेव।

**मूलार्थः** - 'श्रवणेन्द्रियजन्यप्रत्यक्षविषयत्वे सति गुणत्वमि'ति शब्दस्य लक्षणम्। शब्दः केवलम् आकाशे तिष्ठति। सः द्विधा विभज्यते - ध्वन्यात्मकः वर्णात्मकः च। मृदङ्गादिशब्दः ध्वन्यात्मकः, संस्कृतभाषायाः शब्दः वर्णात्मकः।

**पदकृत्यव्याख्या** - गुणपदं शब्दलक्षणे रूपादौ प्रसक्तिवारणाय श्रोत्रग्राह्यः इति। वस्तुतः श्रवणेन्द्रियजन्यस्य शब्दस्य श्रोत्रग्राह्यत्वेन तद्भिन्ने संस्कृतादिशब्दे अतिव्याप्तिः स्यात् तद्वारणाय श्रोत्रग्राह्यजातिमत्वे सति इति तात्पर्यात् गुणपदं व्यर्थम् इति।

बुद्धेः किं लक्षणं कतिविधा च सा ?

**सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम्। सा द्विविधा - स्मृतिरनुभवश्च।**

**पदकृत्यम्** - बुद्धिलक्षणमाह। सर्वेति। सर्वे ये व्यवहाराः आहारविहारादयः, तेषां हेतुर्बुद्धिरित्यर्थः दण्डादिवारणाय 'सर्वव्यवहारे'ति। कालादिवारणाय 'असाधारणे'ति देयम्।

**मूलार्थः** - संसारस्य सर्वेषां व्यवहाराणां (शब्दप्रयोगाणां) कारणभूतः गुणः बुद्धिः अथवा ज्ञानम् अस्ति। बुद्धिः द्विविधा भवति - स्मृतिः अनुभवश्च।

**पदकृत्यव्याख्या** - शब्दप्रयोगः व्यवहारः उच्यते। ज्ञानं विना शब्दप्रयोगः न भवति। शब्दप्रयोगरूपाः ये व्यवहाराः आहाराः विहाराः तेषां हेतुः कारणं वा बुद्धिः। बुद्धेः पर्यायः ज्ञानम्।

बुध्यते अनया सा बुद्धिः। ज्ञायते अनेन तद् ज्ञानम्। आहार-विहारादयः शब्दजन्यव्यवहाराः दण्डेन भवन्ति। अतः

तत्र अतिव्याप्तिवारणाय सर्वव्यवहारः इति। कालोऽपि कारणं व्यवहारस्य किन्तु सर्वव्यवहारस्य असाधारणं कारणं तु बुद्धिः एव। अतः सर्वव्यवहाराणाम् असाधारणं कारणम् इति 'असाधारणम्' इत्यपि पदं मूले देयम्। सर्वव्यवहाराऽसाधारणकारणत्वे सति गुणत्वं बुद्धेर्लक्षणम्। मूले 'बुद्धिः' इति उक्त्वा 'ज्ञानम्' इति पदस्य अभिधानं तु साङ्ख्यमते अभिमतायाः प्रकृतेः प्रथमपरिणामिन्याः बुद्धेः निराकरणाय।

स्मृतेः किं लक्षणम् – **संस्कारमात्रजन्यं ज्ञानं स्मृतिः।**

**पदकृत्यम्** – 'संस्कारे'ति संस्कारध्वंसे अतिव्याप्तिवारणाय 'ज्ञानम्' इति। अनुभवे अतिव्याप्तिवारणाय 'संस्कारजन्यम्' इति। तथापि प्रत्यभिज्ञायाम् अतिव्याप्तिवारणाय संस्कारमात्रजन्यत्वं विवक्षणीयम्। क्वचित्तथैव पाठः। न चैवं सत्यसम्भवः, तस्य संस्कारजन्यत्वे सतीन्द्रियार्थसन्निकर्षाजन्यार्थकत्वात्॥

**मूलार्थः** –संस्कारमात्रजन्यत्वे सति ज्ञानं स्मृतित्वम्। अर्थात् संस्कारमात्रोत्पन्नं ज्ञानं स्मृतिः उच्यते। स्मृतिः स्मरणम्।

**पदकृत्यव्याख्या** – 'ध्वंसं प्रति प्रतियोगी (वस्तु) कारणं भवति' इति न्यायेन संस्कारध्वंसोऽपि संस्कारजन्यत्वात् स्मृतिलक्षणे ज्ञानपदाभावात् संस्कारध्वंसे अतिव्याप्तिः स्यात् ज्ञानत्वोपादाने तु संस्कारध्वंसस्य अभावात्मकः, अतः नातिव्याप्तिः। 'प्रत्यभिज्ञायां' यदा कश्चन देवदत्तः पूर्वम् अन्यत्र दृष्टः पुनः अन्यत्र दृश्यते तत्र 'सोऽयं देवदत्तः' इत्यत्र यत् ज्ञानं जायते तदेव 'प्रत्यभिज्ञा' पदार्थः। तस्मिन् ज्ञाने अतिव्याप्तिवारणाय मात्रपदम्। तथा सति नातिव्याप्तिः। तत्र प्रत्यभिज्ञायां संस्कारजन्यत्वस्य सत्त्वेऽपि बहिरिन्द्रियजन्यत्वेन संस्कारमात्रजन्यत्वाभावात्। अनुभवः न संस्कारजन्यः। अतः तत्र अतिव्याप्तिवारणाय संस्कारजन्यम् इति। न च मात्रपदस्य सन्निवेशेऽपि असम्भवः दोषः स्यात् इति वाच्यम् ? संस्कारमात्रजन्यत्वकथने सति कार्यमात्रे कालादीनां साधारणकारणत्वात् ज्ञानस्य संस्कारेतरकालादिजन्यत्वात् संस्कारमात्रजन्यत्वाऽभावात् असम्भव इति। अतः टीकायां तस्य = मात्रपदस्य अर्थं संयोज्य लक्षणस्य स्वरूपम् – 'बहिरिन्द्रियाऽजन्यत्वे सति संस्कारजन्यत्वे सति ज्ञानत्वम्' स्मृतित्वम्। अनेन स्मृतौ न असम्भवः।

अनुभवस्य किं लक्षणं के च भेदाः ?

**तद्भिन्नं ज्ञानमनुभवः। स द्विविधः यथार्थोऽयथार्थश्च।**

**पदकृत्यम्** – तदिति। स्मृतित्वावच्छिन्नभिन्नमित्यर्थः। तेन यत्किञ्चित् स्मृतिभिन्नत्वस्य स्मृतौ सत्त्वेऽपि न क्षतिः। घटादावतिव्याप्तिवारणाय 'ज्ञानम्' इति। स्मृतिवारणाय तद्भिन्नमिति।

**मूलार्थः** – अनुभवस्य लक्षणम् – स्मृतिभिन्नज्ञानत्वम्। अनुभवत्वं स्मृतेः इतरज्ञानम् अनुभवः कथ्यते। अनुभवः द्विविधः यथार्थानुभवः अयथार्थानुभवश्च।

**पदकृत्यव्याख्या** – तद्भिन्नं नाम स्मृतिभिन्नम्। स्मृतिभिन्नत्वविशिष्टज्ञानत्वम् अनुभवत्वम्। स्मृतौ अतिव्याप्तिवारणाय स्मृतिभिन्नत्वविशेषणम्। तस्याः अपि ज्ञानवत्वात्। घटपटादौ अतिव्याप्तिवारणाय ज्ञानमिति विशेष्योपादानम्, घटपटादेः अपि स्मृतिभिन्नत्वात्। घटपटादेः स्मृतिभिन्नत्वेऽपि ज्ञानत्वाभावात् न अतिव्याप्तिः॥

यथार्थानुभवस्य लक्षणमुदाहरणं च – तद्वति तत्प्रकारकोऽनुभवो यथार्थः। यथा रजते इदं रजतम् इति ज्ञानं सैव प्रमेति उच्यते।

**पदकृत्यम्** – तद्वति तत्प्रकारको यस्य सः तथेत्यर्थः तद्वदविशेष्यकतत्प्रकारक इति यावत्। स्मृतिवारणाय अनुभव इति। अयथार्थानुभववारणाय तद्वतीति। निर्विकल्पके अतिव्याप्तिवारणाय तत्प्रकारक इति।

**मूलार्थः** – यथार्थनुभवस्य लक्षणम् तद्वतितत्प्रकारकः अनुभवः यथार्थः अर्थात् तत्पदेन रजतत्वं रजतत्ववत्। प्रकारकविशेषणम् इदं रजतं तस्मिन् एतादृशं ज्ञानं सा एव प्रमा उच्यते।

**पदकृत्यव्याख्या** – सर्वस्मिन् अपि सविकल्पके ज्ञाने एकं विशेष्यं भवति।

एवञ्च प्रकारः। विशेषणम् एव प्रकारः उच्यते। यथा 'अयं घटः' इति ज्ञाने घटांशे घटत्वं प्रकारः घटः च विशेष्यः अस्ति। घटत्वं प्रकारः यत्र तत् घटत्वप्रकारम्, घटः विशेष्यः यत्र तद् घटविशेष्यकं बहुव्रीहौ कप्रत्ययः।

तत्प्रकारके ज्ञाने यद् विशेष्यम् अस्ति, यदि तद्वत् स्यात् अर्थात् तस्य प्रकारस्य अधिकरणं स्यात् तदा तज्ज्ञानं यथार्थः भवति। स्मृतौ यथार्थज्ञानस्य अतिप्रसक्तिवारणाय अनुभव इति पदम्। अयथार्थानुभवे अतिप्रसक्तिवारणाय तद्वदिति। अयथार्थानुभवे द्वे अपि भवतः, किन्तु यथार्थ ज्ञानं विशेष्यविशेषणरहितं भवति। अतः लक्षणस्य अतिव्याप्तिः न स्यात्। निर्विकल्पकं ज्ञानं निष्प्रकारकं भवति। अतः तत्प्रकारकं पदम्। तस्मात् निर्विकल्पे न अतिव्याप्तिः।

अयथार्थानुभवस्य लक्षणं किम् ?

**तदभाववति तत्प्रकारकोऽतिव्याप्तिवारणाय तदभाववतीति। निर्विकल्पकवारणाय तत्प्रकारक इति।**

**मूलार्थः** - यस्मिन् यन्नास्ति तत्र तस्य अनुभवः अयथार्थानुभवः उच्यते। तत्पदेन रजतत्वं (रजतधर्मः) तस्य अभाववति शुक्तौ। तत्पदेन रजतत्वं तदेव प्रकारः विशेषणं तस्य अनुभवः। शुक्तौ शुक्तित्वम् अस्ति, रजतत्वं नास्ति किन्तु इदं रजतम् इति अयथार्थज्ञानम् अप्रमा च कथ्यते।

**पदकृत्यव्याख्या** - तदभाववति इति पदे अपि सप्तम्याः अर्थः पूर्ववदेव। विशेष्यत्वात् तदभाववद्-विशेष्यक-तत्प्रकारकः अनुभवः अयथार्थानुभवः अभूत्। यथा शुक्तौ रजतस्य ज्ञानम् अयथार्थः अनुभवः अभवत्। यतो हि विशेष्यभूतायाः शुक्तेः रजतत्वाभावयुक्तत्वात् तज्ज्ञानं रजतत्वाभाववद् विशेष्यकं, रजतत्वप्रकारकम्। अतः अयथार्थः अस्ति।

यथार्थानुभवभेदाः के ?

**यथार्थानुभवश्चतुर्विधः - प्रत्यक्षानुमित्युपमितिशाब्दभेदात्।**

**तत्कारणमपि चतुर्विधं - प्रत्यक्षानुमानोपमानशब्दभेदात्।**

**पदकृत्यम्** - यथार्थेति। यथार्थानुभवः प्रत्यक्षमेव चार्वाकाः। अनुमितिरिति काणादबौद्धाः। उपमितिरपीति-नैय्यायिकैकदेशिनः शब्दमपि इति नैय्यायिकाः अर्थापत्तिरपि इति प्राभाकराः अनुलब्धिरपि इति भट्टवेदान्तिनौ साम्भविकैतिह्यकावपीति-पौराणिकाः चैष्टिकोऽपीति तान्त्रिकाः एतेषां मते अस्वरसं सम्भाव्य तस्य चातुर्विध्यं दर्शितम्।

**मूलार्थः** - यथार्थानुभवस्य वा प्रमायाः चत्वारः भेदाः सन्ति। प्रत्यक्षम्, अनुमितिः उपमितिः, न्यायशास्त्रे प्रमाणानि उच्यन्ते। यतो हि एतानि प्रमायाः कारणानि। चतुर्विधप्रमाणानां लक्षणम् प्रमाकरणत्वं प्रमाणत्वम् इति। एवम् अग्रे वक्ष्यते।

**पदकृत्यव्याख्या** - यथार्थानुभवः प्रत्यक्षम् एकम् एव इति चार्वाकाः कथयन्ति। काणादबौद्धौ अनुमितिः अपि कथयतः। अपि शब्देन प्रत्यक्षम् अनुमितिः च द्वे स्वीकुरुतः इत्यर्थः। उपमितिः अपि नैय्यायिकाः (एकदेशिनः) अर्थात् प्रत्यक्षम् अनुमितिः इति त्रीणि प्रमाणानि स्वीकुर्वन्ति। शब्दमपि इति नैय्यायिकाः (नव्याः) प्रत्यक्षम् अनुमितिः उपमितिः शब्दम् इति चत्वारि प्रमाणानि स्वीकुर्वन्ति। प्रभाकरमते अनुपलब्धिः अपि स्वीक्रियते। तेषां मते षट्प्रमाणानि सन्ति। पौराणिकैः साम्भविकः एतिह्यः द्वौ अपि स्वीक्रियेते। तान्त्रिकैः चैष्टिकः अपि स्वीक्रियते। एतेषां मते अस्वरसं सम्भाव्य तस्य चातुर्विध्यं प्रदर्शितम्।



करणलक्षणम् - **असाधारणं कारणं करणम्।**

**पदकृत्यम्** - असाधारणमिति। कालादिवारणाय असाधारणमिति। व्यापारेऽतिव्याप्तिवारणाय व्यापारवद् इत्यपि देयम्। व्यापारश्च 'द्रव्यान्यत्वे सति तज्जन्यत्वे सति तज्जन्यजनकः'। ईश्वरेच्छादिवारणाय 'तज्जन्यत्वे सति' इति। कुलालजन्यत्वे सति कुलालजन्य-घटजनकत्वं कुलालपुत्रस्यापि अस्ति। तत्रातिव्याप्तिवारणाय प्रथमं सत्यन्तम्। दण्डादिवारणाय तज्जन्यजनक इति।

**मूलार्थः** - असाधारणं कारणं करणम् उच्यते। कार्यमात्रं प्रति साधारणं कारणम् अष्टविधम् यथा

**ईशस्तज्ज्ञानयतनेच्छाः कालोदृष्टे दिगेव च।**

**प्रागभावप्रतिबन्धकाभावौ कार्ये साधारणस्मृताः॥**

ईश्वरः तस्य ज्ञानम्, इच्छा, कृतिः प्रयत्नः प्रागभावः (पदार्थस्य उत्पत्तेः पूर्वं विद्यमानः अभावः) कालः, दिशा, अदृष्टः, (धर्मः अधर्मः च) अष्टविधं साधारणं कारणम्। प्रतिबन्धकः सामान्यः अभावः अपि साधारणं कारणं मन्यते।

**पदकृत्यव्याख्या** - कालादिकं च कार्यमात्रं प्रति कारणं भवति, न तु घटं प्रति एव। ईश्वरादिकं सर्वं जन्यपदार्थं प्रति साधारणं कारणं भवति। कार्यमात्रं प्रति अष्टविधं कारणं भवति। तत्र तत्र अतिव्याप्तवारणाय असाधारणं कारणं करणमिति करणलक्षणम् उक्तम्।

'व्यापारवद्' इति पदेन व्यापारवदसाधारणं कारणम् इति करणलक्षणं भवति। व्यापारस्य लक्षणं च द्रव्यभिन्नत्वे सति कारणजन्यत्वे सति कारणोत्पन्नघटादिजनकः व्यापारः इति। ईश्वरेच्छादिवारणाय तज्जन्यजनकः इति। कुलालजन्यघटजनकत्वं च कुलालपुत्रेऽपि अस्ति। अतः तद्वारणाय प्रथमं सत्यन्तां पदं, दण्डादिः घटादिकं प्रति असाधारणं कारणत्वं भवति तद्वारणाय 'तज्जन्यजनकः' इति।

कारणलक्षणम् - कार्यनियतपूर्ववृत्ति कारणम्।

**पदकृत्यम्** - कार्येति। कार्यात् **नियता** अवश्यम्भाविनी पूर्ववृत्तिः पूर्वक्षणवृत्तिः यस्य तत् तथेत्यर्थः। अनियतरासभादिवारणाय 'नियते'ति। कार्यवारणाय 'पूर्वे'ति। दण्डादिवारणाय अनन्यथा सिद्धत्वविशेषणस्य आवश्यकत्वेन रासभादिवारणसम्भवे नियतपदम् अनर्थकमेव। एवं च अन्यथासिद्धपूर्ववृत्तिकारणम् इति फलितम्। अन्यथासिद्धशून्यत्वम्। अन्यथासिद्धिश्च अवश्यक्लृप्तनियतपूर्ववर्तिभिः दण्डादिभिरेव घटरूपकार्यसम्भवे तत्सहभूतत्वं दण्डादौ तदन्यथासिद्धम्॥

**मूलार्थः** - कारणस्य लक्षणम् - 'कार्यनियतपूर्ववृत्तित्वं कारणत्वम्'। यः कार्योत्पन्नपदार्थः तस्मात् नियतपूर्ववृत्तिः कारणम् उच्यते।

**पदकृत्यव्याख्या** - कार्यं प्रति नियतत्वें सति पूर्ववृत्तित्वं कारणम् इत्यर्थः। नियतत्वविशेषस्य अनुपादाने पूर्ववर्तिनः रासभादेः अपि घटादीनां कारणत्वं स्यात्। अतः 'नियतत्वे सति' विशेषणम्।

नियतपूर्ववर्तिदण्डरूपादेः अपि घटस्य कारणत्वं स्यात्। अतः अन्यथासिद्धपदमपि कारणलक्षणे विशेषणत्वेन योज्यम्। दण्डरूपादीनां तु अन्यथासिद्धत्वात् नातिव्याप्तिः। एवम् 'अन्यथासिद्धिभिन्नत्वे सति कार्यं प्रति नियतपूर्ववृत्तित्वम्' इति कारणलक्षणम् अभूत्। दण्डत्वादिः घटकार्यस्य नियतपूर्ववृत्तिः अस्ति। अतः तत्र घटं प्रति कारणतावारणाय अन्यथासिद्धत्वं विशेषणस्य आवश्यकता अस्ति। ततः एव रासभादौ अपि अन्यथासिद्धत्वविशेषणात् घटकारणातावारणाय सम्भवे नियतपदम् अनर्थकमेव। अतः लक्षणस्य निष्कर्षः अनन्यथासिद्धत्वे सति कार्यं प्रति नियतवृत्तित्वं कारणत्वम् इति। अन्यथासिद्धत्वम् अन्यथासिद्धिशून्यत्वम्।

**करणलक्षणम् - कार्यं प्रागभावप्रतियोगि॥**

**पदकृत्यम्** - प्रागिति कालादिवारणाय 'प्रागि'ति। असम्भववारणाय 'प्रतियोगी'ति

**मूलार्थः - कार्यस्य लक्षणम्** - 'प्रागभावप्रतियोगित्वं कार्यत्वम्'। प्रागभावस्य यः प्रतियोगी कार्यम् उच्यते।

कार्यात् उत्पन्नः अभावः प्रागभावः। यथा कपाले (घटस्य अवयवे) घटः भविष्यति इत्यत्र घटोत्पत्तेः पूर्वक्षणे यः अभावः सः प्रागभावः। यस्य अभावः सः प्रतियोगी भवति इति नियमात् घटाभावस्य प्रतियोगी घटरूपं कार्यम् अस्ति।

**पदकृत्यव्याख्या** - प्राग् इति पदस्य अनुपादाने अभावपदेन अन्योन्याभावस्य अपि ग्रहणं भवति। अन्योन्याभावस्य प्रतियोगित्वात् कालादौ कार्यलक्षणस्य अतिव्याप्तिः स्याद्। अतः प्राग्पदसन्निवेशात् कालस्य प्रागभावात् कालादौ न अतिव्याप्तिः। प्रतियोगी - विरोधी। प्रतियोगी न स्यात्। प्रागभावस्य अप्रतियोगी तत्कार्यम् इति लक्षणं भविष्यति यच्च असम्भवदोष-ग्रस्तम् अस्ति। यतो हि किमपि कार्यं प्रागभावस्य अविरोधि न भवति। कार्योत्पत्तौ सत्यां-प्रागभावस्य नाशः भवति। अतः प्रतियोगिपदं देयम् इति।

कारणं कितिवधम् ?

**कारणं त्रिविधं समवाय्यसमवायिनिमित्तभेदात्।**

समवायिकारणस्य लक्षणं किम् ?

**यत्समवेतं कार्यमुत्पद्यते तत्सवायिकारणम्।**

**यथा तन्तवः पटस्य। पटश्च स्वगतरूपादेः।**

**पदकृत्यम्** - यदिति। यत्समवेतं - यस्मिन् समवायसम्बन्धेन वर्तमानं तदित्यर्थः, चक्रादिवारणाय समवेतमिति।

**मूलार्थः** - कारणस्य त्रयः भेदाः सन्ति - समवायिकारणम्, असमवायिकारणम् निमित्तकारणम्। यस्मिन् समवायसम्बन्धेन कार्यं समुत्पद्यते तत्समवायिकारणम् उच्यते। यथा तन्तवः पटस्य समवायिकारणम्, पटः च पटरूपं प्रति समवायिकारणम्।

**पदकृत्यव्याख्या** - यदिति - यत्समवेतं - यस्मिन् समवायसम्बन्धेन वर्तमानं तदित्यर्थः। चक्रादिवारणाय समवेतमिति।

**पदकृत्यव्याख्या** - यत्समवेतम् इति समवेतपदं न स्यात् चक्रादिकं संयोगेन वर्तमानं सत् घटादिकार्यम् उत्पद्यते। अतः चक्रादौ समवायिकारणत्वस्य अतिप्रसक्तिवारणाय समवेतपदम्।

**असमवायिकारणस्य लक्षणमुदाहरणं च - कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं यत्कारणम् असमवायिकारणम्। यथा तन्तुसंयोगः पटस्य, तन्तुरूपं पटरूपस्य।**

**पदकृत्यम्** - कार्येण कारणेन वा सह एकस्मिन्नर्थे समवेतत्वे सति आत्मविशेषणगुणाभिन्नत्वे सति यत्कारणं तद् असमवायि कारणम्। तन्तुसंयोगादावतिव्याप्तिवारणाय कार्येणेति। तन्तुरूपादिष्वव्याप्तिवारणाय कारणमिति। आत्मविशेषणगुणेऽतिव्याप्तिवारणाय आत्मविशेषणगुणभिन्नत्वे सतीति। विशेषवारणाय कारणमिति।

**मूलार्थः** - कार्येण सह वा कारणेन सह एकस्मिन् पदार्थे समवायसम्बन्धेन वर्तमानं कारणम् असमवायिकारणम् उच्यते। पटस्य तन्तुसंयोगः असमवायिकारणं तदेव पटस्य तन्तुरूपम् अपि असमवायिकारणम्।

**पदकृत्यव्याख्या** - 'आत्मविशेषगुणानां तु कुत्रापि असमवायिकारणत्वं नास्ति' इति नियमात् 'आत्मविशेषगुणभिन्नत्वे सति यत् कारणं तद् असमवायिकारणमि'ति लक्षणं देयम्। यदि कार्येण पदं न स्यात् तन्तुसंयोगः पटस्य असमवायिकरणं न भवति।

तन्तुसंयोगः पटकारणीभूतः तन्तुना सह एकस्मिन् काले समवायसम्बन्धेन तष्ठति। कार्यम् इति पदस्य सन्निवेशात् पटात्मकेन कार्येण सह तन्तौ तिष्ठति। अतः तन्तुसंयोगे लक्षणस्य अतिव्याप्तिः। तन्तुरूपं पटात्मकं कार्यं प्रति असमवायिकारणं भवति। किन्तु कार्येण सह एकस्मिन् न तिष्ठति। यतो हि पटात्मकं कार्यं पटे तिष्ठति। तन्तुरूपे तन्तौ च तिष्ठति। अतः तन्तुरूपे असमवायिकारणलक्षणम् अव्याप्तं भवति। कारणपदोपादानेन तद्वारणं भवति। तन्तुरूपं पटेन सह एकस्मिन् अवर्तमानम् अपि पटरूपस्य कारणं तु पटः एव। तेन सह तन्तौ तन्तुरूपम् अपि तिष्ठत्येव। अतः न अव्याप्तिाः




निमित्तकारणस्य किं लक्षणम् ?

**तदुभयभिन्नं कारणं निमित्तकारणम्। यथा तुरीवेमादिकं पटस्य।**

**पदकृत्यम्** - तदुभयेति। समवाय्यसमवायिकारणवारणाय 'तदुभयभिन्नमि'ति। विशेषादावतिव्याप्तिवारणाय कारणमिति।

**मूलार्थः** - निमित्तकारणस्य लक्षणम् - समवायिकारणाऽसमवायिकारणभिन्नत्वे सति कारणत्वं निमित्तकारणम्।

अर्थात् - समवायिकारणम् असमवायिकारणं च एतभ्यां भिन्नं सत् यत्कारणं तत् निमित्तकारणम् उच्यते। यथा तुरी - सूत्रवेष्टनाय नलिका, वेमा - वायदण्डः च पटस्य निमित्तकारणम्।

**पदकृत्यव्याख्या** - तदुभयभिन्नम् इति पदेन समवायिकारणस्य असमवायिकारणस्य च वारणाय इत्यर्थः। विशेषादौ निमित्तकारणलक्षणस्य अतिव्याप्तिः न स्यात्, तद्वारणाय कारणम् इति।

**कारणस्य निष्कृष्टलक्षणम् - तदेतत् त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणम्।**

**पदकृत्यम्** - तदेतदिति। यस्मात् कारणात् करणत्वघटकं कारणम् उपदर्शितं तस्मादेतत् त्रिविधसाधकमध्ये यत्साधकतमं तदेव कारणमितिभावः। इति कारणप्रपञ्चः।

**मूलार्थः** - समवायिकारणे, असमवायिकारणे, निमित्तकारणे च यद् असाधारणं कारणं तदेव करणम् इति उच्यते।

**पदकृत्यव्याख्या** - त्रिविधकारणलक्षणानि दर्शितानि। सम्प्रति करणलक्षणम् उच्यते। त्रिविधसाधकमध्ये - त्रिविधकारणमध्ये यत् असाधारणं कारणम् अर्थात् साधकतमं क्रियासिद्धौ अत्यन्तमुपकारकं तदेव करणम् अस्ति।

दण्डादौ असाधारणत्वं व्यापारत्वं च अस्ति इति घटादिकं प्रति दण्डादेः कारणत्वं सुसम्पन्नं भवति।

**प्रत्यक्षप्रमाणलक्षणं किम् ?**

**तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम्।**

**पदकृत्यम्** - तत्रेति। प्रमाणचतुष्टयमध्ये। दण्डादिवारणाय ज्ञानेति। अनुमानादिवारणाय प्रत्यक्षेति।

**मूलार्थः** - पूर्वोक्तेषु प्रत्यक्षज्ञानस्य कारणं (असाधारणकारणं) प्रत्यक्षम् उच्यते। घ्राणं, रसना चक्षुः त्वक्, श्रोत्रं, मनः एतानि प्रत्यक्षप्रमाणानि।

**पदकृत्यव्याख्या** - मूले तत्र इति पदेन चतुर्षु प्रमाणेषु प्रत्यक्षप्रमाणम् इत्यर्थः दण्डादिः अपि घटादिकं प्रति कारणं भवति। अतः तत्र प्रत्यक्षप्रमाणस्य अतिव्याप्तिः न स्यात्, तदर्थं ज्ञानपदम्। दण्डस्तु ज्ञानस्य कारणं नास्ति।

अनुमानादिप्रमाणेषु प्रत्यक्षप्रमाणस्य अतिव्याप्तिः न स्यात् तदर्थं प्रत्यक्षम् इति पदम्। अनुमानं न प्रत्यक्षज्ञानकरणम्।

प्रत्यक्षप्रमा (ज्ञान) लक्षणं किम् ? कतिविधं च तत् ?

इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् अथवा ज्ञानाकरणं ज्ञानं प्रत्यक्षम्। तद् द्विविधं निर्विकल्पकं सविकल्पकं चेति।

**पदकृत्यम्** - इन्द्रियार्थेति। इन्द्रियं चक्षुरादिकम्, अर्थः घटादिः, तयोः सन्निकर्षः संयोगादिः, तज्जन्यं ज्ञानं प्रत्यक्षमित्यर्थः। सन्निकर्षध्वंसवारणाय ज्ञानम् इति। अनुमित्यादिवारणाय इन्द्रियार्थसन्निकर्षाभावात् कथं वा स्वच्छ-जाह्नवीसलिलावृतमत्स्यादेः स्वच्छद्रव्यस्य तेजोनिरोधकत्वाभावेन तदन्तःचक्षुप्रवेशसम्भवात्। न चेश्वरप्रत्यक्षे अतिव्याप्तिः इति वाच्यम्, अत्र जन्यप्रत्यक्षस्यैव लक्षितत्वात्॥

**मूलार्थः** - इन्द्रियार्थ-सन्निकर्षात् उत्पन्नज्ञानं प्रत्यक्षम् उच्यते। निर्विकल्पकं सविकल्पकं च द्विविधं प्रत्यक्षं भवति।

**पदकृत्यव्याख्या** - इन्द्रियार्थसन्निकर्षजन्यज्ञानत्वं प्रत्यक्षत्वम्। इन्द्रियं चक्षुरादिकम्, अर्थः घटादिः तयोः सन्निकर्षः संयोगादिः तज्जन्यं ज्ञानं प्रत्यक्षम् इत्यर्थः। सन्निकर्षध्वंसः अपि इन्द्रियार्थसन्निकर्षजन्यत्वात् तद्वारणाय ज्ञानपदम्। अनुमित्यादौ प्रत्यक्षलक्षणस्य अतिव्याप्तिवारणाय इन्द्रियार्थसन्निकर्षेति। अनुमितौ व्याप्तिज्ञानस्य उपमितौ सादृश्यज्ञानस्य शब्दे च पदज्ञानस्य कारणत्वात् तानि ज्ञानकारणानि भवन्ति। अतः मूले ज्ञानाऽकरणं ज्ञानं प्रत्यक्षमिति। प्रत्यक्षं प्रति इन्द्रियं कारणं भवति नान्यत्। ज्ञानाऽकरणं ज्ञानत्वरूपं लक्षणम् ईश्वरप्रत्यक्षेऽपि स्यात्। ईश्वरप्रत्यक्षेऽपि ज्ञानाऽकरणम् अस्ति। तत्रातिव्याप्तिवारणाय लक्षणलक्ष्ये जन्यप्रत्यक्षम् इति। उपनेत्रसहितेन चक्षुषा उपनेत्रेण विरूद्धत्वेन पदार्थेन सह सन्निकर्षाभावात् स्वच्छद्रव्यस्य तेजोनिरोधकस्य अभावात् तदन्तःचक्षुःप्रवेशसम्भवात् स्वच्छगङ्गाजलावृत्तस्य मत्स्यादेः चक्षुषा ग्रहणं भवति॥

निर्विकल्पकलक्षणं किम् ?

**तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकं यथा किञ्चिदिदमिति।**

**पदकृत्यम्** - तत्र निष्प्रकारकमिति। सविकल्पके अतिव्याप्तिवारणाय निष्प्रकारकमिति। प्रकारवारणाय ज्ञानमिति।

**मूलार्थः** - पूर्वोक्तयोः प्रत्यक्षयोः प्रकारताशून्यं ज्ञानं निर्विकल्पकम् उच्यते। यथा कस्यचित् पदार्थस्य प्रथमदर्शने इदं किञ्चत् अस्ति इति सामान्यं ज्ञानं भवति। निर्विकल्पकलक्षणम् - 'विशेषणविशेष्यसम्बन्धाऽनवगाहिते सति ज्ञानत्वं' निर्विकल्पकत्वम्। अर्थात् विशेषणविशेष्याभ्यां शून्यज्ञानं निर्विकल्पकम् उच्यते।

**पदकृत्यव्याख्या** - सविकल्पकं सप्रकारकं भवति, तत्र निर्विकल्पकलक्षणस्य अतिव्याप्तिवारणाय निष्प्रकारकम् इति। प्रकारे - प्रकारत्वाभावात् प्रकारः अपि निष्प्रकारकः भवति। अतः तत्र प्रसक्तिवारणाय ज्ञानपदम्।

सविकल्पकलक्षणं किम् ?

`

**पदकृत्यम्** - सप्रकारकमिति। घटादिवारणाय ज्ञानमिति।

निर्विकल्पवारणाय 'सप्रकारकमि'ति।

**मूलार्थः** - प्रकारतायुक्तं ज्ञानं सविकल्पकम्। यथा अयं डित्थः अयं ब्राह्मणः, अयं श्यामः इति। विषयता त्रिधा भवति - विशेष्यता, प्रकारता, संसर्गता च। यथा डित्थोऽयम् इति प्रत्यक्षे सति अयम् इति पदे विशेष्यता, डित्थत्वे प्रकारता (विशेषणता) द्वाभ्यां सम्बन्धेन संसर्गता तिष्ठति। एवं रीत्या सप्रकारकं ज्ञानं सविकल्पकं ज्ञानं भवति।

**पदकृत्यव्याख्या** - घटः अपि घटरूपप्रकारकः। अतः तत्र लक्षणप्रसक्तिवारणाय ज्ञानपदम्। सविकल्पकलक्षणे निर्विकल्पकलक्षणप्रसक्तिवारणाय सप्रकारकमिति। निर्विकल्पकं तु निष्प्रकारकं भवति। उक्तं च तल्लक्षणम्॥

सन्निकर्षः कतिविधः कश्च सः ?

**प्रत्यक्षज्ञानहेतुरिन्द्रियसन्निकर्षः षड्विधः।**

**संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्च॥**

**पदकृत्यम्** - प्रत्यक्षेति। तच्च प्रत्यक्षं षड्विधं - घ्राणज - रासन - चाक्षुष- श्रौत्र - त्वाच - मानसभेदात्। ननु प्रत्यक्षकारणी भूतेन्द्रियनिष्ठप्रत्यक्षसमानाधिकरण्यघटकः सन्निकर्षः कः इत्यपेक्षायां तं विभज्य दर्शयति प्रत्यक्षेति। लौकिकप्रत्यक्षेत्यर्थः।

**मूलार्थः** - प्रत्यक्षज्ञानस्य हेतुभूतः इन्द्रियसन्निकर्षः षड्विधः भवति। संयोगसन्निकर्षः, संयुक्तसमवायसन्निकर्षः, संयुक्तसमवेतसमवायसन्निकर्षः, समवायसन्निकर्षः, समवेतसमवायसन्निकर्षः, विशेषणविशेष्यभावसन्निकर्षः।

**पदकृत्यव्याख्या** - घ्राणजः, रासनः, चाक्षुषः, श्रौत्रः, त्वाचः, मानसः इति भेदात् संयुक्तसमवायसन्निकर्षः एव षड्विधः भवति। द्रव्यग्राहकाणि इन्द्रियाणि -

चक्षुः त्वक्, मनः च एतानि। गुणग्राहकाणि इन्द्रियाणि घ्राणं रसना, श्रोत्रं च। कार्यकारणयोः सामानाधिकरण्यं भवति। अतः प्रत्यक्षरूपे कार्ये इन्द्रियरूपे कारणे च सामानाधिकरण्यं भवति। अर्थात् विषयतासम्बन्धेन यत्र प्रत्यक्षं भवति, तत्रैव संयोगादिसन्निकर्षाद् इन्द्रियमपि अस्ति। इत्थं संयोगादिषड्विधः सन्निकर्षः उक्तसामानाधिकरण्यघटकः अभूत्। तादृशः सन्निकर्षः कः ? इति सन्निकर्षं विभज्य दर्शयति -

प्रत्यक्षज्ञानस्य हेतुभूतः इन्द्रियसन्निकर्षः इति। अत्र प्रत्यक्षं नाम लौकिकं प्रत्यक्षम्॥

प्रत्यक्षे कः सन्निकर्षः ?

**चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः।**

**पदकृत्यम्** - संयोगम् उदाहरति - चक्षुषेति। तथा च -

द्रव्यचाक्षुषत्वाच्च मानसेषु संयोगः एव सन्निकर्षः इति भावः।

**मूलार्थः** - चक्षुरिन्द्रियेण घटप्रत्यक्षकरणे संयोगः सन्निकर्षः भवति।

**पदकृत्यव्याख्या** - चक्षुषा इत्यनेन संयोगम् उदाहरति द्रव्यं चाक्षुषत्वाच्च मानसेषु संयोगः एव सन्निकर्षः इति भावः॥

घटप्रत्यक्षे कः सन्निकर्षः ?

**घटरूपं प्रत्यक्षजनने संयुक्तसमवायः सन्निकर्षः।**

**चक्षुःसंयुक्ते घटरूपस्य समवायात्॥**

**पदकृत्यम्** - घटरूपेति चक्षुषा इत्यनुषज्यते। तथा च द्रव्यसमवेतचाक्षुषत्वाच्च मानसरासनघ्राणजेषु संयुक्तसमवायः एव सन्निकर्षः इत्यर्थः।

**मूलार्थः** - चक्षुरिन्द्रियद्वारा घटस्य शुक्लत्वनीलत्वादीनां रूपाणां संयुक्तसमवायसन्निकर्षः भवति। चक्षुरिन्द्रियसंयुक्ते घटद्रव्ये रूपगुणः समवायसम्बन्धेन तिष्ठति।

**पदकृत्यव्याख्या** - द्रव्यसमवेतं रूपादिकम्। द्रव्यसमवेतस्य प्रत्यक्षे करणीये चक्षुःसंयुक्तसमवायः कारणम्।

रूपत्वसामान्यप्रत्यक्षे कः सन्निकर्षः ?

**रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः।**

**चक्षुःसंयुक्ते घटे रूपं समवेतं तत्र रूपत्वस्य - समवायात्।**

**पदकृत्यम्** - रूपत्वादिकं यत्सामान्यं तत्प्रत्यक्षम् इत्यर्थः। अत्रापि चक्षुषा इत्यनुषज्यते। तथा च द्रव्यसमवेत-चाक्षुषरासनघ्राणजस्पर्शनमानसेषु संयुक्तसमवेतसमवाय एव सन्निकर्षः इति भावः। अथ द्रव्यतत्समवेतप्रत्यक्षेऽपि संयुक्तसंमवेतसमवाय एव सन्निकर्षोऽस्तु इति चेन्नतेत्। ईश्वरादेः (आत्मसुखादेः) - अनध्यक्षत्वप्रसङ्गात्॥

**मूलार्थः** - चक्षुरिन्द्रियद्वारा रूपत्वजातेः प्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः अस्ति। चक्षुरिन्द्रियसंयुक्ते घटद्रव्ये रूपगुण - समवेतसमवायसम्बन्धेन तिष्ठति। तत्र रूपगुणे रूपत्वजातिः समवायसम्बन्धेन तिष्ठति।

**पदकृत्यव्याख्या** - अत्र चक्षुः संयुक्तद्रव्यं तत्र समवायः रूपस्य द्रव्यसमवेतं रूपादिकं तत्समवेतं शुक्ल नीलत्वादिकम्। द्रव्यप्रत्यक्षे संयोगसमवेतः रूपादिके प्रत्यक्षे संयुक्तसमवायः सन्निकर्षः इति न मत्वा संयुक्तसमवेतसमवायः एव सन्निकर्षः मन्येत, तर्हि घटप्रत्यक्षस्थले चक्षुःसंयुक्ताः कपालिकातत्समवेतः कपालः तत्र समवायः घटरूपस्य। एवं घटरूपे प्रत्यक्षस्थले चक्षुःसंयुक्तः कपालः तत्समवेतः घटः, तत्र समवायः घटरूपस्य इति चेन्न, निरवयवस्य आत्मनः प्रत्यक्षं न भवितुं शक्नोति, आत्मा मनसा संयुक्तः अस्ति, नहि मनः संयुक्तसमवेतम्॥

शब्दप्रत्यक्षे कः सन्निकर्षः ?

**श्रोत्रेणैव शब्दसाक्षात्कारे समवायसन्निकर्षः।**

**कर्णविवरवर्त्याकाशस्य श्रौत्रत्वात्, शब्दस्याकाश -**

**गुणत्वात्। गुणगुणिनोश्च समवायात्॥**

**पदकृत्यम्** - समवायसन्निकर्षमुदाहरति-श्रोत्रेणेति जननीय इति शेषः। ननु श्रोत्रशब्दयोः कथं समवाय इत्यपेक्षमाणं प्रति समुपपाद्य दर्शयति - कर्णेति। समवायस्य नित्यत्वेन शब्दप्रत्यक्षे को व्यापार इति चेत्, शब्दः श्रोत्रमनःसंयोगो वेति गृहाण॥

**मूलार्थः** - श्रोत्रेन्द्रियेण शब्दगुणस्य प्रत्यक्षे समवायः सन्निकर्षः अस्ति। आकाशस्य गुणः शब्दः अस्ति। गुणिनि द्रव्ये गुणः समवायसम्बन्धेन तिष्ठति।

**पदकृत्यव्याख्या** - श्रोत्रशब्देन समवायसन्निकर्षस्य उदाहरणं दीयते। शब्दप्रत्यक्षे समवायसन्निकर्षः कारणम्। जननीयः इति श्रोत्रेण जननीये इति अर्थः। ननु श्रवणेन्द्रियशब्दयोः कथं समवायसम्बन्धः भवति ? इति प्रश्नस्य उत्तररूपेण दर्शयति कर्णेति। कर्णविवरवर्तिनः आकाशस्य श्रोत्रत्वाद् इति। अर्थात् श्रवणेन्द्रियस्य समं समवायसन्निकर्षः। नित्यसम्बन्धः समवायः इति समवायस्य नित्यत्वेन शब्दप्रत्यक्षे कः व्यापार इति चेत् श्रोत्रमनसोः यः संयोगः व्यापारः इति ज्ञेयः॥

अभावप्रत्यक्षे कः सन्निकर्षः ?

**अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः।**

**घटाभाववद् भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात्।**

**पदकृत्यम्** - विशेषणेति। विशेषणभावो विशेष्यभावश्चेति बोध्यम्। इन्द्रियसम्बन्धविशेषत्वमिन्द्रियसम्बन्ध विशेषत्वम् इति यावत्। विशेषणभावसन्निकर्षमुपपाद्य दर्शयति - घटाभाववदिति/ इह भूतले घटो नास्तीत्यादौ - विशेष्यतासन्निकर्षोऽवधेयः / सप्तम्यन्तस्य विशेषणत्वात्॥

**मूलार्थः** - घटाभाव: पटाभावः इत्यादौ अभावप्रत्यक्षे विशेषणविशेष्यभावसन्निकर्षः / घटाभाववद् भूतलम् इत्यत्र चक्षुषा संयुक्ते भूते विशेष्यं तत्र घटाभावः विशेषणम् अस्ति।

**पदकृत्यव्याख्या** - अभावप्रत्यक्षे विशेषणविशेष्यभावनामकः विशेषणतासन्निकर्षः कारणं भवति। घटाभाववद् भूतलम् इति ज्ञाने चक्षुःसंयुक्तभूतले घटाभावः विशेषणम् अस्ति। भूतलं विशेष्यं, घटाभावः विशेषणम् इति भावः॥

**प्रत्यक्षप्रमाणस्य निष्कृष्टं लक्षणम्** - एवं सन्निकर्षषट्क्रजन्यं ज्ञानं प्रत्यक्षं, तत्करणनिन्द्रियम्। तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम्। इति प्रत्यक्षपरिच्छेदः॥

**पदकृत्यम्** - प्रत्यक्षप्रमाणमुपसंहरति एवमिति। उपदर्शितक्रमेणेत्यर्थः / ननु सिद्धान्ते प्रत्यक्षज्ञानकरणम् इन्द्रियार्थसन्निकर्षः किं न स्यात्। इति चेन्नेत्याह - तत्करणमिति। प्रत्यक्षप्रमाणकरणत्वादित्यर्थः। सिद्धमिति। न्यायसिद्धान्ते सिद्धमित्यर्थः।

**मूलार्थः** - एवं संयोगादिषट्कजन्यज्ञानं प्रत्यक्षम् उच्यते। तस्य असाधारणं कारणम् इन्द्रियम्। तस्मात् इन्द्रियं प्रत्यक्षप्रमाणम्। अर्थात् प्रत्यक्षप्रमायाः करणम् इति।

**पदकृत्यव्याख्या** - मूले एवम् इति पदेन प्रत्यक्षप्रमायाः उपसंहारः क्रियते अथवा पूर्वदर्शितक्रमेण इत्यर्थः। सिद्धान्ते प्रत्यक्षज्ञानकरणम् इन्द्रियार्थसन्निकर्षः इति - लक्षणं कथं न स्यात् ? इत्युच्यते -

तत्करणम् - प्रत्यक्षप्रमायाः करणम् इति।

तस्माद् इत्यनेन प्रत्यक्षप्रमाणकरणत्वात् इत्यर्थः।

सिद्धम् इति पदेन न्यायसिद्धान्ते सिद्धम् इत्यर्थः॥

इति प्रत्यक्षपरिच्छेदः॥

## स्वाध्यायः

**1. योग्यविकल्पं चित्वा उत्तराणि लिखत।**

(1) गुरुत्व-गुणे वर्तमाना जातिः केन नाम्ना अभिधीयते ?

(क) गुरुत्वत्वम् (ख) गुरुत्वता (ग) उभे (घ) एषु एकमपि न

(2) द्रव्यवस्तुनः अन्तिमावयवः कः ?

(क) विशेष (ख) परमाणुः (ग) द्व्यणुकः (घ) त्रसरेणुः

(3) ध्वंसाप्रतियोगित्वं कस्य लक्षणम् ?

(क) नित्यस्य (ख) अनित्यस्य (ग) नित्याऽनित्ययोः (घ) सामान्यस्य

(4) आत्मनि ज्ञानं केन सम्बन्धेन तिष्ठति ?

(क) कालिकेन (ख) संयोगेन (ग) समवायेन (घ) असमवायेन

(5) यथार्थाऽनुभवः कतिविधः ?

(क) द्विविधः (ख) त्रिविधः (ग) चतुर्विधः (घ) षड्विधः

(6) कार्यमात्रं प्रति कति साधारणकारणानि ?

(क) पञ्च (ख) षड् (ग) सप्त (घ) अष्ट

(7) इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं किम् उच्यते ?

(क) प्रत्यक्षम् (ख) अनुमानम् (ग) उपमानम् (घ) शब्दः

(8) पटस्य असमवायिकारणं किम् ?

(क) तन्तुः (ख) तन्तुसंयोगः (ग) तन्तुरूपम् (घ) तन्तुः

(9) आद्यपतनस्य असमवायिकारणं किम् ?

(क) द्रवत्वम् (ख) परत्वम् (ग) गुरुत्वम् (घ) गुरुत्वत्वम्

**2. सविस्तरम् उत्तरं लिखत।**

(1) रूपस्य लक्षणं निरूपयत।

(2) यथार्थलक्षणं चर्चयत।

(3) लक्षणदोषविवेचनम्।

**3. अधोलिखितानि लक्षणानि निरूपयत।**

(1) आत्मा।

(2) कार्यम्।

(3) समवायिकारणम्।

(4) करणम्।

•

# 18 अमरकोशे वारिवर्गः

**प्रस्तावना -**

**कोषस्येव महीपानां कोषस्य विदुषामपि।**
**उपयोगो महान् यस्मात् क्लेशस्तेन विना भवेत्॥**

यथा भूपतीनां कोषस्य अर्थात् द्रव्यभाण्डागारस्य अतीव-उपयोगिता अस्ति, तथैव विदुषामपि व्याकरणस्य सति ज्ञानेऽपि कोषस्य महती उपयोगिता भवत्येव। यदि उभयोः समीपे कोषः न स्यात्, तदा क्लेशः अवश्यमेव वोढव्यः भविष्यति। अस्माकं भारतदेशे विद्वद्भिः नैकाः कोषग्रन्थाः रचिताः सन्ति। तेषु कोषग्रन्थेषु हेमचन्द्राचार्यस्य अभिधान-चिन्तामणिः एवञ्च अमरसिंहस्य अमरकोषः प्रसिद्धौ स्तः। अमरकोषस्य अपरं नाम 'नामलिङ्गानुशासनम्' अस्ति। अस्मिन् अमरकोषे त्रीणि काण्डानि सन्ति। तेषु प्रथमकाण्डस्य नाम नैघण्टुककाण्डमस्ति। अस्मिन् प्रथमे काण्डे दशवर्गाः सन्ति। तेषु दशवर्गेषु अन्तिमः वर्गः वारिवर्गः अस्ति। वारिवर्गे 45 श्लोकाः सन्ति। तेष्वत्र चिताः एकादश श्लोकाः सर्वेषां विद्यार्थिनां पुरः अमरकोषस्य ज्ञानाय प्रस्तूयन्ते॥

**(1) समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः।**
**उदन्वानुदधिः सिन्धुः सरस्वान्सागरोऽर्णवः॥**

**पदच्छेदः** = समुद्रः, अब्धिः, अकूपारः, सरित्पतिः, उदन्वान्, उदधिः, सिन्धुः, सरस्वान्, सागरः, अर्णवः॥

**भावार्थः** - अमरकोषस्य अस्मिन् श्लोके समुद्रस्य पर्यायवाचिनः एकादश शब्दाः सन्ति, यथा -

1. समुद्रः। 2. अब्धिः। 3. अकूपारः। 4. पारावारः। 5. सरित्पतिः। 6. उदन्वान्। 7. उदधिः। 8. सिन्धुः। 9. सरस्वान्। 10. सागरः। 11. अर्णवः॥

**(2) रत्नाकरो जलनिधिर्यादःपतिरपांपतिः।**
**तस्य प्रभेदाः क्षीरोदो लवणोदस्तथापरे॥**

**पदच्छेदः** = रत्नाकरः, जलनिधिः, यादःपतिः, अपांपतिः। तस्य प्रभेदाः क्षीरोदः, लवणोदः तथा अपरे॥

**भावार्थः** - प्रथमकाण्डस्य वारिवर्गस्य अस्मिन् द्वितीये श्लोके समुद्रस्य पर्यायवाचिनः षट्शब्दाः सन्ति, यथा -

1. रत्नाकरः। 2. जलनिधिः। 3. यादःपतिः। 4. अपाम्पतिः। 5. क्षीरोदः। 6. लवणोदः॥

**(3) आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम्।**
**पयः कीलालममृतं जीवनं भुवनं वनम्॥**

**पदच्छेदः** = आपः, स्त्री, भूम्नि वाः, वारि, सलिलं, कमलं, जलं, पयः, कीलालम्, अमृतं, जीवनं, भुवनं, वनम्॥

**भावार्थः** - अस्मिन् श्लोके जलस्य पर्यायवाचिनः द्वादश शब्दाः सन्ति, यथा -

1. आपः। 2. वाः। 3. वारि। 4. सलिलम्। 5. कमलम्। 6. जलम्। 7. पयः। 8. कीलालम्। 9. अमृतम्। 10. जीवनम्। 11. भुवनम्। 12. वनम्॥

**अवधेयम्** - वार्शब्दाद् आरभ्य सर्वेऽपि नपुंसके ज्ञेयाः। इति भूम्नि इत्यर्थः।

**(4) कबन्धमुदकं पाथः पुष्करं सर्वतोमुखम्।**
**अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम्॥**

**पदच्छेदः** = कबन्धम्, उदकं, पाथः, पुष्करं, सर्वतोमुखम्, अम्भः, अर्णः, तोयम्, पानीयं, क्षीरं, नीरम् अम्बु, शम्बरम्॥

**भावार्थः** - अमरकोषस्य अस्मिन् श्लोके जलस्य पर्यायवाचिनः त्रयोदश शब्दाः सन्ति, यथा -

1. कबन्धम्। 2. उदकम्। 3. पाथः। 4. पुष्करम्। 5. सर्वतोमुखम्। 6. अम्भः। 7. अर्णः। 8. तोयम्। 9. पानीयम्। 10. नीरम्। 11. क्षीरम्। 12. अम्बु। 13. शम्बरम्॥

**(5) मेघपुष्पं घनरसस्त्रिषु द्वे आप्यमम्मयम्।**
**भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिरथोर्मिषु॥**

**पदच्छेदः** = मेघपुष्पं, घनरसः। त्रिषु द्वे आप्यम्, अम्मयम्। अथ ऊर्मिषु-भङ्गः, तरङ्गः, ऊर्मिः स्त्रियां वीचिः वा॥

**भावार्थः** - अस्मिन् अमरकोषस्य श्लोके जलस्य पर्यायवाचिनौ द्वौ शब्दौ, जलविकारस्य पर्यायवाचिनौ द्वौ शब्दौ तथा तरङ्गस्य पर्यायवाचिनः चत्वारः शब्दाः सन्ति, यथा -

**जलस्य द्वौ** - 1. मेघपुष्पम्। 2. घनरसः॥

**जलविकारस्य द्वौ** - 1. आप्यम्। 2. अम्मयम्॥

**तरङ्गस्य चत्वारः** - 1. भङ्गः। 2. तरङ्गः। 3. ऊर्मिः। 4. वीचिः (स्त्रीलिङ्गे)॥

**(6) तरङ्गिणी शैवलिनी तटिनी ह्लादिनी धुनी।**
**स्रोतस्वती द्वीपवती, स्रवन्ती निम्नगापगा॥**

**पदच्छेदः** = तरङ्गिणी, शैवलिनी, तटिनी, ह्लादिनी, धुनी, स्रोतस्वती, द्वीपवती, स्रवन्ती, निम्नगा, अपगा॥

**भावार्थः** - अस्मिन् अमरकोषस्य श्लोके नद्याः दश पर्यायवाचिनः शब्दाः सन्ति, यथा -

1. तरङ्गिणी। 2. शैवलिनी। 3. तटिनी। 4. ह्लादिनी। 5. धुनी। 6. स्रोतस्वती 7. द्वीपवती 8. स्रवन्ती। 9. निम्नगा 10. अपगा॥

**अवधेयम्** - 'सरित्' इत्यपि नद्याः पर्यायवाचकशब्दोऽस्ति।

**(7) गङ्गा विष्णुपदी जह्नुतनया सुरनिम्नगा।**
**भागीरथी त्रिपथगा त्रिस्रोता भीष्मसूरपि॥**

**पदच्छेदः** = गङ्गा, विष्णुपदी जह्नुतनया, सुरनिम्नगा, भागीरथी, त्रिपथगा, त्रिस्रोताः भीष्मसूः अपि॥

**भावार्थः** - अस्मिन् अमरकोषस्य श्लोके गङ्गायाः पर्यायवाचिनः अष्टौ शब्दाः सन्ति, यथा -

1. गङ्गा। 2. विष्णुपदी। 3. जह्नुतनया। 4. सुरनिम्नगा 5. भागीरथी 6. त्रिपथगा 7. त्रिस्रोताः 8. भीष्मसूः।

**(8) कालिन्दी सूर्यतनया यमुना शमनस्वसा।**
**रेवा तु नर्मदा सोमोद्भवा मेकलकन्यका॥**

**पदच्छेदः** = कालिन्दी, सूर्यतनया, यमुना, शमनस्वसा, रेवा, नर्मदा, सोमोद्भवा तु मेकलकन्यका॥

**भावार्थः** - अस्मिन् अमरकोषस्य प्रथमकाण्डस्य वारिवर्गस्य श्लोके यमुनायाः चत्वारः पर्यायाः तथा नर्मदायाः चत्वारः पर्यायाः सन्ति, यथा -

**यमुनायाः पर्यायाः** - 1. कालिन्दी। 2. सूर्यतनया। 3. यमुना। 4. शमनस्वसा॥

**नर्मदायाः चत्वारः** - 1. रेवा। 2. नर्मदा। 3. सोमोद्भवा। 4. मेकलकन्यका॥

**(9) वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम्।**
**सहस्रपत्रं कमलं शतपत्रं कुशेशयम्॥**

**पदच्छेदः** = पद्मं वा, पुंसि, नलिनम्, अरविन्दं, महोत्पलं, सहस्रपत्रं, कमलं, शतपत्रं, कुशेशयम्॥

**भावार्थः** - अस्मिन् अमरकोषस्य श्लोके कमलस्य पर्यायवाचिनः अष्टौ शब्दाः सन्ति, यथा - तेषु 'पद्म' शब्दः पुंल्लिङ्गे एवं नपुंसकलिङ्गे भवति)

1. पद्मम्। पद्मः 2. नलिनम्। 3. अरविन्दम्। 4. महोत्पलम्। 5. सहस्रपत्रम्। 6. कमलम् 7. शतपत्रम् 8. कुशेशयम्॥

**(10) पङ्केरुहं तामरसं सारसं सरसीरुहम्।**
**बिसप्रसूनराजीवपुष्कराम्भोरुहाणि च॥**

**पदच्छेदः** = पङ्केरुहं, तामरसं, सारसं, सरसीरुहं, बिसप्रसूनं, राजीवं, पुष्करम्, अम्भोरुहाणि। च।

**भावार्थः** - अमरकोषस्य प्रथमकाण्डस्य अस्मिन् श्लोके कमलस्य अष्टौ पर्यायवाचिनः शब्दाः सन्ति, यथा -

1. पङ्केरुहम्। 2. तामरसम्। 3. सारसम्। 4. सरसीरुहम्। 5. बिसप्रसूनम्। 6. राजीवम्। 7. पुष्करम् 8. अम्भोरुहम्।

**(11) उक्तं स्वर्व्योमदिक्कालधीशब्दादि सनाट्यकम्।**
**पातालभोगि नरकं वारि चैषां च संगतम्॥**

**पदच्छेदः** = स्वर्, व्योम दिक् धी शब्दादि सनाट्यकं, पातालभोगि, नरकं वारि च एषां संगतम् उक्तम्॥

**भावार्थः** - अस्मिन् अमरकोषस्य उपान्त्ये श्लोके प्रथमकाण्डे आगतानां वर्गाणां नामानि सन्ति, यथा -

1. स्वर्गवर्गः। 2. व्योमवर्गः। 3. दिग्वर्गः। 4. कालवर्गः। 5. धीवर्गः। 6. शब्दादिवर्गः। 7. नाट्यवर्गः। 8. पातालभोगिवर्गः। 9. नरकवर्गः। 10. वारिवर्गः॥

## स्वाध्यायः

**1. योग्यविकल्पं चित्वा उत्तराणि लिखत।**

(1) केन विना क्लेशः भवेत् ?

(क) कोषेन। (ख) व्यवहारेण। (ग) पुस्तकेन। (घ) शब्देन।

(2) अभिधानचिन्तामणिः कस्य ग्रन्थः अस्ति ?

(क) व्यासस्य। (ख) हेमचन्द्राचार्यस्य। (ग) भरतस्य। (घ) अमरसिंहस्य।

(3) अमरकोषस्य अपरं नाम किम् ?

(क) शब्दकौस्तुभः। (ख) नामलिङ्गानुशासनम्।
(ग) शब्दसौरभः। (घ) पदचन्द्रिका।

(4) गङ्गायाः पर्यायवाचिनः कति शब्दाः सन्ति ?

(क) 5 (ख) 8 (ग) 7 (घ) 6

(5) सूर्यतनया इति कस्याः नद्याः नाम अस्ति ?

(क) नर्मदायाः। (ख) यमुनायाः। (ग) गङ्गायाः। (घ) साभ्रमत्याः।

(6) जलविकारस्य कति पर्यायाः सन्ति ?

(क) 3 (ख) 5 (ग) 2 (घ) 4

(7) वीचिशब्दः कस्मिन् लिङ्गे भवति ?

(A) स्त्रीलिङ्गे। (ख) नपुंसकलिङ्गे। (ग) पुंल्लिङ्गे। (घ) त्रिषु लिङ्गेषु।

**2. अधोलिखितानां प्रश्नानां लघूत्तराणि लिखत।**

(1) अमरकोषे कति काण्डानि ?

(2) राज्ञां कस्य आवश्यकता भवति ?

(3) अमरकोषस्य प्रथमकाण्डस्य नाम किम् ?

(4) प्रथमकाण्डे कति वर्गाः सन्ति ?

(5) नर्मदायाः पर्यायवाचिनः लिखत।

(6) वारिवर्गे कति श्लोकाः सन्ति ?

(7) तरङ्गस्य पर्यायवाचिनः लिखत।

**3. प्रश्नानाम् उत्तराणि लिखत।**

(1) अमरकोषस्य महत्त्वम्।

(2) प्रथमकाण्डस्य वर्गाः नामानि च।

(3) कमलस्य पर्यायवाचिनः शब्दान् लिखत।

(4) समुद्रस्य पर्यायवाचिनः शब्दान् लिखत।

(5) नद्याः पर्यायवाचिनः लिखत।

**4. निम्नाङ्कितानां श्लोकानां पूर्तिं कुरुत।**

(1) समुद्रोऽब्धिरकूपारः .....।

(2) आपः स्त्री भूम्नि .....।

(3) मेघपुष्पं घनरस .....।

(4) गङ्गा विष्णुपदी .....।

(5) उक्तं स्वर्व्योमदिक्काल .....।

•

# सूत्राणाम् अकारादिवर्णानुक्रमः


(अ)

| | | |
|---|---|---|
| 1. | अचि विभाषा | 1 \| 2 \| 21 \|\| |
| 2. | अचः परस्मिन् पूर्वविधौ | 1 \| 1 \| 57 \|\| |
| 3. | अज्झनगमां सनि | 6 \| 4 \| 16 \|\| |
| 4. | अञ्जेः सिचि | 7 \| 2 \| 71 \|\| |
| 5. | अत उत्सार्वधातुके | 6 \| 4 \| 110 \|\| |
| 6. | अदभ्यस्तात् | 7 \| 1 \| 4 \|\| |
| 7. | अदिप्रभृतिभ्यः शपः | 2 \| 4 \| 72 \|\| |
| 8. | अदः सर्वेषाम् | 7 \| 3 \| 100 \|\| |
| 9. | अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति | 6 \| 4 \| 37 \|\| |
| 10. | अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् | 6 \| 1 \| 59 \|\| |
| 11. | अभ्यासस्यासवर्णे | 6 \| 4 \| 78 \|\| |
| 12. | अभ्यासाच्च | 7 \| 3 \| 55 \|\| |
| 13. | अर्तिपिपर्त्योश्च | 7 \| 3 \| 77 \|\| |
| 14. | अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ् णौ | 7 \| 3 \| 36 \|\| |
| 15. | असिद्धवदत्राभात् | 6 \| 4 \| 22 \|\| |
| 16. | अस्तेर्भूः | 2 \| 4 \| 52 \|\| |
| 17. | अस्यतिवक्तिख्यातिभ्योऽङ् | 3 \| 1 \| 52 \|\| |

(आ)

| | | |
|---|---|---|
| 18. | आ च हौ | 6 \| 4 \| 117 \|\| |
| 19. | आत्मनेपदेष्वन्यतरस्याम् | 3 \| 1 \| 54 \|\| |
| 20. | आर्धधातुके | 2 \| 4 \| 35 \|\| |
| 21. | आहस्थः | 8 \| 2 \| 35 \|\| |

(इ)

| | | |
|---|---|---|
| 22. | इको झल् | 1 \| 2 \| 9 \|\| |
| 23. | इडत्यर्त्तिव्ययतीनाम् | 7 \| 2 \| 66 \|\| |
| 24. | इणो गा लुङि | 2 \| 4 \| 45 \|\| |
| 25. | इणो यण् | 6 \| 4 \| 81 \|\| |
| 26. | इरितो वा | 3 \| 1 \| 57 \|\| |

(ई)

| | | |
|---|---|---|
| 27. | ई च गणः | 7 \| 4 \| 17 \|\| |
| 28. | ई हल्यघोः | 6 \| 4 \| 113 \|\| |

| | | |
|---|---|---|
| 29. | उतो वृद्धिर्लुकि हलि | 7 \| 3 \| 89 \|\| |
| 30. | उपसर्गप्रादुर्भ्यामस्तिर्यच्परः | 8 \| 3 \| 87 \|\| |
| 31. | उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु च | 6 \| 1 \| 139 \|\| |
| 32. | उषविदजागृभ्योऽन्यतरस्याम् | 3 \| 1 \| 38 \|\| |
| | **( ऊ )** | |
| 33. | ऊर्णोतेर्विभाषा | 7 \| 3 \| 90 \|\| |
| 34. | ऊर्णोतेर्विभाषा | 7 \| 2 \| 6 \|\| |
| | **( ऋ )** | |
| 35. | ऋच्छत्यॄताम् | 7 \| 4 \| 11 \|\| |
| 36. | ऋतश्च संयोगादेः | 7 \| 2 \| 43 \|\| |
| | **( ॠ )** | |
| 37. | ॠत इद्धातोः | 7 \| 1 \| 100 \|\| |
| | **( ए )** | |
| 38. | एतेर्लिङि | 7 \| 4 \| 24 \|\| |
| | **( ओ )** | |
| 39. | ओतः श्यनि | 7 \| 3 \| 71 \|\| |
| 40. | ओः पुयण्ज्यपरे | 7 \| 4 \| 80 \|\| |
| | **( औ )** | |
| | ..................... | ..................... |
| | **( क )** | |
| 41. | किरतौ लवने | 6 \| 1 \| 140 \|\| |
| 42. | क्र्यादिभ्यः श्ना | 3 \| 1 \| 81 \|\| |
| 43. | क्षुभ्नादिषु च | 8 \| 4 \| 39 \|\| |
| 44. | क्सस्याऽचि | 7 \| 3 \| 72 \|\| |
| | **( ग )** | |
| 45. | गाङ्कुटादिभ्योऽञ्णिन्ङित् | 1 \| 2 \| 1 \|\| |
| 46. | गाङ् लिटि | 2 \| 4 \| 49 \|\| |
| 47. | गुणोऽपृक्ते | 7 \| 3 \| 91 \|\| |
| 48. | गुणो यङ्लुकोः | 7 \| 4 \| 82 \|\| |
| 49. | ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च | 6 \| 1 \| 16 \|\| |
| 50. | ग्रहोऽलिटि दीर्घः | 7 \| 2 \| 37 \|\| |
| | **( घ )** | |
| 51. | घुमास्थागापाजहातिसां हलि | 6 \| 4 \| 66 \|\| |
| 52. | घ्वसोरेद्धावभ्यासलोपश्च | 6 \| 4 \| 119 \|\| |

( च )

| | | |
|---|---|---|
| 53. | चिणो लुक् | 6 \| 4 \| 104 \|\| |
| 54. | चिण् ते पदः | 3 \| 1 \| 60 \|\| |

( ज )

| | | |
|---|---|---|
| 55. | जनसनखनां सञ्झलोः | 6 \| 4 \| 42 \|\| |
| 56. | जनिवध्योश्च | 7 \| 3 \| 35 \|\| |
| 57. | जहातेश्च | 6 \| 4 \| 116 \|\| |
| 58. | जुसि च | 7 \| 3 \| 38 \|\| |
| 59. | जुहोत्यादिभ्यः श्लुः | 2 \| 4 \| 75 \|\| |
| 60. | जॄस्तन्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च | 3 \| 1 \| 58 \|\| |
| 61. | ज्ञाजनोर्जा | 7 \| 3 \| 79 \|\| |

( ण )

| | | |
|---|---|---|
| 62. | णिचश्च | 1 \| 3 \| 74 \|\| |
| 63. | णिजां त्रयाणां गुणः श्लौ | 7 \| 4 \| 75 \|\| |

( त )

| | | |
|---|---|---|
| 64. | तत्प्रयोजको हेतुश्च | 1 \| 4 \| 55 \|\| |
| 65. | तनादिकृञ्भ्य उः | 3 \| 1 \| 79 \|\| |
| 66. | तनादिभ्यस्तथासोः | 2 \| 4 \| 79 \|\| |
| 67. | तिप्यनस्तेः | 8 \| 2 \| 73 \|\| |
| 68. | तिष्ठतेरित् | 7 \| 4 \| 5 \|\| |
| 69. | तीषसहलुभरुषरिषः | 7 \| 2 \| 48 \|\| |
| 70. | तुदादिभ्यः शः | 3 \| 1 \| 77 \|\| |
| 71. | तृणह इम् | 7 \| 3 \| 92 \|\| |

( द )

| | | |
|---|---|---|
| 72. | दधस्तथोश्च | 8 \| 2 \| 38 \|\| |
| 73. | दश्च | 8 \| 2 \| 75 \|\| |
| 74. | दाधा घ्वदाप् | 1 \| 1 \| 20 \|\| |
| 75. | दिवादिभ्यः श्यन् | 3 \| 1 \| 69 \|\| |
| 76. | दीङो युडचि क्ङिति | 6 \| 4 \| 63 \|\| |
| 77. | दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम् | 3 \| 1 \| 61 \|\| |
| 78. | दीर्घ इणः किति | 7 \| 4 \| 69 \|\| |
| 79. | दीर्घोऽकितः | 7 \| 4 \| 83 \|\| |

( ध )

| | | |
|---|---|---|
| 80. | धातोरेकाचो हलादेः क्रियासमभिहारे यङ् | 3 \| 1 \| 22 \|\| |
| 81. | धातोः कर्मणः समानकर्तृकादिच्छायां वा | 3 \| 1 \| 7 \|\| |

(त)

| | | |
|---|---|---|
| 82. | न न्द्राः संयोगादयः | 6 \| 1 \| 3 \|\| |
| 83. | न भकुर्छुराम् | 8 \| 2 \| 79 \|\| |
| 84. | न लिङि | 7 \| 2 \| 39 \|\| |
| 85. | नाभ्यस्तस्याचि पिति सार्वधातुके | 7 \| 3 \| 87 \|\| |
| 86. | नित्यं करोतेः | 6 \| 4 \| 108 \|\| |
| 87. | नित्यं कौटिल्ये गतौ | 3 \| 1 \| 23 \|\| |

(प)

| | | |
|---|---|---|
| 88. | प्वादीनां ह्रस्वः | 7 \| 3 \| 80 \|\| |

(ब)

| | | |
|---|---|---|
| 89. | ब्रुव ईट् | 7 \| 3 \| 93 \|\| |
| 90. | ब्रुवो वचिः | 2 \| 4 \| 53 \|\| |
| 91. | ब्रुवः पञ्चानामादित आहो ब्रुवः | 3 \| 4 \| 84 \|\| |

(भ)

| | | |
|---|---|---|
| 92. | भियोऽन्यतरस्याम् | 6 \| 4 \| 115 \|\| |
| 93. | भीह्रीभृहुवां श्लुवच्च | 3 \| 1 \| 39 \|\| |
| 94. | भुजोऽनवने | 1 \| 3 \| 66 \|\| |
| 95. | भृञामित् | 7 \| 4 \| 76 \|\| |
| 96. | भ्रस्जो रोपधयो रमन्यतरस्याम् | 6 \| 4 \| 47 \|\| |

(म)

| | | |
|---|---|---|
| 97. | मस्जिनशोर्झलि | 7 \| 1 \| 60 \|\| |
| 98. | मितां ह्रस्वः | 6 \| 4 \| 92 \|\| |
| 99. | मीनातिमिनोतिदीङां ल्यपि च | 6 \| 1 \| 50 \|\| |
| 100. | म्रियतेर्लुङ्लिङोश्च | 1 \| 3 \| 61 \|\| |

(य)

| | | |
|---|---|---|
| 101. | यङोऽचि च | 2 \| 4 \| 74 \|\| |
| 102. | यङो वा | 7 \| 3 \| 94 \|\| |
| 103. | यस्य हलः | 6 \| 4 \| 49 \|\| |
| 104. | ये च | 6 \| 4 \| 109 \|\| |
| 105. | ये विभाषा | 6 \| 4 \| 43 \|\| |

(र)

| | | |
|---|---|---|
| 106. | रधादिभ्यश्च | 7 \| 2 \| 45 \|\| |
| 107. | रीगृदुपधस्य च | 7 \| 4 \| 90 \|\| |
| 108. | रुधादिभ्यः श्नम् | 3 \| 1 \| 78 \|\| |

( ल )

| | | |
|---|---|---|
| 109. | लङः शाकटायनस्यैव | 3 \| 4 \| 111 \|\| |
| 110. | लिङ्सिचावात्मनेपदेषु | 1 \| 2 \| 11 \|\| |
| 111. | लिङ्सिचोरात्मनेपदेषु | 7 \| 2 \| 42 \|\| |
| 112. | लिट्यन्यतरस्याम् | 2 \| 4 \| 40 \|\| |
| 113. | लिपिसिचिह्वश्च | 3 \| 1 \| 53 \|\| |
| 114. | लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये | 7 \| 3 \| 73 \|\| |
| 115. | लुङि च | 2 \| 4 \| 43 \|\| |
| 116. | लुङ्सनोर्घस्लृ | 2 \| 4 \| 37 \|\| |
| 117. | लोपो यि | 6 \| 4 \| 118 \|\| |

( व )

| | | |
|---|---|---|
| 119. | वच उम् | 7 \| 4 \| 20 \|\| |
| 120. | वा जॄभ्रमुत्रसाम् | 6 \| 4 \| 124 \|\| |
| 121. | विज इट् | 1 \| 2 \| 2 \|\| |
| 122. | विदाङ्कुर्वन्त्वित्यन्यतरस्याम् | 3 \| 1 \| 41 \|\| |
| 123. | विदो लटो वा | 3 \| 4 \| 78 \|\| |
| 124. | विभाषा घ्राधेट्शाच्छासः | 2 \| 4 \| 78 \|\| |
| 125. | विभाषा चेः | 7 \| 3 \| 58 \|\| |
| 126. | विभाषा लुङ्लृङोः | 2 \| 4 \| 50 \|\| |
| 127. | विभाषोर्णोः | 1 \| 2 \| 3 \|\| |
| 128. | वॄतो वा | 7 \| 2 \| 38 \|\| |

( श )

| | | |
|---|---|---|
| 129. | शदेः शितः | 1 \| 3 \| 60 \|\| |
| 130. | शर्पूर्वाः खयः | 7 \| 4 \| 61 \|\| |
| 131. | शल इगुपधादनिटः क्सः | 3 \| 1 \| 45 \|\| |
| 132. | शासिवसिघसीनां च | 8 \| 3 \| 60 \|\| |
| 133. | शीङो रुट् | 7 \| 1 \| 6 \|\| |
| 134. | शीङः सार्वधातुके गुणः | 7 \| 4 \| 21 \|\| |
| 135. | शॄदॄप्रां ह्रस्वो वा | 7 \| 4 \| 12 \|\| |
| 136. | शे मुचादीनाम् | 7 \| 1 \| 59 \|\| |
| 137. | श्नसोरल्लोपः | 6 \| 4 \| 111 \|\| |
| 138. | श्नान्नलोपः | 6 \| 4 \| 23 \|\| |
| 139. | श्नाभ्यस्तयोरातः | 6 \| 4 \| 112 \|\| |
| 140. | श्र्युकः किति | 7 \| 2 \| 11 \|\| |
| 141. | श्लौ | 6 \| 1 \| 10 \|\| |

( स )

| | | |
|---|---|---|
| 142. | सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् | 3 \| 1 \| 25 ॥ |
| 143. | सनि ग्रहगुहोश्च | 7 \| 2 \| 12 ॥ |
| 144. | सन्यङोः | 6 \| 1 \| 9 ॥ |
| 145. | समवाये च | 6 \| 1 \| 138 ॥ |
| 146. | सिंचि च परस्मैपदेषु | 7 \| 2 \| 40 ॥ |
| 147. | सिपि धातो रुर्वा | 8 \| 2 \| 74 ॥ |
| 148. | सृजिदृशोर्झल्यमकिति | 6 \| 1 \| 58 ॥ |
| 149. | सेऽसिचि कृतचृतच्छृदतृदनृतः | 7 \| 2 \| 57 ॥ |
| 150. | संपरिभ्यां करोतौ भूषणे | 6 \| 1 \| 137 ॥ |
| 151. | सः स्यार्धधातुके | 7 \| 8 \| 89 ॥ |
| 152. | स्तम्भुस्तुन्भुस्कम्भुस्कुम्भुस्कुञ्भ्यः श्नुश्च | 3 \| 1 \| 82 ॥ |
| 153. | स्तन्भेः | 8 \| 3 \| 67 ॥ |
| 154. | स्तुसुधूञ्भ्यः परस्मैपदेषु | 7 \| 2 \| 72 ॥ |
| 155. | स्थाघ्वोरिच्च | 1 \| 2 \| 17 ॥ |
| 156. | स्फुरतिस्फुलत्योर्निर्निविभ्यः | 8 \| 3 \| 76 ॥ |
| 157. | स्वतन्त्रः कर्ता | 2 \| 4 \| 54 ॥ |
| 158. | स्वादिभ्यः श्नुः | 3 \| 1 \| 73 ॥ |

( ह )

| | | |
|---|---|---|
| 159. | हनो वध लिङि | 2 \| 4 \| 42 ॥ |
| 160. | हन्तेर्जः | 6 \| 4 \| 36 ॥ |
| 161. | हलि च | 8 \| 2 \| 77 ॥ |
| 162. | हल श्नः शानज्झौ | 3 \| 1 \| 83 ॥ |
| 163. | हिनुमीना | 8 \| 4 \| 15 ॥ |
| 164. | हिंसायां प्रतेश्च | 6 \| 1 \| 141 ॥ |
| 165. | हुझल्भ्यो हेर्धिः | 6 \| 4 \| 101 ॥ |
| 166. | हेतुमति च | 3 \| 1 \| 26 ॥ |

## वार्तिकानाम् अकारादिक्रमः

1. अडभ्यासव्यवायेऽपि सुट् कात् पूर्व इति वक्तव्यम्।
2. ऊर्णोतेराम्नेति वाच्यम्।
3. मस्जेरन्त्यात्पूर्वो नुम्वाच्यः।
4. वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ।
5. शे तृम्फादीनां नुम्वाच्यः।
6. स्थाघ्वोरित्त्वे दीङः प्रतिषेधः।
7. स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्यः।

## धातूनाम् अकारादिक्रमः

**( अ )**

1. अद भक्षणे। (सकर्मकः)
2. अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु। (सकर्मकः)
3. अश भोजने। (सकर्मकः)
4. अस भुवि। (अकर्मकः)

**( इ )**

5. इङ् अध्ययने। (सकर्मकः)
6. इण् गतौ। (सकर्मकः)
7. ञिइन्धी दीप्तौ। (अकर्मकः)
8. इषु इच्छायाम्। (सकर्मकः)

**( उ )**

9. उछि उञ्छे। (सकर्मकः)
10. उज्झ उत्सर्गे। (सकर्मकः)
11. उन्दी क्लेदने। (अकर्मकः)

**( ऊ )**

12. ऊर्णुञ् आच्छादने। (सकर्मकः)

**( ऋ )**

13. ऋ गतौ। (सकर्मकः)
    ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु। (सकर्मकः)

**( ए )**

14. एध वृद्धौ। (अकर्मकः)

**( ओ )**

15. ओविजी भयचलनयोः। (अकर्मकः)

**( क )**

16. कथ वाक्यप्रबन्धे। (सकर्मकः)
17. कुट कौटिल्ये (अकर्मकः)
18. कुष निष्कर्षे। (सकर्मकः)
19. (डु) कृञ् करणे। (सकर्मकः)
20. कृती छेदने। (सकर्मकः)
21. कृती वेष्टने। (सकर्मकः)
22. कृष विलेखने। (सकर्मकः)
23. कॄ विक्षेपे। (सकर्मकः)
24. कृञ् हिंसायाम्। (सकर्मकः)
25. (डु) क्रीञ्-द्रव्यविनिमये। (सकर्मकः)

26. क्षिणु हिंसायाम्

27. क्षुणु  च। (सकर्मकः)

28. क्षुदिर् संपेषणे। (सकर्मकः)

**( ख )**

29. खिद परिघाते। (अकर्मकः)

30. ख्या प्रकथने। (सकर्मकः)

**( ग )**

31. गण संख्याने। (सकर्मकः)

32. गॄ निगरणे। (सकर्मकः)

33. गृह उपादाने। (सकर्मकः)

**( च )**

34. चिञ् चयने। (सकर्मकः)

35. चुर स्तेये। (सकर्मकः)

36. छिदिर्-द्वैधीकरणे। (सकर्मकः)

37. उच्छृदिर् दीप्तिदेवनयोः। (सकर्मकः)

38. छो छेदने। (सकर्मकः)

**( ज )**

39. जनी प्रादुर्भावे (अकर्मकः)

40. जुषी प्रीतिसेवनयोः। (सकर्मकः)

41. ज्ञा अवबोधने। (सकर्मकः)

**( ड )**

42. डीङ् विहायसा गतौ। (अकर्मकः)

43. णश अदर्शने। (अकर्मकः)

44. णह बन्धने। (सकर्मकः)

45. णिजिर् शौचपोषणयोः। (सकर्मकाकर्मकौ)

46. णुद प्रेरणे। (सकर्मकः)

47. णू स्तवने। (सकर्मकः)

**( त )**

48. तञ्चु संकोचने। (सकर्मकः)

49. तनु विस्तारे। (सकर्मकः)

50. तुद व्यथने। (सकर्मकः)

51. तृणु अदने। (सकर्मकः)

52. उत्तृदिर् हिंसानादरयोः। (सकर्मकः)

53. तृप तृप्तौ। (अकर्मकः)

54. तृम्फ तृप्तौ। (अकर्मकः)

55. तृह हिंसायाम्। (सकर्मकः)

56. हिसि हिंसायाम्। (सकर्मकः)

57. त्रसी उद्वेगे। (अकर्मकः)

**( द )**

58. डुदाञ् दाने। (सकर्मकः)

59. दापू लवने। (सकर्मकः)

60. दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु। (अकर्मकः)

61. दिह उपचये। (अकर्मकः)

62. दीङ् क्षये। (अकर्मकः)

63. दीपी दीप्तौ। (अकर्मकः)

64. दुह प्रपूरणे। (सकर्मकः)

65. दूङ्-उपतापे (अकर्मकः)

66. दॄ विदारणे। (सकर्मकः)

67. दोऽवखण्डने। (सकर्मकः)

68. द्रा कुत्सायां गतौ। (सकर्मकः)

69. द्रूञ् हिंसायाम्। (सकर्मकः)

**( ध )**

70. डुधाञ् धारणपोषणयोः। (सकर्मकः)

71. धूञ् कम्पने। (सकर्मकः)

**( न )**

72. नृती गात्रविक्षेपे। (अकर्मकः)

**( प )**

73. पठ व्यक्तायां वाचि। (सकर्मकः)

74. पद गतौ। (सकर्मकः)

75. पा रक्षणे। (सकर्मकः)

76. पिश अवयवे। (सकर्मकः)

77. पिष्लृ संचूर्णने। (सकर्मकः)

78. पीङ् पाने। (सकर्मकः)

79. पुट संश्लेषणे। (सकर्मकः)

80. पुष पुष्टौ। (सकर्मकः)

81. पूञ् पवने। (सकर्मकः)

82. पृङ् व्यायामे। (अकर्मकः)

83. पृड सुखने। (सकर्मकः)

84. मृड सुखने। (सकर्मकः)

85. पॄ पालनपूरणयोः। (सकर्मकः)

86. प्रच्छ ज्ञीप्सायाम्। (सकर्मकः)

87. प्रीञ् तर्पणे कान्तौ च। (सकर्मकः)

88. प्सा भक्षणे। (सकर्मकः)

**( ब )**

89. बुध अवगमने। (सकर्मकः)

90. ब्रूञ् व्यक्तायां वाचि। (सकर्मकः)

**( भ )**

91. भञ्जो आमर्दने। (सकर्मकः)

92. भा दीप्तौ। (सकर्मकः)

93. भिदिर् विदारणे। (सकर्मकः)

94. ञिभी भये। (अकर्मकः)

95. भुज पालनाभ्यवहारयोः। (सकर्मकः)

96. भुजो कौटिल्ये। (अकर्मकः)

97. डुभृञ् धारणपोषणयोः। (सकर्मकः)

98. भ्रस्ज पाके। (सकर्मकः)

**( म )**

99. मनु अवबोधने। (सकर्मकः)

100. टुमस्जो शुद्धौ। (अकर्मकः)

101. माङ् माने शब्दे च। (सकर्मकः)

102. माङ् माने। (सकर्मकः)

103. मिल संगमे। (सकर्मकः)

104. मीञ् हिंसायाम्। (सकर्मकः)

105. मुच्लृ मोचने। (सकर्मकः)

106. मुष स्तेये। (सकर्मकः)

107. मृङ् प्राणत्यागे। (सकर्मकः)

108. मृड सुखने। (सकर्मकः)

109. मृश आमर्शने। (सकर्मकः)

110. मृष तितिक्षायाम्। (सकर्मकः)

**( य )**

111. या प्रापणे। (सकर्मकः)

112. यु मिश्रणामिश्रणयोः। (सकर्मकः)

113. युजिर् योगे। (सकर्मकः)

114. युञ् बन्धने। (सकर्मकः)

115. युध सम्प्रहारे। (अकर्मकः)

**( र )**

116. रा दाने। (सकर्मकः)

117. रिचिर् विरेचने। (सकर्मकः)

118. रुजो भङ्गे। (अकर्मकः)

119. रुधिर् आवरणे। (सकर्मकः)

**( ल )**

120. ला आदाने। (सकर्मकः)

121. लिप उपदेहे। (सकर्मकः)

122. लिह आस्वादने। (सकर्मकः)

123. लुप्लृ छेदने। (सकर्मकः)

124. लुभ विमोहने। (सकर्मकः)

125. लूञ् छेदने। (सकर्मकः)

**( व )**

126. वनु याचने। (सकर्मकः)

127. वा गतिगन्धनयोः। (अकर्मकः)

128. विचिर् पृथग्भावे। (सकर्मकः)

129. ओविजी भयचलनयोः। (अकर्मकः)

130. विद ज्ञाने। (सकर्मकः)

131. विद सत्तायाम्। (सकर्मकः)

132. विद विचारणे। (सकर्मकः)

133. विद्लृ लाभे। (सकर्मकः)

134. विश प्रवेशने। (सकर्मकः)

135. वृङ् संभक्तौ। (सकर्मकः)

136. वृञ् वरणे। (सकर्मकः)

137. व्यच व्याजीकरणे (सकर्मकः)

138. व्यध ताडने। (सकर्मकः)

139. ओव्रश्चू छेदने। (सकर्मकः)

**( श )**

140. शद्लृ शातने। (सकर्मकः)
141. शिष्लृ विशरणे। (सकर्मकाकर्मकौ)
142. शीङ् स्वप्ने (अकर्मकः)
143. शुन गतौ। (सकर्मकः)
144. शुष शोषणे। (सकर्मकः)
145. शो तनूकरणे। (सकर्मकः)
146. श्रा पाके। (सकर्मकः)
147. श्रीञ् पाके। (सकर्मकः)

**( ष )**

148. षणु दाने। (सकर्मकः)
149. षद्लृ विशरणगत्यवसादनेषु। (सकर्मकाकर्मकौ)
150. षिच क्षरणे। (सकर्मकः)
151. षिञ् बन्धने। (सकर्मकः)
152. षिवु तन्तुसन्ताने। (सकर्मकः)
153. षुञ् अभिषवे। (सकर्मकाकर्मकौ)
154. षुङ् प्राणिप्रसवे। (सकर्मकः)
155. षोऽन्तकर्मणि। (सकर्मकः)
156. ष्ठा गतिनिवृतौ। (अकर्मकः)
157. ष्णा शौचे। (अकर्मकः)

**( स )**

158. सृज विसर्गे। (सकर्मकः)
159. स्कुञ् आप्लवने। (सकर्मकः)
160. स्तृञ् आच्छादने। (सकर्मकः)
161. स्फुल संचलने। (अकर्मकः)
162. स्फुर संचलने। (अकर्मकः)

**( ह )**

163. हन हिंसागत्योः। (सकर्मकः)
164. ओहाक् त्यागे। (सकर्मकः)
165. हाङ् गतौ। (सकर्मकः)
166. हिंसि हिंसायाम्। (सकर्मकः)
167. तृह हिंसायाम्। (सकर्मकः)
168. हु दानाऽदनयोः। (सकर्मकः)
169. ह्री लज्जायाम्। (सकर्मकः)

●●●